ताराहस्यम्



डॉ. परमात्मा दुबे



ब्रह्मानन्दकृतम्-

तारा-रहस्यम्

वृत्ति-वृत्तिकासहितम्

सम्पादकः

डॉ. परमात्मा दुबे

अध्यक्षः

सांख्ययोगतन्त्रागम-विभागस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणस्याम्



प्रकाशक

शारदा-संस्कृत-संस्थान

जगतगंज, वाराणसी-२२१००२

प्रकाशक -
शारदा संस्कृत संस्थान
सी. 27/59 जगतगंज, वाराणसी- 221002
दूरभाषः - (0542) 2204168
E-mail:sharadabhawan@yahoo.co.in
Website-www.sharadasansthan.in

ISBN : 978-93-81999-27-1

सन् - २०१३

मूल्यम् - ५००/-

मुद्रकः-
प्रभा प्रेस
चौकाघाट, वाराणसी

नमस्तारायै

शक्त्यभावे जगति शिवोऽपि किञ्चित् कर्तुमशक्तो शववत् प्रतिभाति तदा पामरनरस्य का गतिः? अतः शक्तिसाधनायाः महती आवश्यकता अनुभूयते। शास्त्रेषु परा, प्रकृतिः महादेवी, दुर्गा, महाविद्यादयः अनेकशक्तिसाधनक्रमाः दृश्यन्ते। परब्रह्मणः पट्टमहिषी परा, पराप्रकृतिः, मूलप्रकृत्यादिविविधनामाभिः आराधिता। सांख्यस्य प्रकृतिः वेदान्तस्य माया, आगमस्य शक्तिः सैव वर्तते। सांख्ये तत्वानाम् जननी, वेदान्ते आवरणात्मिका आगमशास्त्रे सञ्चारिकारूपेण सैव विचारणीया। माता शिशुं क्रोडे आच्छादनादिविधिना पालयति, स्वदुग्धपानसंस्कारादिना तस्मिन् शक्तिं संचारयति तदा शिशुः शक्तो भवति किन्तु त्रिविधरूपा मातैव स्थिता। तथैव एकैव शक्तिः सर्वत्र वर्णिता आराधिता साधिता चास्ति।

देववादस्य विकासात्परं पराशक्तिरपि सत्वरजस्तमोरूपा, सृष्टि-पालन-संहारकारिका ब्रह्मविष्णुरुद्रभेदोपगता महासरस्वती-महालक्ष्मी-महाकालीत्रिविधनामभिर्मार्कण्डेयपुराणे देवीमाहात्म्ये वर्णितास्ति। तत्रैव ब्राह्मण्यादिमातृकाणां, शक्तीनाम् काली-दुर्गा-चामुण्डा-नामोल्लेखोऽपि दृश्यते। मार्कण्डेयपुराणे महालक्ष्मीः, मूलशक्तिरूपा, सर्वदेवशक्तीनाम् उत्कटोग्रसंचयस्वरूपा स्थापिता। महासरस्वतीचरिते मातृकादयः तस्यैव विलासाः, महाकाली ज्ञानमूला असुराणां मोहिनी तथा विष्णोः प्रबोधिनी प्रतिभाति।

देव्युपनिषदि -

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

इति मन्त्रेण देवीसूक्तस्य प्रधानता सिद्ध्यति तथापि मन्मते प्रथमर्षिणा ब्रह्मणा कृता योगनिद्रास्तुतिः तान्त्रिकरात्रिसूक्तमेव शक्त्याः आदिस्तोत्रमस्ति। स्तवनगन्धपुष्पादि-पूजोपचाराणाम्, सर्वथा समर्पणमेव मार्कण्डेयपुराणप्रतिपादित आदिशक्तिसाधनाविधिः। सप्तसत्याः द्वादश-त्रयोदशाध्याययोः उपासनाक्रमे प्रस्तावना विधेया, तत्रापि पाठहोमादि-वैदिकक्रमेणैव सम्पादनीया।

श्रीमद्देवीभागवते पञ्चप्रकृतिनामोल्लेखः तथा विविधप्रकृतिनामसंकेतः विधीयते। श्रीकृष्णः परं ब्रह्म तस्य शक्तिः राधा आदिशक्तिः। श्रीदेवीभागवतस्य कृष्णः केवलः यदुनन्दनः नास्ति न राधा वृषभानुजा। तस्मिन् पुराणे काली दुर्गानाम्ना प्रसिद्धा। देवीभागवतप्रतिपादिता राधा तत्र षोडशकलामयपूर्णब्रह्मणः कृष्णस्य शक्तिरूपा षोडशी, कृष्णस्यैवापररूपस्य विष्णोः शक्तिभूता श्रीविद्या, त्रिगुणात्मपरब्रह्मणः शक्तिभूता त्रिपुरा कथ्यते। नारदीयपुराणे महाविद्याक्रमस्य प्रथमोल्लेखः उपलभ्यते किन्तु तेषां यक्षिणी नामाभिहितं न तु महाविद्या। तत्रैव भुवनेश्वर्याः उत्पत्तिः महाकालीतः काली, तारायाश्च महासरस्वती, त्रिपुरायाः लक्ष्मीः इत्यभिहिताः। प्रकृतिक्रमः अत्राऽपि वर्णितः किन्तु अत्र राधा सहचरी ललिता अनुराधा त्रिपुराषोडशीरूपेण प्रधानतां प्राप्ता।

नारदीयपुराणानुसारतः काल्याः तारामहाविद्यायाश्च उत्पत्तिस्रोतः एकमेव। प्रथमा काली द्वितीया तारा तत्रैव तेषां मन्त्रोद्धारस्तोत्राण्यद्यापि उपलभ्यन्ते। पुराणग्रन्थे प्रथमोल्लेखोऽत्रैव प्रतिभातिं। शिवपुराणेऽपि दशमहाविद्यानामोल्लेखः रुरुवधप्रसङ्गे कृतः।

महाविद्याक्रमे दशमहाविद्यायाः कथनं तथापि काल्याः तारायास्त्रिपुरायाश्च प्राधान्यं वर्तते। कालीतारयोरुभयोः ज्ञानदानपुरस्सरं मोक्षप्रदाने समर्थाः अज्ञानध्वंशिनी शक्तिः। उभावपि श्मशानविहारिण्या, शिवशवयोर्वा हृदि लासिनी, ताराकमलप्रियानागभूषणा वर्णिता। काली अस्थिभूषणा तारानागभूषणा। नागप्राणशक्तेः वायोः प्रतिनिधिः जगदाधारशेषस्यांशः, काली तारायाः पूर्ववर्ती, आराध्यरूपमहाकालस्य भैरवी, शेषोऽपि जगदान्ते महाकालस्य प्रतिरूपैव उभावपि वाक् रूपा, कालप्रचोदिता च।

भगवती तारा दशमहाविद्याक्रमान्तर्गता द्वितीयस्थानभूता द्वित्येति ख्याता सारतरा महाविद्या। इयं तारा, एकजटा, महोग्राद्यनेकनाम्ना विभाति। नीलसरस्वतीत्यस्या विशिष्टं नाम प्रसिद्धम्। अस्य रूपमपि त्रिविधम्-

स्वपयःपानतः समुद्रमन्थनोद्भूतकालकूटप्रभावपीडितशिवतारिणी, तस्य मृत्युञ्जयत्व-प्रदायिनी तारकेश्वरख्यातिदातृतारा, नेत्रकनीनिकाभूता ज्ञानमूलातारा अक्षोभ्यभैरवी, वशिष्ठाराधिता तारा, वामाखेपा, मदनमिश्राद्यनेकशूरिभिरर्चिता तान्त्रिकी तारा। बौद्धानुयायिनः अपि तारां यजन्ति, भगवन्तं बुद्धमेव अक्षोभ्यमामनन्ति किन्तु सापरा प्रतीयते।

तारार्चनविषयकाः बहवः ग्रन्थाः सन्ति। यथा तारा (तारिणी) तन्त्रम्, तारासूक्तं तोडलतन्त्रम्, फेत्कारिणीतन्त्रम्, तारार्णवम्, नीलतन्त्रम्, महानीलतन्त्रम्, बृहन्नीलतन्त्रम्,

नीलसरस्वतीतन्त्रम्, तन्त्ररत्नम्, ताराशाबरतन्त्र-तारोपनिषद्चीनाचार-ब्रह्मयामल-तन्त्रस्थमहाचीनाचारः क्रमशः, एकजटातन्त्रम्, एकवीरतन्त्रम् तारिणीनिर्णयः, बृहन्नीलतन्त्रम्। एतद् विषयकप्रकरणग्रन्थेषु लक्ष्मणभट्टकृतताराप्रदीपः, नरसिंहठक्कुरविरचिततारा भक्ति-सुधार्णवः, प्रकाशानन्दविमलानन्दकाशीनाथकृतास्त्रयः ताराभक्तितरंगिणीनामकाः ग्रन्थाः नित्यानन्दस्य तारा कल्पलता पद्धतिः तथा तारिणी परिजातमहोग्रताराकल्पनामकाः प्रकरण-ग्रन्था उपलभ्यन्ते। स्तोत्रेषु ताराकर्पूरस्तोत्रम्, सहस्रनामस्तोत्रञ्च प्रसिद्धे।

प्रस्तुततारारहस्यम् अन्यतमः प्रकरणग्रन्थः। तारासारः। तारानिगमः। ताराकल्पः। शक्तिसारः। मत्स्यसूत्रे, शक्तिकल्पा, तारार्णवः महानीलनीलबृहन्नीलादीन् बहून् ग्रन्थानालोड्य ग्रन्थकारेण सारतत्वमत्र सन्निवेशितम्। यथा ग्रन्थस्य मंगलाचरणे स्वयं ग्रन्थकारेण स्वीकृतम् तारासारहिताय वै।

इयं कस्य कृतिः इदं विचारणीयम्। लोके तारारहस्यम् ब्रह्मानन्दकृतं प्रसिद्धं यद्यपि। शिवदत्तशास्त्रिणाऽपि सम्पादिता तारारहस्यनाम्नी एका रचना उपलभ्यते। या शाक्त-प्रमोदस्य तारातन्त्रभागस्य छायाकृतिरस्ति। अस्माकम् आलोच्यग्रन्थः पूर्ववर्ति तारारहस्यम्। यदा अस्य मंगलाचरणे ब्रह्मानन्दतनम इति उद्घोषणेन तारारहस्यरचना कर्ता आत्मानं ब्रह्मानन्दतनयम् उद्घोषयति तदा लोके ब्रह्मानन्दनाम कथं प्रचलितम्। एतद्विषये महामहोपाध्यायगोपीनाथकविराजमहाभागेन स्वतान्त्रिकसाहित्यग्रन्थस्य भूमिकायां तारारहस्यकारस्तथा तस्य वृत्तिकाररूपेण कश्चित् शङ्करनाम्नः आगमाचार्यस्य उल्लेखः कृतः। शङ्करनामकः सः आगमाचार्यः गौड़देशीय इति तारारहस्यवृत्तिकारेण स्वयमपि स्वीकृतम् मह्यमपि रहस्यकारः तथा वृत्तिकारः शङ्करः प्रतिभाति। पितृचरणनां सम्माने तेनैव रहस्यकारस्य नाम ब्रह्मानन्द इति प्रसिद्धीकृतम् इति सम्भाव्यते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्योपार्येण डा० परमात्मादुबेमहोदयेन सम्पादितोऽयं ग्रन्थः द्वाविंशपटलात्मकः यस्मिन् आद्यः-सप्तपटलाः मूलरूपाः, अन्तिमाः पञ्चदशपटलाः वृत्यात्मकाः सन्ति। ग्रन्थकारेण प्रथमपटले तारोपासकानाम् कृते प्रातः कृत्यसन्ध्यादिवर्णनम्, प्रसङ्गतः मन्त्रोद्धारोऽपि वर्णितोऽस्ति। द्वितीये दीक्षा, अन्तर्याग-मन्त्रमालाविचारसहिता तृतीयपटले बहिर्यागान्तर्गतन्यासादिचर्या तत्त्वसंस्कारोल्लेखः, चतुर्थे षोढाविवेचनम्, पञ्चमे पुरश्चर्या, षष्ठे शवः, चितासाधनादिसाधनक्रमाः सप्तमे विविधस्तोत्राणि वर्णितानि सन्ति। तारारहस्यवृत्तिकारेणाऽपि पञ्चदशपटले पूर्वोक्तरहस्यविस्तारक्रमे स्तोत्र-दीक्षापूजान्यासयुक्तारहस्यपूजा (विशिष्टसाधनाक्रमः) भावविवेचनहोमादिकस्य विशिष्टविवेचनम् कृतमस्ति।

भगवती तारा सारस्वततत्त्वप्रदायिनी ब्रह्मतनया वशिष्ठोपासिता विद्यावैशिष्ट्यप्रदायिका महाविद्या इयं कवित्वप्रदायिनी भवतारिणी च। भगवत्याः मन्त्रः अस्या द्रीं क्रमेण स्त्रीं, त्रीं रूपेणाऽप्युपलभ्यते। कामाख्यापीठं कालीतारोभयोः साधकानाम् कृते श्रेष्ठतमं तीर्थं प्रसिद्धम्। शारदासंस्कृतसंस्थानस्य संचालकैः श्री डॉ.विनोदरावपाठकमहाभागैः श्रीविद्यातिरिक्तग्रन्थस्य प्रकाशनं तस्य सारस्वतींनिष्ठां प्रस्तौति। सम्पादकप्रकाशकौ तारोपासनासहायकानाम् लब्धाशीर्वादौ भवेताम्।

मृत्युञ्जयत्रिपाठी

विषयानुक्रमणिका


तारारहस्यवृत्तिः



तारा-रहस्यम्

।।ॐ नमस्तारायै।।

तारा-रहस्यम्



प्रथमः पटलः

अथ मङ्गलाचरणम्

तारां सारतरां त्रिलोकजननीं सर्वार्थसिद्धिप्रदाम्।
सर्वाद्यां शुभदां सदाशिवमयीं देवैः सदा वन्दिताम्।।१।।
नत्वा राजे सरोजे सकलगुणमयीं तद्रहस्यं तनोमि।
ब्रह्मानन्दस्तनुभवसुतः साधकानां हिताय।।२।।
ब्रह्माविष्णुरुमापतिस्त्रिभुवने सृष्टिं स्थितिं प्रालयम्।
तनोतीमां[1] ध्यात्वा सकलगुणकरीं तारिणीं मोक्षदात्रीम्।।३।।
नानासिद्धिप्रदात्रीं भजति यदि जनः सैव गृह्णाति चैतत्।
त्यक्त्वा चेमां यजनभजनाःदन्धकारं[2] प्रयाति।।४।।
ज्ञात्वा चैतद्रहस्यं भजति यदि जनः श्रीतारकां तारकाम्[3]।
लभेच्छ्रेष्ठां सिद्धिं सुरनरखगपते[4] दुर्लभां तारकायाः।।५।।
न चेद् यस्य स्थानं[5] सकललयकरं याति नित्यं दुरन्तम्।
सदा दुःखं शोकं न च गतिरपि प्राप्ता आराध्य बाध्यां[6]।।६।।

---

१. तनोमीमां।
२. यजाद्बादुर्गावत्तानभजनात्।
३. तारिकां।
४. खगतिं।
५. न चेदहास्यं
६. प्राप्तिराराध्यराध्यां।

अथ सृष्टिप्रकरणम्

तारासारं समालोक्य तारानिगममेव च ।
महानीलं महाचीनं नीलतन्त्रं शिवप्रियम् ॥७॥
ताराकल्पं शक्तिकल्पं शक्तिसारं तथैव च ।
रुद्रयामलकञ्चैव[१] नीलसारस्वतन्तथा ॥८॥
लिङ्गतन्त्रं योनितन्त्रं षोढातन्त्रं महामतम् ।
तारायाः कुलसर्वस्वं ऊर्ध्वाम्नायं विशेषतः ॥९॥
नानाशास्त्राणि चालोक्य ताराया मन्त्रसिद्धये ।
वक्ष्ये रहस्यं ताराया ब्रह्मानन्दो हिताय वै[२] ॥१०॥

इति[३] प्रथमं मङ्गलाचरणम्।

नानाशास्त्रार्थ विलोकन[४] पूर्वकं[५] श्रीमत्तारादेव्या रहस्यं धर्मकामार्थमोक्षाणां[६] तारामन्त्रेण[७] दायकम्। सकलगुरुमतं प्रातःकृत्यादिक्रियाज्ञानार्थम्।[८] देवतानिरूपणादिग्रन्थः[९] साधकहिताय ब्रह्मानन्देन मया यत्नेन क्रियते।

प्रथमे निगमे[१०] कल्पे रत्नद्वीपे सुरालये ।
श्रुत्वा कालीमुखाद् वाक्यं न च हृष्टः सदाशिवः ॥११॥
पुनः पुनः पृच्छमानं प्रश्नञ्चैवा[११]करोच्छिवा ।
यया मूर्त्या करालास्यं[१२] वारणं नाशितं पुरा ॥१२॥
वराभयकरा देवी खड्गमुण्डधरा तथा ।
ललज्जिह्वा चोग्ररूपा काली सर्वैः सुपूजिता[१३] ॥१३॥
तदा चिन्तान्विता देवा रुद्रार्थं सर्वथा प्रिये ।
देवताभिः समं ब्रह्मा स्तुतिं कर्त्तुं समागतः ॥१४॥

---

१. रुद्राराध्यं महातन्त्रं।
२. ब्रह्मानन्द।
३. इतिशब्दो नास्ति।
४. शास्त्रार्थावलोकन।
५. पूर्वक।
६. भोगस्वर्गधर्मकामार्थमोक्षाणां
७. तारामन्त्रे।
८. क्रियाङ्गत्वेन।
९. ग्रस्तं।
१०. प्रथम निगम।
११. प्रासञ्चैवा।
१२. करालास्या।
१३. कालिका सर्वशून्यगा।

दृष्ट्वा तान् मोक्षदा देवी. कवित्वधनदायिनी ।
प्राप्तलज्जा महादेवी दक्षिणे खड्गमानयेत् ।।१५।।
लज्जया नम्रवक्त्रा च तस्माल्लम्बोदरी परा ।
रुद्राद्विगलितं वासो ब्रह्मा[1] चर्माम्बरं दधौ ।।१६।।
काञ्चीमुद्रां[2] प्रगृहीत्वा[3] कालीं कृत्वाथ[4] दक्षिणे।
भूमौ च मुकुटं क्षिप्त्वा तत्र रुद्रं समानयेत् ।।१७।।
भूमौ निपत्य देवेशं[5] पपात चरणान्तिके ।
अयुतं द्वादशं देवि पुस्तकं चावलोकितम् ।।१८।।
कलां वक्तुं न शक्तोऽहं वद योगं सुरेश्वरि ।
मातर्मे कालिके देवि प्रसीद भक्तवत्सले ।।१९।।
श्रुत्वा वाक्यं शिवस्यापि हसित्वोवाच तारिणी ।
त्वद्रूपा पुरुषाः सर्वे मद्रूपाः सकलाः स्त्रियः ।।२०।।
इदं[6] योगं महादेव भावयस्व दिने दिने ।
पादपद्मे ततो नीलपद्मं दत्तं मनोहरम् ।।२१।।
गृहीत्वा वामहस्तेन तत्तोयैरभिषिच्य च।
रुद्रदत्तं पानपात्रं विधृतं वामपाणिना ।।२२।।
एतेन तारा सा जाता शीर्षेऽक्षभ्यो भुजङ्गमः[7]।
महाकालः स एव स्यात्तारारूपं[8] जगत्त्रये ।।२३।।
यस्याश्च स्मरणे सद्यो भोगमोक्षः करस्थितः ।
एवंभूता महादेवी ब्रह्माण्डशून्यमध्यगा ।।२४।।
सृष्टिकरी महादेवी तारारूपा[9] त्रयान्विता।
द्वितीये शून्ये[10] चण्डे च सुविराड्रूपधारिणी ।।२५।।

---

१. व्याघ्र
२. मुद्रा
३. प्रगृहीता
४. स्व
५. देवेशः
६. इत्थं।
७. भुजङ्गकः
८. रूपा
९. करे
१०. द्वितीयशून्ये चान्ते च विराट

तृतीये च महाशून्ये तडित्कोटिसमप्रभा।
निराकारा निराधारा तारा सर्वार्थसाधिका।।२६।।
चतुर्थे[१] शून्यमाश्रित्य विष्णुः[२] पालयते[३] ध्रुवम्।
तस्माज्जातश्चतुर्वक्त्रः सृष्टिं वितनुते ध्रुवम् ।।२७।।
पञ्चशून्ये महादेवी शिवरूपा त्रिलोचना।
लयं नयति ब्रह्माण्डं महाकालेन लालिता।।२८।।
पुनर्ब्रह्माण्डसिद्धार्थे[४] महाविद्या च तारिणी।
सर्वान्ते कालिकां[५] मूर्तिं त्यक्त्वा[६] वस्त्रं पुनर्ययौ।।२९।।
षष्ठे[७] शून्यमयं ब्रह्मविश्वं विश्वेश्वरन्तथा।
महा महा शब्दा[८] परा कालिका[९] बीजतारका।।३०।।

इति श्रीपरमहंसपरिव्राजकाचार्यब्रह्मानन्द गिरितीर्थावधूत-विरचिते ताराहस्ये सर्वरहस्योत्तमोत्तमे हरगौरीसंवादे प्रथमे पटले सृष्टिप्रकरणम्।।[१०]

अथ प्रातःकृत्यादिप्रकरणम्

साधको ब्राह्मेमुहूर्ते उत्थाय योषादर्शनं कृत्वा चोत्तरास्यः स्वनाभौ दक्षिणहस्तोपरि वामहस्तं दत्वा शिरसि द्वादशार्णसरसीरुहोदरसहस्त्रदल-[११] कमलावस्थितं[१२] श्वेतवर्णं नानालङ्कारभूषितं रक्तशक्तिवामभागं त्रिनयनं[१३] बिम्बाधरं शक्तिवदनारविन्दं समालोकयेत्[१४] हृष्टमानसं स्वस्तिकासनस्थं विभाव्य मानसोपचारैराराध्य ऐं इति[१५] अष्टोत्तरशतं जप्त्वा समर्प्य प्रणमेत्।

---

१. चतुर्थ
२. विष्णुं
३. पालयरा
४. सिद्ध्यर्थ
५. कालिका
६. मूर्त्तिस्यक्तवा
७. षष्ठ
८. शब्द
९. पराकाली विधाच तारका।
१०. इति श्रीब्रह्मानन्दपरमहंसपरिव्राजका-वधूतरचिते तारारहस्ये प्रथमपटले सृष्टिपटलः।
११. सहस्रार
१२. कमलावस्थितसाकारमूर्त्तिप्रधाननानालङ्कारभूषित-सहस्रदलकर्णिकान्तर्गतप्रत्येकसहस्रगुरु-स्ततः सद्गुरुं विभावयेत्। शुक्लवर्णं नानालङ्कार-भूषितरक्त-शक्तिवामभागम्।
१३. द्विनयनं
१४. लोकयंन
१५. मन्त्र

ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।३१।।
ॐ[१] अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।।३२।।
उत्थाय पश्चिमे यामे[२] भावयेद् ब्रह्मरन्ध्रतः ।
भावयेत् स्वगुरुं ततः[३] इति पाठान्तरम् ।
रक्तशय्यासमायुक्तं[४] शुक्ररूपं महेश्वरम् ।।३३।।
सहस्रारे महापद्मे कर्पूरधवलं[५] गुरुम् ।
उत्थाय पश्चिमे यामे तच्चैतन्यं समाचरेत् ।।३४।।
सर्वविद्यासु सर्वत्र प्रातःकृत्यादि कर्मसु ।
ध्यानयोगे वामहस्ते दक्षिणं परिधारयेत्[६] ।।३५।।

इति नानाशास्त्रानुकूलप्रातः[७]कृत्यादिवचनात् ताराविषये वैपरीत्यमिति तारागमे।

स्वनाभौ दक्षिणे हस्ते वामहस्तं प्रदापयेत्[८] ।
तारयेच्च सहस्रारे श्रीगुरुं शक्तियुक्तकम्[९] ।।३६।।

महानीलेऽपि–

ताराविद्यासु सर्वासु भावनादौ व्यतिक्रमः ।
स्वनाभौ पाण्योर्योगश्च भूतशुद्ध्यादिके शिवे ।।३७।।
सहस्रारे महापद्मे इन्दुकुन्दसमप्रभम् ।
रक्तशय्या[१०]समायुक्तं भावयेत् साधकाग्रणीः[११] ।।३८।।

तारानिगमादावपि–

प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभयकरं शान्तं देव्याश्च[१२] वदनाम्बुजम् ।।३९।।

---

१. ऐं
२. वामे
३. पाठो नास्ति
४. शुक्लरूपं मनोहरम्
५. धवली गुरुः
६. परिधापयेत्
७. इति नानाग्रन्थानुकूलप्रकारवचनात्।
८. विधाय च।
९. संयुतं।
१०. शक्त्या।
११. ग्रनी
१२. स्मरेत्तन्नामपूर्वकम्।

दृष्ट्वा हृष्टं ब्रह्ममयं परब्रह्मस्वरूपिणम् ।
नानालङ्कारसंयुक्तं भावयेत् स्वस्तिकासने ।।४०।।
सर्वज्ञानप्रदं देवं ज्ञानानन्दस्वरूपिणम्।
तथा च[१] वाग्भवं बीजं सर्वज्ञानविशुद्धये ।।४१।।
न जप्त्वा वाग्भवं बीजं तारिणीं यस्तु भावयेत्।
न सिद्धिस्तस्य देवेश ! विघ्नस्तस्य क्रियासु च।।४२।।
प्रातः शिरसि शुक्लाब्जे गुरुं सम्भाव्य यत्नतः ।
न जप्त्वा वाग्भवं बीजं प्रणमेच्च पुनः पुनः ।।४३।।

सर्वसाधारणब्रह्मखण्डोक्तमन्त्रेण वारद्वयं प्रणमेत्। तत्र[२] प्राणायामचतुष्टयस्यावश्यकत्वम्।।

मन्त्रद्वयेन तूक्तेन प्रणमेत् श्रीगुरुं सदा।
तारामन्त्रविशेषेण कुलोक्तेन द्वयेन च ।।४४।।

ततः स्वस्तिकासनस्थः पृथ्वीमण्डलात् सार्द्धत्रिवलयान्वितां[३] रविकोटिसमप्रभां चन्द्रकोटिसुशीतलां स्वयम्भूलिङ्गवेष्टितां निराकारस्वरूपां परब्रह्ममयीं कुण्डलिनीं ज्ञानानन्दमुदितमानसां महायोगस्वरूपिणीं मेरुदण्डं प्रकाश्य पुरतः[४] स्वयम्भूकनकवर्ण-शीर्षतः पद्मवनसमुद्भवां[५] बहुतरप्रणवानामेक-कृतशब्द[६]विभागमयीं तत्त्वस्वरूपाम् इडापिङ्गल्योर्मध्ये सुषुम्नामध्यमध्यतः चित्रिणीं[७] ब्रह्मनाडीं[८] प्रवेशयेत्[९]। द्वितीयं[१०] पद्मं वामतो विभाव्य मृदुमन्दगतिमयीं लोलीभूतां हृत्पद्मे विश्राम्य गुरुयोगं विभाव्य च मानसैः पूजयेत्।

---

१. तथा वाग्भवमन्त्रजपस्यावश्यकत्वं कुलसर्वस्वाम्भवादौ ताराविषये रुद्रयामलादौ सर्वविषये च। विभाव्य श्रीगुरुंशीर्षे शतमष्टोत्तरं जपेत्। वाग्भवं प्रथमं बीजं सर्वज्ञानविशुद्धये।
२. अत्र।
३. वसस्मिताय।
४. मेरुदण्डपुरतः।
५. समुद्भव।
६. भ्रमज्ञानमेकत्रीकृतशब्द।
७. स्चित्रिणी
८. ब्रह्मनाड़ी
९. प्रावेशयेत्
१०. द्वितीये

विभावयेत् सदा भक्त्या सर्वाद्यां[१] भुजगाकृतिम्।
भूपद्मे लिङ्गमावेष्ट्य राजते ब्रह्मरूपिणी ।।४५।।
।।इति शक्तिसारे।।

।।तारासार-रुद्राध्यायादौ।।[२]

स्वयम्भूनाम्नि योनौ च लिङ्गेन भावयेच्छिवे[३]।
शतकोटि जपेद्[४] देवि तस्य सिद्धिर्न चैव हि।।४६।।
पुरतो मेरुदण्डस्य त्रिगुणां गुणशालिनीम् ।
इडापिङ्गलयोर्मध्ये सुषुम्नामध्यमध्यतः।।४७।।
चालयेच्छ्यामलां शुद्धां ज्ञानसन्दीपनीं पराम्।
तत्त्वकोटिप्रभायुक्तां[५] विसतन्तुतनीयसीम्।।४८।।
मध्यतो ब्रह्मनाड्या च रविकोटिसमप्रभाम् ।
द्वितीये वामतो बुद्ध्या गुरोरन्तिकमानयेत्।।४९।।
तत्रानीय परां शुद्धां ज्ञानसन्दीपनीं[६] शिवाम्।
तडित्कोटिप्रभायुक्तां ब्रह्मविष्णुशिवात्मिकाम्।।५०।।
परां[७] कुण्डलिनीशक्तिं साकारां परिभावयेत्।
तस्य मध्ये[८] समानीय रक्तवर्णां विभावयेत्।।५१।।
तदा सिद्धिमवाप्नोति नान्यथा कल्पकोटिभिः ।
ज्ञानानन्दमयीं साक्षात् सर्वानन्दप्रदायिनीम्।।५२।।
नानालङ्कारभूषाढ्यां भावयेद् गुरुसन्निधौ ।
मानसैः पूजयित्वा च मूलमन्त्रं शतं जपेत्।।५३।।
कृताञ्जलिपुरो भूत्वा चिन्तयेत् परदेवताम् ।
बालात्रिपुरसुन्दर्याः रूपं तत्र नियोजयेत्।।५४।।
उद्यद्भानुसहस्राभां द्विभुजां शिवसुन्दरीम् ।

---

१. सर्वाढ्यां
२. रुद्राराध्यादौ
३. शिवां
४. जपाद्देवि
५. तड़ित
६. ब्रह्मविष्णुशिवात्मके
७. परमां कुण्डलींशक्तिं
८. वामे

प्रातःकृत्यं[1] विधायाथ मूलमन्त्रं जपेऽत्र च।
तस्य सिद्धिर्महादेवि! हृदये योगिनीगणैः ।।५५।।

एतेन गुरुसन्निधौ कुण्डलिनीं साकारां विभाव्य मानसैः सम्पूज्य मूलमष्टोत्तरशतं जप्त्वा समाप्य प्रणमेत्। ततो भूमिं प्रणम्य कुमारीं ब्राह्मणांश्च दृष्ट्वा पठेत्।

ॐ अहं देवो न चान्योऽस्मिन् ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ।।५६।।
ब्रह्मानन्दसदानन्दपरं ज्ञानविधारकः[2]।
तारकाभक्त आनन्दपूर्णानन्दः सदाशिवः ।।५७।।
भैरवोऽहं सुधाढ्योऽहं तत्त्वज्ञोऽहं कुलस्त्रियः।
गुरुप्रसादवानस्मि शक्तिसाधकसेवकः ।।५८।।
रतानन्दः कुलानन्दः कुमारीदास एव च।
कुमारीवणिकोऽहश्च[3] ताराचरणनायकः ।।५९।।

इति तारानिगमोक्तं पठित्वा बहिर्गच्छेत्।

प्रातः कृत्यं विना देवि न सिद्धिर्जायते शिवे !
न पूजाफलमाप्नोति मन्त्रजापस्य निश्चितम्।।६०।।
सर्वा क्रिया निष्फला स्याद् वैदिकी तान्त्रिकी तथा।
प्रातःकृत्यविहीनस्य शौचहीना यथा क्रिया ।।६१।।

इति श्रीपरमहंस[4]परिव्राजकाचार्य्यब्रह्मानन्दगिरितीर्थस्वामि-कुलावधूतविरचिते तारारहस्ये सर्वरहस्योत्तमे हरगौरीसंवादे प्रथमपटले प्रातःकृत्यादिप्रकरणम्।।



---

१. कीर्त्तिं
२. विधायकः
३. वालकोऽहं
४. इति श्री ब्रह्मानन्द परमहंसपरिव्राजकावधूत विरचिते तारारहस्ये प्रथमपटले प्रातःकृत्य पटलः।

अथ तारागायत्रीप्रकरणम्

ततः प्रातःकृत्यानन्तरं स्नानम्। साधकानां वैदिकतान्त्रिकानां मध्ये प्रातः-कालावधि महानिशापर्य्यन्तं क्रिया वक्तव्या[१]। शिवपूजा तु वैदिक-तान्त्रिकयोरेकत्वात् तत्पूजनञ्च। अतो[२] नद्यादौ गत्वा मज्जनं कृत्वा 'ओमद्येत्यादि श्रीमत्तारादेव्याः प्रीतयेऽस्मिन्[३] जले स्नानमहं करिष्ये"

इति सङ्कल्पजले त्रिकोणं विलिखेत्।[४]।

तारानिगमे-

देव्याश्च प्रीतये स्नानं कर्त्तव्यं तन्त्रवेदिभिः।
तीर्थमावाह्य तोये च जप्त्वा मज्जनपूर्वतः ॥६२॥

तत्रैव, रुद्रयामले च[५]-

यत्र यत्र महाविद्या साधकैः समुपासिता।
तत्र तत्र त्रिकोणञ्च अधोमुखमुदीरितम् ॥६३॥
देवत्रिकोणे कर्त्तव्यं[६] उर्ध्वास्यं परिकीर्त्तितम्।

तत्र-

गङ्गे च यमुने चैव गोदावरि सरस्वतिः।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥६४॥

इत्यङ्कुशमुद्रया सूर्यमण्डलात्तीर्थमावाह्य[७] प्राणायामं कराङ्गषडङ्गे[८] विन्यस्य देवीरूपं विचिन्त्य आत्मानं तारामयं विभाव्य मूलं शीर्षे दशधा, हृदि दशधा, जले दशधा जप्त्वा त्रिकोणवृत्तं चतुरस्रं विलिख्य धेनुयोनिमत्स्याङ्कुशमुद्राः प्रदर्श्य सूर्य्याभिमुखं द्वादशधा वारि निक्षिप्य मूलेन मूर्द्धानं सप्तधाभिषिञ्चेत्। तत इष्टदेवताचरणान्निः[९]सृतजले उदङ्मुखः स्नायात्॥८॥

---

१. कर्तव्या
२. ततो
३. नास्तिपाठः
४. विलिख्य
५. च पाठो नास्ति।
६. कर्तव्ये
७. मण्डलात्
८. षड्ङ्गानि
९. चरणारविन्दनिसृत

तारार्णवादौ-

तीर्थमावाह्य तोये च प्राणायामषडङ्गकौ।
देवीरूपं जले ध्यायेदात्मानं तारिणीमयम्।।६५।।
शीर्षे हृदि जले जप्त्वा दशधा मूलमन्त्रकम्।
जले त्रिकोणवृत्तञ्च चतुरस्रं लिखेद् बुधः।।६६।।
अङ्कुशं धेनुमुद्राञ्च योनिं मत्स्यं प्रदर्शयेत्।
रवौ रविजलं दत्त्वा मूर्द्धानं सप्तधा सिञ्चेत्[1] ।।६७।।

।।इति स्नानम्।।

तथा च महाचीनमहानीलतारार्णवादौ-

प्रकुर्याद् वैदिकं स्नानं तान्त्रिकं तदनन्तरम्।
सन्ध्याञ्च वैदिकीं कृत्वा तान्त्रिकीं स्वयमाचरेत् ।।६८।।
जले त्रिकोणं संलिख्य तीर्थान्यावाहयेत्ततः।
तत्तेनाचमनं कृत्वा[2] वह्निजायान्तमन्त्रतः।।६९।।
कुशैः[3] समूलैरुदकं दद्याच्छीर्षे च साधकः।
ततश्च भूमौ दातव्यं सप्तधा साधकोत्तमः।।७०।।
वामहस्ते जलं नीत्वा चाच्छाद्य दक्षिणेन च।
मन्त्रं वारत्रयं जप्त्वा पञ्चवर्णान् जपेत्ततः।
क्षान्तं चन्द्रसमायुक्तं सप्तवर्णाद्यमेव च।।७१।।
वह्निबीजं पृथिव्याश्च वारुणं[4] तदनन्तरम्।
हँ यँ रँ लँ वँ इत्येकजटामन्त्रेऽघमर्षणमन्त्रकम्[5] ।।७२।।
मुद्रया स्नापयेच्छीर्षं[6] गलितोदकबिन्दुभिः।
मुद्रा तु तत्त्वमुद्रा स्यात् सन्ध्यायां कुलतर्पणे।।७३।।
तज्जलं दक्षहस्तेन वामनाडीं[7] प्ररोपयन्।
अस्त्रबीजेन मन्त्रेण पुरः पाषाणवज्रके।
तारयेत्[8] साधकः सर्वसिद्धये ज्ञानसिद्धये।।७४।।

---

१. सिचेत्
२. कुर्य्यात्
३. कुशेमूलेन जलं दद्यातथिरसि
४. वरुणं
५. प्यघ
६. मुद्रयातर्पयेत् शीर्षं
७. तदानीयदक्षहस्ते वामनाड़ी प्रपूरयन्।
८. ताडयेत्

कृष्णवर्णं जलं ध्यात्वा पापेन पुरुषेण च ।
नाडीनां क्षालनं कृत्वा देहस्य क्षालनन्तथा ।।७५।।
ततश्च तर्पयेद् देवीम् अमृतानन्दरूपिणीम्[1] ।
देवानृषींश्च पितृंश्च गुरुं परगुरुन्ततः ।।७६।।

परमगुरुन्ततः[2] इति द्विपाठः।

परापरगुरुञ्चैव[3] परमेष्ठिगुरुन्ततः ।
ततो मूलं समुच्चार्य देवीं तारां ततः परम् ।।७७।।
श्रीमदेकजटां पश्चात् तर्पयामि ततः परम् ।
प्रकाशशक्तियुक्ताय इदमर्घ्यमहं ददे ।।७८।।
मार्तण्डमण्डले ध्यात्वा ताराञ्चैकजटान्तथा ।
गायत्र्यार्घ्यं प्रदद्याच्च त्रयं कुसुमसंयुतम् ।।
गायत्रीञ्च ततो ध्यायेज्जपेद्विंशतिसंख्यकम् ।।७९।।

जलेऽधोमुखत्रिकोणं विलिख्य ॐ गङ्ग चेत्यादिना तीर्थमावाह्य योनिमुद्रां प्रदर्श्य। ॐ आत्मतत्त्वाय स्वाहा ॐ विद्यातत्त्वाय स्वाहा ॐ शिवतत्त्वाय स्वाहा। इत्याचम्य मूलेन कुशेन सप्तधा शीर्षे भूमौ[4] सप्तधा दत्त्वा वामहस्ते जलं नीत्वा दक्षहस्तेनाच्छाद्य तेजोरूपं जलं ध्यात्वा मूलं त्रिवारं तत्र जप्त्वा हं यं वं लं रं[5] इति त्रिरभिमन्त्र्य गलितोदकबिन्दुभिः तत्त्वमुद्रया मूर्द्धानं सप्तधाभ्युक्ष्य शेषजलं दक्षहस्तेनादाय इडयाकृष्य देहान्तः पापं प्रक्षाल्य तज्जलं कृष्णवर्णं ध्यात्वा वामकुक्षिस्थितपापपुरुषेण सह पुरःकल्पितवज्रशिलायां फडिति[6] ताडयेत्। ततो हस्तौ प्रक्षाल्य तारां स्मृत्वा एकैकाञ्जलिना ॐ देवांस्तर्पयामि ॐ ऋषींस्तर्पयामि ॐ पितॄन्तर्पयामि ॐ गुरून्तर्पयामि ॐ परमगुरून्तर्पयामि ॐ परापरगुरून्तर्पयामि ॐ परमेष्ठिगुरून्तर्पयामि। मूलमुच्चार्य देवीं तारां श्रीमदेकजटां तर्पयामि स्वाहा इति त्रिः।

---

१. नन्दीनीम्
२. अधिकपाठः
३. गुरुञ्चापि
४. दत्वा
५. हं यं र लं वं
६. फट इति
७. अधिकं पाठम्

ततो दूर्वाक्षतरक्तपुष्पसहितार्घ्यं गृहीत्वा[1] ॐ ह्रीं हं सः[2] श्रीसूर्याय प्रकाशशक्तिसहिताय इदमर्घ्यं ददे इति सूर्यार्घ्यं दत्वा सूर्यमण्डले देवीं ध्यात्वा गायत्री[3]-मुच्चार्य सूर्यमण्डलस्थायै तारादेव्यै श्रीमदेकजटायै इदमर्घ्यं नमः इति त्रिः। ततः कृताञ्जलिः-

ॐ प्रातराधारकमले हुतभुङ्मण्डलोपरि।
वाग्बीजरूपां विद्यां तां विद्युत्पटलभास्वराम्।।८०।।
पुष्पवालेक्षुकोदण्डपाशाङ्कुशलसत्कराम्।
स्वेच्छागृहीतवपुषीं गुरुविद्याक्षरात्मिकाम्।।८१।।
मध्याह्ने हृदयाम्भोजकर्णिका सूर्यमण्डले[4]।
कामबीजात्मिकां[5] देवीं अलक्तकरसारुणाम्।।८२।।
प्रसूनबाणपूर्णेक्षुचापपाशाङ्कुशान्विताम्।
परिस्मृतां[6] च मुख्याभिः षट्त्रिंशत्तत्त्वसेविताम्।।८३।।
सामयज्ञे[7] सरोजस्थे चन्द्रे चन्द्रसमद्युतिम्।
शक्तिबीजात्मिकां चापबाणपाशाङ्कुशान्विताम्।।८४।।
चिन्तयित्वा भगवतीं नित्याभिः परिवारिताम्।
युगनित्याक्षराकारां[8] घण्टिकावरसन्निभाम्[9]।।८५।।
तारासारमतं ध्यायेद् गायत्रीं तारकामनौ।
त्रिपुराया विशेषेण देव्याश्चैकजटामनौ।।८६।।

इति तारासारोक्तश्रवणात्। त्रिपुरसुन्दरीविशेषे[10] च गायत्र्या इदं ध्यानम्। तथा नीलसरस्वती[11]ताराद्याः।

तारायैः च पदं प्रोच्य विद्महे तदनन्तरम्।
महोग्रायै ततो दद्याद् धीमहीति ततः परम्।।
तन्नो देवीति चोच्चार्य ततो दद्यात् प्रचोदयात्।।८७।।

---

१. नीत्वा
२. ग्रीं
३. गायत्रीमूल
४. कर्णिके
५. कुलवीजात्मिकां
६. परितः स्वात्ममुख्याभिः
७. सायमाज्ञासरोजस्थ
८. कारं
९. झटिकावरणान्विताम् इति
१०. विषये
११. नील सरस्वत्युगतारयोः

इति तारानिगमादि-नानाग्रन्थसम्मता गायत्री जप्तव्या-

तत्र सामान्यादौ[1] जप्त्वा च दशधा साधकोत्तमः ।
विशेषिकां जपेद् विद्यां गायत्रीं सर्वसिद्धिदाम् ।।८८।।
शतं वा विंशतिं वापि यो जपेत् साधकाग्रणी ।
सर्वपापविनिर्मुक्तः स्वयं तारापुरे वसेत् ।।८९।।
गोघ्नश्चैव कृतघ्नश्च ब्रह्मस्त्रीघ्नश्च यो नरः ।
गुरुतल्परतो[2] वापि स्नुषायां[3] वा गतो यदि ।।९०।।
एतैः पापैर्विमुच्येते[4] सत्यं सत्यं सदाशिव ।
कुमारीगमनाद्दोषो न भूतो न भविष्यति।।९१।।
ततश्च मुच्यते लोको गायत्रीस्मरणादपि ।
गायत्र्या आगमोक्तायाः शतमात्रजपादपि।।९२।।
एतैः पापैर्विमुच्येत सत्यं सत्यं सुरेश्वर।
एतैः पापैर्विमुक्तेश्च[5] विशेषस्मरणादपि ।।
तस्मान्निगदिता विद्या जप्तव्या सिद्धिमिच्छता ।।९३।।
कूर्चबीजं समुद्धृत्य भगवत्येकजटे ततः।
विद्महे घोरदंष्ट्रे च धीमहीति ततः परम् ।।
तन्नस्तारे[6] ततो जप्त्वा ततो गद्यं प्रचोदयात् ।।९४।।

हुँ भगवत्येकजटे विद्महे घोरदंष्ट्रे धीमहि तन्नस्तारे प्रचोदयात् इति शतं विंशतिं वा जप्त्वा समाप्य मूलमष्टोत्तरशतं जपेत्।

गायत्रीं परिजप्याथ मूलमन्त्रं जपेन्न च।
सा सन्ध्या निष्फला ज्ञेयाप्यभिचाराय कल्प्यते ।।९५।।
प्रातःसन्ध्याविहीनश्च न च स्नानफलं लभेत्।
मध्याह्ने सन्ध्याहीनश्च न पूजाफलमाप्नुयात्।।९६।।
सायंसन्ध्याविहीनश्च जपविघ्नः सदा भवेत्।
तस्मात् सुन्दरि तत्त्वज्ञः सन्ध्यात्रयमुपाचरेत् ।।९७।।

---

१. समान्यमादौ
२. रतो
३. सुधायां
४. चेत
५. विमुच्येत
६. तत्व

प्रातर्न तर्पणं कार्यं न च सायं विशेषतः।
मध्याह्ने तर्पणं कृत्वा यथोक्तफलवान्[1] भवेत्।।९८।।
अर्घ्यहीना तु या सन्ध्या शोकदुःखप्रदामता।
अर्घ्यं त्रिसन्ध्यं देयञ्च अन्यथा निष्फलो जपः।।
समन्त्राणि[2] च गायत्री[3] सत्यं सत्यं वरानने।।९९।।

ततः संहारमुद्रया तत्तेजः स्वहृदये नयेत्[4] प्रणम्य च पूजाञ्चरेत्। इत्येवं[5] सन्ध्या श्रीमदेकजटाविषया इति।।



अथ तारादिसन्ध्याप्रकरणम्

अथोग्रतारासन्ध्या

मूलेन त्रिर्जलं देवतायै दत्त्वा वामहस्ते जलं पूर्ववदाच्छादनम्। जपाद्यघमर्षणं[6] च ततस्तथाचमनम्[7]। ततो मूलमुच्चार्य श्रीमदुग्रतारां देवीं तर्पयामि नमः इति त्रिः। इति गायत्र्या सूर्यमण्डलस्थायै श्रीमदुग्रतारायै इदमर्घ्यं नम इति त्रिः। ततो गायत्रीं ध्यायेत्।

मूलेन त्रिर्जलं दत्वा देवतायै वरानने।
ततो देव्याः प्रकर्तव्यमघमर्षणमुत्तम्।।१००।।
ततः स्तुत्याचमनं कुर्यात् ततः स्यादिष्टतर्पणम्।
अर्घ्यं दत्वा च गायत्र्या ध्यानं कुर्याच्च साधकः।।१०१।।
देवतातर्पणेनैव तुष्टाः स्युर्गुरुपङ्क्तयः।
शरीरेऽस्योस्ततो[8] देव्याः सन्ति शाश्वतराजसाः।।१०२।।
सर्वसाधारणञ्चात्र ध्यानं सर्वजयावहम्।
सर्वदेवमयी यस्मात् तारिणी त्रिगुणात्मिका।।१०३।।

---

१. भाग
२. मन्त्रस्यापि
३. गायत्र्याः
४. हृदयमानयेत्
५. इत्येका
६. जपाद्यघमर्षणं
७. चतुस्तत्वाचमनं
८. शरीरेचास्य ते देवाः सन्ति सात्वतराजसाः

अथ त्रिकालध्यानम्

प्रातः[१]–

उद्यद्भानुसहस्राभां　पुस्तकञ्चाक्षराम्बुजाम्।
कृष्णाजिनाम्बरीं[२]　ब्राह्मीं　ध्यायेत्तारकिताम्बरे[३]।।१०४।।

मध्याह्ने–

श्यामवर्णां　चतुर्बाहुं[४]　शङ्खचक्रलसत्कराम्।
गदापद्मधरां　देवीं　सूर्यासनकृताश्रयाम्।।१०५।।

सायम्–

सायाह्ने　वरदां　देवीं　गायत्रीं　संस्मरेत्ततः।
शुक्लां　शुक्लाम्बरधरां　वृषासनकृताश्रयाम् ।।१०६।।
त्रिनेत्रां वरदां पाशं शूलञ्च नृकरोटिकाम् ।
सूर्यमण्डलमध्यस्थां ध्यायन्[५] देवीं समभ्यसेत् ।।१०७।।
लज्जाबीजं　समुद्धृत्य　उग्रतारापदं ततः।
सम्बोधनान्तं　देवेशि　विद्महे　तदनन्तरम् ।।१०८।।
श्मशानवासिनि- पदं धीमहीति ततः परम्।
तन्नस्तारे[६] समुद्धृत्य प्रचोदयात् पदं ततः ।।
सम्बोधनान्तं देवेशि ततः स्यात्तु प्रचोदयात्[७] ।।१०९।।

(उग्रतारा-गायत्री)

द्रीं उग्रतारे विद्महे श्मशानवासिनि धीमहि तन्नस्तारे प्रचोदयात्। ततः सामान्यगायत्रीं दशधा जप्त्वा समाप्य विशेषगायत्रीम् अष्टोत्तरशतं जपेत्।।[८] ततः संहारमुद्रया तत्तेजः स्वहृदये[९] नयेत्। इत्युग्रतारासन्ध्या।

---

१. प्राते
२. जीनधरां
३. कित्तेऽम्बरे
४. हां
५. ध्यात्वा
६. तत्व
७. ततः स्यातु प्रचोदयात्।
८. जप्त्वा
९. स हृदयमानीय प्रणमेच्च।

अथ नीलसरस्वतीसन्ध्या

मूलेन जलं संशोध्य सूर्याभिमुखं पञ्चधा जप्त्वा जलञ्च पञ्च[1] दत्वा ॐ ह्रीं[2] स्वाहा इत्याचम्य कृताञ्जलिः।

ॐ श्मशानालयमध्यस्थां चतुर्वर्गप्रदायिनीम् ।
महामेघप्रभां देवीं नीलपद्मे विराजिताम् ।।
सर्वाभरणशोभाढ्यां लोचनं हरनेत्रतः ।।११०।।

इति पठित्वा जले षट्कोणं विलिख्य तीर्थमावाह्य तत्त्वाचमनं कृत्वा मूलेन त्रिर्जलं भूमौ दत्वा इत्यघमर्षणपर्यन्तं ततश्चैकजटावत्तर्पणम्।

अर्घ्यञ्च-

जलंमूलेन संशोध्य पञ्चधा मूलमन्त्रकम् ।
पञ्चवारं जलं दत्वा पूजावच्चाचमनञ्चरेत् ।।१११।।
सूर्यस्य[3] मण्डलं देवीं ध्यात्वा तत्वाचमनञ्चरेत्।
ततश्चैकजटावच्च सन्ध्यां कुर्यात्तु[4] साधकः ।।११२।।

अर्घ्ये तु । गायत्र्या सूर्यमण्डलस्थायै तारादेव्यै श्रीनीलसरस्वत्यै इदमर्घ्यं स्वाहा। इति त्रिः।। ततो ध्यानम् ।। प्रातः।

सूर्यमण्डलसंलक्ष्मां[5] मुक्ताहारविशोभिताम्[6] ।
द्विनेत्रां[7] द्विभुजां देवीं चतुर्वक्त्रां सरोजजाम् ।।११३।।
मध्याह्ने विष्णुरूपाञ्च चतुर्हस्ताञ्च भैरवीम्[8] ।
मुक्तामाणिक्यमुक्ताभिर्नानाहारादिशोभिताम् ।।
मन्त्रसिद्धिप्रदां देवीं गायत्रीं साधकाग्रणीः[9] ।।११४।।
सायाह्ने सूर्यसंस्थाञ्च[10] पञ्चवक्त्रां त्रिलोचनाम्।
माहेश्वरीं जगद्धात्रीं जगज्जङ्गमपालिकाम् ।।११५।।

---

१. पञ्चधा
२. द्रीं।
३. सूर्यमण्डले
४. सु
५. संलक्ष्यं
६. विभूषिताम्
७. त्रिनेत्रां
८. वैष्णवीं
९. ग्रणी
१०. थानां

अथ गायत्रीमन्त्रं यथा–

ॐ नीलसरस्वत्यै धीमहि शारदायै विद्महे तन्नः शिवे प्रचोदयात्।।

तारं पूर्वं समुद्धृत्य[1] नीलसरस्वतीपदम्।
धीमहि प्रथमं योज्य शारदायै च विद्महे।।
तन्नः शिवे पदञ्चोक्त्वा ततो दद्यात् प्रचोदयात्।।११६।।

ततः सर्वमेकजटावत्। तारार्णवे महाचीने विशेषतः।।

स्त्रीणाञ्चापि च शूद्राणां ब्राह्मणानां पृथक् पृथक्।
ब्राह्मणेन प्रकर्तव्यं यद् यद् उक्तं हि पुस्तके।।११७।।
अन्यथा निष्फलं विद्यात् सर्वा पूजादिका क्रिया।
प्रातःकृत्यं तथा स्नानं[3] तथा सन्ध्यात्रयं शिव।।११८।।
स्त्रीशूद्रयोस्तारमन्त्रे लज्जाबीजं प्रकीर्त्तितम्।
वह्निजायामनुर्यत्र नमस्तत्र प्रकीर्त्तितम्[4]।।
सर्वत्र पूजाहोमादौ विशेषो ज्ञेयो विधिः।।११९।।

।।इति नीलसरस्वती[5]-सन्ध्या।।



अथ बीजकोशप्रकरणम्

ततो देव्या मनुं वक्ष्ये तारायाश्च सदाशिव।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः।।१२०।।

अथ बीजकोषो[6] महानीलतारानिगमादौ।

ब्रह्मा पृथ्वी वामनेत्रं चन्द्रविन्दुसमन्वितम्।
कामबीजं समाख्यातं[7] त्रैलोक्यजयदायकम्।।१२१।।
क्षान्तरेफसमायुक्तं वामनेत्रं सचन्द्रकम्।
लज्जाबीजमिति ख्यातं सर्वसिद्धिप्रदायकम्।।१२२।।

---

१. समुच्चार्य
२. ब्राह्मणानां
३. कृत्यस्तथाकुर्य्यात्
४. तः
५. वाणी
६. कोषः
७. मिति

षष्ठस्वरसमोपेतं हकारं चन्द्रखण्डकम् ।
कूर्चबीजमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ।।१२३।।
पवर्गस्य द्वितीयञ्च टवर्गस्याद्यमेव च।
सर्वरक्षाकरं मन्त्रं[1] अस्त्रबीजं प्रकीर्त्तितम् ।।१२४।।
चन्द्रखण्डसमोपेतं द्वादशस्वरमीरितम् ।
वाग्भवं तच्च विज्ञेयं वाचः[2] सिद्धिप्रदायकम् ।।१२५।।
त्रयोदशस्वरं देवि चन्द्रखण्डविभूषितम्।
तारं प्रणवमित्युक्तं ब्रह्मविष्णुशिवात्मकम् ।।१२६।।
पञ्चमस्वरसंयुक्तं[3] हकारं ब्रह्मबीजकम् ।
जलेऽग्निर्विन्दुसंयुक्तं चतुर्दशस्वरान्वितम् ।।१२७।।
अङ्कुशं बीजमाख्यातं त्रैलोक्यं शुभभावकम्[4] ।
नादिभान्तं[5] विसर्गान्तं हृद्बीजं परिकीर्त्तितम्।।१२८।।
हान्तं यस्य चतुर्थञ्च द्वितीयस्वरसंयुतम् ।
तदान्त्यञ्च[6] हकारञ्च वह्निजाया प्रकीर्त्तितम् ।।१२९।।
ब्रह्माग्निर्वामनेत्रान्तं द्विजराजसमन्वितम् ।
वधूबीजमिति ख्यातं वधूरिव यशस्विनी ।।१३०।।
बालस्त्वं वल्लभस्त्वञ्च दासत्वं गुरुरेव च ।
माता न गोपयेद् वाक्यं बालकेभ्यः कदाचन ।।१३१।।
तस्मात्तत् पृच्छतां[7] नाथ यद्यहं[8] देवदुर्लभम् ।
तारामन्त्रं महादेव वसुसिद्धिप्रदायकम्।।१३२।।
काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च मातङ्गी कमलात्मिका।।१३३।।
धूमावती च बगला महाविद्याः प्रकीर्त्तिताः।
एतासां श्रवणादेव सर्वसिद्धीश्वरो भवेत्।।१३४।।

---

१. बीजं
२. वाचां
३. पञ्चस्वरमायुक्तं
४. कारकं
५. मान्तं
६. तदाढ्यञ्च।
७. पृच्छतो
८. गद्येहं

विष्णुविद्या देवविद्या शिवविद्या विभेदतः।
शक्तिविद्याप्रकारेण लोके[१] विद्या बहु स्मृताः ॥१३५॥
सत्यादौ त्रियुगान्तञ्च विद्या जागर्त्ति एव च।
कलौ जागर्त्ति काली च[२] कलौ जागर्त्ति पन्नगी ॥१३६॥
कलौ काली कलौ कृष्णः कलौ गोपालकालिका।
कालीतारा महाविद्या महासिद्धिप्रदायिनी ॥१३७॥
महाविद्यासु सर्वासु कलौ सिद्धिरनुत्तमा।
सर्वविद्यामयी[३] देवि कलौ सिद्धिरनुत्तमा ॥१३८॥
कालिका तारका विद्या सर्वाम्नायैर्नमस्कृता।
तयोर्यजनमात्रेण सिद्धः[४] साक्षात् सदाशिवः ॥१३९॥
यथा काली तथा तारा तथा नीलसरस्वती।
सर्वाभीष्टफलप्रदा[५] तथा त्रिपुरसुन्दरी ॥१४०॥
अभेदमतमास्थाय यः कश्चित् साधयेन्नरः।
त्रिलोके स तु सम्पूज्यः[६] स्यात्तारासुत एव सः[७] ॥१४१॥
भेदं कृत्वा यदा मन्त्री साधयेदत्र साधनम्।
न तस्य निष्कृतिर्देवि निरये पच्यते[८] हि सः ॥१४२॥
एतासां साधनेनैव प्रायशो नास्ति नित्यशः।
केवलां भक्तिमास्थाय चतुर्वर्गं लभेत् करे ॥१४३॥
त्रिपुरा च महाविद्या बहुसाधनसिद्धिदा।
यस्याः प्रसादमात्रेण भोगो मोक्षश्च जायते ॥१४४॥
कालिका तारका विद्या कलौ सिद्धिसमृद्धिदा।
दुःखं विना प्रसीदेतां कलौ जागरणात्मिके[९] ॥१४५॥

---

१. लोक
२. च नास्ति।
३. पाठ मधिकं आस्ति।
४. सिद्धी
५. सर्वाभिष्टप्रदविी
६. पूज्यः
७. तारका
८. पठ्यति
९. त्मिके

न वा प्रयोग[1]बाहुल्यं न्यासजालादिकं न च ।
न तत्र[2] पश्चाचारः स्यात्तस्मात्तत्साधनं शुभम् ।।१४६।।
कालिकासाधनं देवि मत्कृते कालिकार्चने[3] ।
राजते तद्धि तत्रैव प्रबुध्य[4] साधनञ्चरेत् ।।१४७।।
अस्या मूर्त्तिर्द्वितीया या सृष्टिमूले व्यवस्थिता ।
साधनञ्चात्र तस्याश्च सर्वसिद्धिप्रदायकम् ।।१४८।।
धनं धान्यं (सुतं) जायां भोगं मोक्षन्तथैव च ।
अचिराल्लभते[5] वाणीं यस्या चस्मरणमात्रतः ।।१४९।।
नाधीत्य च्छन्दःशास्त्राणि विनालापं कवेरपि ।
गद्यपद्यमयी वाणी वक्त्रे तस्य प्रजायते ।।१५०।
अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा ।
अदर्शनं स्थौल्यरूपं वह्निस्तम्भं जलस्य च ।।१५१।।
चन्द्रसूर्याग्निभूतानां स्तम्भको विभुरेव सः ।
मन्त्रसिद्धिस्तथा सिद्धिः[6] पुराणागमसिद्धिभाक् ।।१५२।।
उपचारविशेषेण राजपत्नीं वशं नयेत् ।
चतुःषष्टिप्रकारेण सिद्धिराकाशगामिनी ।।१५३।।
पञ्चशून्ये स्थिता तारा सर्वान्ते कालिका स्थिता ।
सिद्धयः सन्ति यत्रापि तदानीय प्रदीयते ।।१५४।।
यदि साधयितुं देवि शक्तये[7] तारकाकुले ।
तदा सिद्धिमवाप्नोति सर्वदा कुलमण्डले ।।
कुलाचारविहीनस्य न सिद्धिर्न च सद्गतिः ।।१५५।।
ब्रह्मघ्नश्च कृतघ्नश्च गुरुयोषागतश्च यः ।
कन्यागतः स्नुषागश्च ब्राह्मणीगो गयवीगतः ।।१५६।।
हिंसावान् सर्वजन्तूनां ब्राह्मणानां विशेषतः ।

---

१. प्रयास
२. चात्र
३. कालिकार्चना
४. प्रबुद्धा
५. अचलां
६. ऋद्धिः।
७. सत्यते

पृथिव्यां रेतसां पातः शिवपूजाबहिर्मुखः।
शृणु वत्स महादेव महापातकिने त्विमे ।।१५७।।
एतेभ्यो मुच्यते देव[1] तारामन्त्र युतोयदि।
सर्वपापैर्विनिर्मुक्तः[2] सर्वपापयुतोऽपि सः ।।१५८।।
कुलदीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्वप्रयत्नेन ताराया देशिको नरः ।।१५९।।
कुलाचारविहीनश्चेत् सर्वपापैरवाप्यते।
कुलाचाररतो यस्तु[3] तर्पयेत् कुलदेवताम्[4] ।।१६०।।
नित्यं श्रीतारकां देवीं तस्य सिद्धिः करेस्थिता।
आचारज्ञानवान् यश्च क्रियते न कुलक्रियाः ।।१६१।।
पच्यते नरके घोरे कल्पकोटिशतैरपि।
परदाररतो यश्च चक्रमध्ये भवेन्नरः ।।१६२।।
शुनीविष्ठाक्रिमिर्भूत्वा तिष्ठेत् कल्पायुतं भुवि।
साधनञ्च समासाद्य परयोषारतो भवेत् ।।१६३।।
मातुर्योनिं परित्यज्य विहरेत् सर्वयोनिषु।
निर्विकारो निर्विकल्पो भवेत् साधकसत्तमः।।१६४।।
मातृपदं सप्तमातृपरम्। इति
सद्गुरुसिद्धानन्दगिरिर्ज्ञानवान्। तारानिगमादिदर्शनात्।
शक्यते यस्तु[5] वै दातुं स्वयोषां भक्तवत्सल।
तदा योषां समानीय ह्यन्येषां साधयेद्ध्रुवम् ।।१६५।।
स एव साधकश्रेष्ठो निर्विकल्पाय[6] निश्चयम्।
साधकेभ्यः प्रदीयेत तदान्यां परिगृह्यते ।।१६६।।
न दातुं शक्यते यस्तु स्वयोषां देववत्सल[7]।
नटीशतं समानीय साधयेच्छक्तिसाधनम् ।।१६७।।

---

१. देवी
२. पाप
३. यश्च
४. पर
५. यदि
६. निर्विकल्पोमनः स्त्रयम्
७. भक्त

स्वयोषा दीयते यस्तु चक्रमध्ये तु[1] साधकः।
गुरुभ्यः साधकेभ्यश्च तस्य शीर्षे वसाम्यहम्॥
सर्वसिद्धिस्तस्य देव चक्षुषोस्तस्य गोचरा[2]॥१६८॥
(इत्यादि तारानिगमादिचीनान्तम्)
॥इति प्रथमपटले बीजकोषप्रकरणं समाप्तम्॥

◆◆◆

अथ विद्यानिरूपणप्रकरणम्

अथ विद्या वक्ष्यते

तारकत्वात् सदा तारा तस्याभेदविभेदतः।
आद्याकल्पे[3] मुक्तकेशी रुद्रस्तत्र जटा स्वयम्॥१६९॥
अस्माच्चैक[4]जटा प्रोक्ता मन्त्रश्चान्यो निरूप्यते।
वशिष्ठाराधिता विद्या न तु शीघ्रफला[5] यतः॥१७०॥
अतस्तेनापि मुनिना शापो दत्तः सुदारुणः।
ततः प्रभृति विद्येयं फलदात्री न कस्यचित्॥
तत्तदुद्घाटितं तेन शिवेन गुरुणा स्वयम्॥१७१॥
लज्जाबीजं वधूबीजं कूर्चबीजमतः परम्।
अस्त्रान्तमनुना ख्यातं[6] पञ्चरश्मिस्वरूपकम्॥१७२॥
इति चैकजटा विद्या सर्वशास्त्रेषु गोपिता।
सर्वशास्त्रगोचरा च कामिनी सिद्धिदायिनी॥१७३॥
महापातकलक्षेण लक्षितो यदि च मानवः[7]।
एतस्य श्रवणाद्देवि जीवन्मुक्तो भवेद्ध्रुवम्॥१७४॥
श्रीतारा नैव दातव्या भूमिस्वर्गरसातले।
यदि प्रदीयते देवि निरये पच्यते ध्रुवम्॥१७५॥

---

१. सु
२. गोचरः
३. कल्प
४. तस्मा
५. सायो दत्तः सदारुणः
६. अधिकपाठम्
७. व्याख्यातं
८. मानुषः

ज्येष्ठपुत्राय शान्ताय स्वरूपज्ञानशालिने।
शूद्रोऽपि यदि मोहेन आराधयति श्रीयुताम्।।१७६।।
तारकाद्यां महाविद्यां पतनन्तु[1] सुनिश्चितम्।
स्त्रीणाञ्चापि वरारोहे निषिद्धं सर्वदैव हि।।१७७।।

आदौ स्त्री एकजटा उद्घाटिता, ततः श्रीतारा नोक्ता, सर्वत्र दोषश्रवणात्, स्वीयमर्मवशाच्च।[2]

श्रीबीजाद्या यदा विद्या तदा श्रीः सर्वतोमुखी।
वाग्भवाद्या यदा विद्या वागीशत्वप्रदायिनी।।
पञ्चरश्मिमहाविद्या लभ्यते यदि भाग्यतः।
तस्य भोगश्च मोक्षश्च करस्थ एव शङ्कर।।१७८।।

इत्येकजटादेव्याः शक्तिसिद्धिमन्त्रः।

लज्जाद्या चापरा चासौ भोगमोक्षप्रदायिका।
सार्द्धपञ्चाक्षरं मन्त्रं महासिद्धिप्रदायकम्।।१७९।।

एतस्या गायत्री–

तारायै विद्महे मोक्षदायै[3] धीमहि तन्नो नीले प्रचोदयात्।

इति तारामन्त्रं गायत्री च।

कामाख्या चापरा विद्या कामतारा प्रकीर्त्तिता।
भोगमोक्षप्रदा[4] देवी सर्वशास्त्रे प्रपूजिता।।१८०।।

इति कामाख्यामन्त्रः।

अस्या गायत्री तत्रैव–

कामाख्यायै विद्महे कुलकौलिन्यै धीमहि तन्नः श्यामे प्रचोदयात्।

इति एकजटाभेदः।



---

१. पतनं तस्य
२. स्वीयमर्मरतत्वात्
३. सिद्धिदात्रै
४. भोगदामोक्षदा देवी

अथ उग्रताराप्रकरणम्

कूर्चाद्या पञ्चरश्मिर्या विद्या ख्याता महीतले ।
उग्रतारा समाख्याता स्वर्गे मर्त्ये रसातले ।।१८१।।
अस्यास्तु स्मरणात् सद्यः सर्वपापैः प्रमुच्यते ।
भोगमोक्षप्रदा देवी सर्वतन्त्रेषु पूजिता ।।१८२।।

ह्रीं स्त्रीं हूँ फट् अस्या गायत्री तत्रैव। उग्रतारे धीमहि सिद्धिसारे विद्महे तन्नो नीले प्रचोदयात्। इत्युग्रतारागायत्री-मन्त्रौ।

वधूलज्जा ततः कूर्चं अस्त्रान्तोऽयं महामनुः।
शम्भुपत्नी समाख्याता सर्वतन्त्रेषु गोपिता।।१८३।।

स्त्रीं ह्रीं हूँ फट् अस्या गायत्री तत्रैव। ॐ शम्भुपत्न्यै विद्महे महोग्रायै धीमहि तन्नस्तारे प्रचोदयात्। इति महोग्रतारा गायत्री मन्त्रौ।

आदौ कूर्चं ततो लज्जा वधूबीजमतः परम्।
फडन्तश्च महामन्त्रः सर्वतन्त्रशुभावहः।।
महाकालप्रिया देवी भोगमोक्ष प्रदायिनी।।१८४।।

हूँ ह्रीं स्त्रीं फट्[1]। एतस्या गायत्री। ॐ तारकायै विद्महे महाकालप्रियायै धीमहि तन्नः शक्तिः प्रचोदयात्।

।इति महाकालप्रियागायत्री-मन्त्रौ[2]।



अथ नीलसरस्वतिप्रकरणम्ः

ताराधिकजटामन्त्रो नीलवाण्याः प्रकीर्त्तितः[3]।
यस्यास्तु[4] स्मरणात् सद्यो वागीशत्वं लभेद्ध्रुवम् ।।१८५।।

अस्या गायत्री। ॐ नीलसरस्वत्यै धीमहि श्रीतारायै विद्महे तन्नो देवि प्रचोदयात्।।

वाग्भवाद्या चैकजटा महानीलसरस्वती।
अस्याश्च स्मरणात् सद्यः सर्वसिद्धीश्वरो भवेत्।।१८६।।

अस्या गायत्री तृतीयसन्ध्यायां लिखिता उग्रतारासन्ध्यायां या गायत्री श्रुता सा कुल्लुकाविद्यायाः।

---

१. इत्यधिकं पाठम्
२. मन्त्रश्च
३. प्रकीर्चिता
४. अस्या

अथ कुल्लुकाप्रकरणम्

सा कुल्लुका[1] विद्या मन्त्रस्तु सर्वत्र प्रयोगे पद्मावती च।

लज्जावधूकूर्चबीजं प्रयोगे सिद्धिदायकम्।
कुल्लुकेयं समाख्याता सर्वतन्त्रेषु गोपिता ।।१८७।।
प्रणवं पूर्वमुद्धृत्य पद्मे पद्मे पदं ततः ।
महापद्मे पदं प्रोच्य पद्मावतीपदं ततः ।।
माये स्वाहा महामन्त्रः प्रयोगे सिद्धिदायकः ।।१८८।।

अत्र शास्त्रे[2] माये इति श्रवणाल्लज्जाबीजद्वयम्। अत्र ये सम्बोधनान्तं माया-शब्दं वदन्ति ते म्लेच्छाः[3]।

तारानिगमे पद्मावतीप्रकरणे च[4]–

तारं पद्मे च पद्मे च महापद्मे ततः परम् ।
पद्मावती ततो लज्जाद्वयं स्वाहा[5] ततो मनुः ।।१८९।।
तारकत्वात् सदा तारा या काली सैव निश्चिता ।
बहवोऽस्याश्च मन्त्राः स्युः सर्वतन्त्रागमादिषु[6] ।।१९०।।
शक्तिसिद्धा[7] महाविद्याः सारात्सारतराः स्मृताः ।
अष्टौ[8] विद्यासमो नास्ति भूतले सिद्धिदो मनुः ।।१९१।।
एतेषां[9] सर्वमन्त्राणां देवतास्त्रितयाः स्मृताः ।
आद्या चैकजटा प्रोक्ता द्वितीया चोग्रतारका ।
तृतीया नीलवाणी स्याद् भोगमोक्षप्रदा मता ।।१९२।।

तत्र एकजटामन्त्रोद्धारादेकलक्षणं लिखितं संक्षेपः।

उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता ।
नीलया[10] वाक्प्रदा यस्मात्तस्मान्नीलसरस्वती ।।१९३।।

---

१. कुल्लुका महाविद्या
२. महामाये श्रवणात् लज्जाद्वयम्
३. मूढा।
४. च अधिकम्
५. स्वाहान्तको
६. गमेषु च
७. विद्या
८. अष्ट
९. एतासां
१०. लीलया वाक्प्रदा यस्मातत्तेन नीलसरस्वती

अत्र लकारपाठस्तु न। तदा नीलसरस्वतीति भवति। नीला नीलाचारक्रमेण वाक्यदा इत्यर्थः।

अतोऽन्यथा भ्रान्ता वदन्ति।

एतेषामष्टमन्त्राणां[1] ऋषिच्छन्दादिसाधकः।
शृणु चात्र प्रवक्ष्यामि रहस्ये मम सम्मते[2] ।।१९४।।
नीलाचारादिकं दृष्ट्वा पुरश्चरणमेव च।
प्रत्येकञ्च प्रवक्ष्यामि अष्टमन्त्रञ्च[3] तारके ।।१९५।।
अक्षोभ्योऽस्य ऋषिः प्रोक्तो बृहतीच्छन्द एव च।
बीजं लज्जामनुः प्रोक्तं शक्तिः कूर्चमितीरितम् ।।१९६।।
कीलकं निजबीजञ्च वधूबीजं सुसिद्धकम्[4]।
लक्षसंख्या[5] जपेन्मन्त्रं फलमूलाशने रतः।
नक्तं ताम्बूलपूर्णास्यः शक्तिसङ्गः कुले रतः ।।१९८।।

एतद् वचनानुसाराद्येऽप्यन्यद्वदन्ति तन्न तत्र[6] शिवेन ब्रह्मानन्तरं प्रपञ्चितम्।

नीलपद्मैश्च जुहुयान्मधुरेण त्रयेण च।
आद्यामन्ते तद्भेदे च सर्ववर्णेष्वयं विधिः ।।१९९।।
उग्रतारामनौ वत्सविधिरेव[7] न संशयः।
लक्षद्वयञ्च तद्भेदे पुरश्चरणकर्मसु ।।२००।।
नीलवाणी नीलकल्पे मन्त्रभेदसमन्विते।
लक्षद्वयं जपेन्मन्त्रं[8] तदा सिद्धिरनुत्तमा ।।२०१।।

तारानिगमे-

सर्वतारासु विद्यासु पुरश्चरणकर्मसु।
जुहुयान्नीलपद्मैश्च बिल्वपत्रैरभावतः ।।२०२।।
ऋषिच्छन्दस्तथा बीजं शक्तिः कीलकमेव च।
सर्वत्रैव समं विद्धि आख्यामन्त्रविभेदतः।।२०३।।

---

१. एतासां
२. सम्मतिः
३. मन्त्रे च
४. सुसिद्धिदम्
५. सख्यं
६. तन्त्र अधिकं पाठम्
७. विधिरेष
८. जपेन्मन्त्रं

एतासां निगमागमसाधारणग्रन्थमते-एत देव मयानिरूपितम्।
तत्र ब्रह्मानन्दवचः।

जपमन्त्रे च ताराया: साधने शक्तिजं कुलम्[1] ।
वीरभावरहस्योक्तं त्यक्त्वा[2]साकारमाप्नुयात् ।।२०४।।
अत्रास्ते[3] कमला कृताञ्जलिपरा वीणाधरा शारदा।
तारावाक्यमनुस्मरन् प्रियतमाञ्ञामावचः[4] कारणम्।।

ब्रह्मानन्दकृतौ सुसाधनविधौ ताराहस्ये शुभे सृष्ट्यादौ वर्णनपरो आदिमोपटलः गतः।।

।।इति ताराहस्यतन्त्रे प्रथमपटलः समाप्ततामगमत्।।१।।



१. भक्तिसङ्कुलः
२. त्तक्त्वाबान्धकारमाप्नुयात्
३. यत्रास्ते
४. प्रियतमञ्चोमावचः कारणम्

अथ द्वितीयः पटलः

अथ तारादीक्षा-प्रकरणम्

तारानिगमादौ कामाख्यामूले च-

कालीतारामन्त्रदाने चक्रचिन्तां करोति यः।
आयुर्विद्यामोक्षबाधः शूनीविष्ठाक्रिमिर्भवेत् ।।१।।
यदि भाग्यवशान्नाथ ताराविद्या प्रलभ्यते।
इच्छासिद्धिर्भवेत्तस्य किं मोक्षश्चाष्टसिद्धये[१] ।।२।।
यदि मन्त्रे गुरुः साक्षात् सर्वतन्त्रे स्वयं हरः।
न दद्यात् तारकां विद्यां दातुं नैव वदेत् क्वचित् ।।३।।
यदि भाग्यवशाद् वत्स कोटिजन्मतपोबलात्।
प्रलभ्य तारकाविद्यां स भवेत् कल्पपादपः।।४।।
गोपनीयो[३] गोपनीयस्तारामन्त्रः सदाशिवः।
यन्त्रं मन्त्रश्च पटलं स्तोत्रं कवचमेव च ।।५।।
रहस्यं गुह्यषोढाञ्च तारानिगममेव च ।
गोपनीयं प्रयत्नेन तारानाम प्रकाशयेत् ।।६।।
कुलकर्मरतो यस्तु सत्त्वभावविवर्जितः।
मन्त्रे तन्त्रे गुरौ विप्रे लतायां वीरभावतः।।७।।
एतादृशाय कौलाय शठाय[४] न कदाचन।
यो ददाति वरन्तस्मै[५] दातारञ्च शिवाज्ञया ।।८।।

---

१. सुसाधन शुभश्चाद्यः सुसिद्धाकरः।
२. सिद्धयः
३. गोपनीयं गोपनीयं तारा मन्त्रं सदा शिव
४. पशवे
५. शिवस्तस्मै दातव्यञ्च

अर्थलोभी कामलोभी[1] कर्मलोभी[2] नरः क्वचित्।
ददाति यदि देवेशि निरये पतति ध्रुवम् ।।९।।
शिवहा त्रिषु[3] लोकेषु शक्तिहा ब्रह्महा भवेत् ।
स एव भ्रष्टः कौलेषु कोऽन्यो भ्रष्टो महीतले ।।१०।।
कुलीनाय महेच्छाय श्रद्धाभक्तिपराय च।
कौलसेवायुतायापि शक्तिसेवारताय च ।।११।।
ताराभक्ताय शिष्टाय सदानन्दाय शूलधृक् ।
एतेभ्यश्च प्रदातव्यं ह्यन्यथा मृत्युमाप्नुयात् ।।१२।।
सद्गुरुं लक्षणाक्रान्तं स्वयं लक्षणसंयुता ।
प्राप्य दीक्षा प्रकर्त्तव्या ह्यन्यथा निष्फला क्रिया ।।१३।।
बिल्वमूले श्मशाने वा पर्वते वा नदीतटे ।
गुरुगेहे महापीठे सिद्धिपीठे शिवालये ।।१४।।
एकलिङ्गे तडागे वा वृषशून्यशिवालये[1]।
दीक्षां कुर्यात् सदा मन्त्री जपञ्चापि समाचरेत् ।।१५।।
पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्षते ।
तच्चैकलिङ्गमाख्यातं[2] मन्त्रसिद्धिप्रदायकम् ।।१६।।
यदि भाग्यवशाद्देवि ! गङ्गातीरं प्रलभ्यते ।
तत्र चेत् क्रियते दीक्षा कोटि-कोटि गुणायते ।।१७।।

(निषिद्धदीक्षा)

मातुर्दीक्षां पितुर्दीक्षां दीक्षां मातामहस्य च।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च।।१८।।
दीक्षातृतीयदिवसे कृत्वा क्षौरादिकं शुभम्।

---

१. कर्म
२. काम
३. शिवहा च त्रिलोके च
१. वेश्यागेहे शिवालये (वृषशून्यपुरातनशिवालये इत्यर्थः)
२. तस्यैक

हविष्यं तद्दिने कार्यमुपवासं परेऽहनि।
गुरोराज्ञां समादाय स्वयं पुष्पादिकञ्चरेत् ।।१९।।
पञ्चघटाश्च संस्थाप्य तत्र देवान् प्रपूजयेत्।
प्रथमे गणनाथञ्च द्वितीये च सदाशिवम्।।२०।।
तृतीये सुन्दरीं देवीं चतुर्थे परदेवताम्।
पञ्चमे सर्वदेवांश्च सर्वजिद्गुरुसत्तमः[1]।।२१।।
स्वस्तिवाच्यं ततः कुर्यात् सङ्कल्पं विधिपूर्वकम्।
गोमेदो वज्रविद्रुमौ सूर्यकान्तो विदूरजः ।।२२।।
पद्मरागं मरकतं नीलञ्चेति नरो विदुः।
ततो मूलं[2] सहस्रञ्च प्रजपेत् सद्गुरुः स्वयम् ।।२३।।
कण्ठन्यासं[3] ततः कृत्वा तत्त्वन्यासं ततः परम्।
पुष्पाद्यलङ्कृतं शिष्यं चन्दनेन प्रलेपयेत्।।२४।।
शिष्यशीर्षे[4] ततो हस्तं दत्त्वा चाष्टोत्तरं शतम्।
जपेन्मन्त्रं गुरुश्रेष्ठः कपोले मूलमुच्चरन्।।२५।।
ऋषिच्छन्दः कीलकञ्च शक्तिबीजमतः परम्।
एकदा दक्षिणे कर्णे गायत्रीञ्च त्रिधा जपेत्।।२६।।
ततो मन्त्रं प्रवक्तव्यं स्त्रीदीक्षा[5] वामतः सकृत्।
एष विधिर्द्विजातीनां स्त्री शूद्राणाञ्च वामतः ।।२७।।
ततः प्रणमेद् देवीं श्रीगुरुं सर्वलक्षणम्।
स्वयं जप्त्वा ततो मन्त्रं दक्षिणादीन्समाचरेत्।।
तारामन्त्रेषु सर्वेषु एषा दीक्षा प्रकीर्त्तिता।।२८।।

---

१. साधयेत्
२. तत्र
३. कलान्यासं
४. ततो रत्नस्थकुम्भस्थैस्तोयैः शिष्यं प्रसिच्य च।
५. कर्णे दक्षिणसम्भवे

अथ शिवलिङ्गार्चनप्रकरणम्

शिवस्य पूजनं कार्यं पार्थिवस्य न चान्यथा।
सामान्यार्घ्यं प्रकर्त्तव्यम् आसनादीन् विशेषतः[१] ।।२९।।
योनिपीठात् विष्णुपीठं लिङ्गाग्रतुल्यमूल्यकम्[२]।
योन्यधः शेषपर्यन्तं त्रिसूत्रीकरणन्त्विदम् ।।३०।।
न पूजयेत् पार्थिवं यः शिवलिङ्गं सुरेश्वरि।
नान्यपूजाफलं तस्य चाण्डालत्वं प्रजायते ।।३१।।
देवध्यानं ततः कृत्वा पुष्पं शीर्षे प्रदापयेत्।
प्रणवस्य च पाशस्य कलासङ्ख्यकलापतः ।।३२।।
विश्वं देहं शोधयित्वा भूतशुद्धिं समाचरेत् ।
स्वनाभौ दक्षिणं[३] पाणिं वामे पाणौ विधाय च ।।३३।।
चतुर्विंशतितत्त्वेन सार्द्धं जीवस्य तोलनम्।
प्रदीपकलिकाकारं सर्वतेजोमयं विभुम् ।।३४।।
विभेद्यमखिलं चक्रं परं ब्रह्मणि योजयेत् ।
मूलाधाराग्निशिखया[४] सर्वं देहं विदाहयेत् ।।३५।।
सर्वरूपं शरीरञ्च पापेन पुरुषेण च।
दक्षनासापुटं धृत्वा कलासङ्ख्यं जपेच्च यम् ।।३६।।
पूरयित्वा ततो वायुं चतुःषष्टिजपेन च।
कुम्भयेत् परमं वायुं ततो[५] द्वात्रिंशतं जपेत् ।।३७।।
रचयेद्वामतो[६] वायुं लिङ्गदेहं विनाशयेत्।
वह्निबीजजपाद् देवि पूर्वसङ्ख्याविभेदतः ।।
सर्वं भस्ममयं ध्यात्वा ततो भस्मविरेचनम् ।।३८।।
पृथ्वीबीजं ततो जप्त्वा कलया प्लावयेत्तनुम् ।
महाविष्णुः स्वयं साक्षादित्येवं ज्ञानसङ्कुलः ।।३९।।

---

१. विशोधयेत्
२. तस्य मूलकम्
३. दक्षिणे पाणौ
४. धारोत्थ
५. लिङ्गदेहं विनाशयेत्
६. अधिकं पाठम्

पुनश्च चन्द्रबीजेन चतुःषष्टिजपेन च।
स्थिरीकृत्य निजं देहं कुम्भयेद्वायुमण्डलम् ।।४०।।
वरुणं[१] द्वात्रिंशज्जपेन अमृतेन विरेचयेत् ।
साधयेत् परया भक्त्या दिव्यरूपं मनोहरम् ।।४१।।
ललाटे चन्द्रं सम्भाव्य विभूतिं परिधारयेत्।
वामहस्ते समानीय पयश्च[२] शुष्कभस्मकम् ।।४२।।
यज्ञभस्मसमायोगं वृषभस्मनि कारयेत् ।
प्रजपेत्तत्र मन्त्रञ्च शिवस्यापि षडक्षरम् ।।४३।।
शूद्रः पञ्चाक्षरं जप्त्वा षोड़शं[३] सङ्ख्यकं प्रिये ।
पठेत्तत्र महादेवि मन्त्रमेतद्द्वयं पुनः ।।४४।।

ॐ अग्निरिति भस्मजलमिति भस्म स्थलमिति भस्म सर्वं ह वा इदं मनः। भस्मश्चक्षुषीन्द्रियाणि भस्मानि तस्माद्व्रतमेतत् शाम्भवं पशुपाशविमोक्षणाय।

ॐ भस्मरूपं परं ब्रह्म परशक्तिरितीरिता।
परं ज्ञानमयं भस्म परतत्त्वस्वरूपिणम्।।४५।।
परमानन्ददं भस्म ज्ञानकल्पे व्यवस्थितम् ।
विधारयामि तद्भस्म शृणु[४] पाशविमुक्तये।।४६।।
ततश्च ब्रह्मणेऽर्घ्यं मन्त्रं तस्य षडक्षरम् ।
शूद्रः पञ्चाक्षरं मन्त्रं पठित्वा धारयेत् सदा।।४७।।
मृगमुद्रां समासाद्य ललाटे विभृयाच्छुभम्।
मूलेन प्रणवेनापि प्राणायामं समाचरेत्।।४८।।
कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयः पूरकुम्भकरेचकैः।।४९।।

---

१. जलं
२. पयसा
३. मन्त्रशोड़ष
४. पशु.
५. विना भस्मत्रिपुण्ड्रेन विना रुद्राक्षमालया।
विल्वपत्रैर्विना देवि पूजितो वा न पूजितः।।।
ततश्च मातृकान्यासं वर्णन्यासं ततः परम्।। इति अधिकः पाठः।

कलाचतुष्टयं तस्य द्विगुणेन विरचयेत् ।
क्रमात् क्रमात् त्रयं कृत्वा मानसेनापि पूजयेत् ।।५०।।
ज्ञानिनामपि सिद्धिः स्यान्नासमे तत्[1] समाचरेत्।
पशुपतये नम इति शीर्षे मुखे च हरये नमः[2] ।।५१।।
कण्ठे श्रीनीलकण्ठाय रुद्राय उरसि[3] न्यसेत् ।
कङ्काले धूम्रनेत्राय मूले श्रीशम्भवे नमः ।।५२।।
पादयोर्भैरवायेति शिवाय दक्षबाहुतः ।
कालाय वामबाहौ[4] च पृष्ठे ज्ञानाय एव च ।।५३।।
क्रोधाय सर्वगात्रेषु विन्यसेच्छिवपूजने।
षड्दीर्घभाजा बीजेनऽक्षवोऽथ[5] षडङ्गकम् ।।५४।।
कराङ्गञ्च तथा न्यस्य दशदिग्बन्धनञ्चरेत् ।
हराय नम उच्चार्य मृदञ्चैवाहरेत् व्रती ।।५५।।
महेश्वरं चतुर्थ्यन्तं नमोऽन्तं पठनञ्चरेत्।
शूलपाणे रहोच्चार्य सुप्रतिष्ठोभव स्वयम्।।५६।।
प्रतिष्ठाप्य[6] ततः सिद्धे दत्त्वावाह्य प्रपूजयेत्।
पाद्यमर्घ्यञ्च गन्धञ्च पुष्पं धूपञ्च दीपकम् ।
नैवेद्यादीनि दत्त्वा च पूजयेत् परमेश्वरम् ।।५७।।
मोचाफलं सवृन्तञ्च शिवलिङ्गे ददाति यः।
पुरः स्थित्वा युग्मपाणौ गृह्णामि प्रयतात्मनः ।।५८।।
पुरः स्थित्वा मूलमन्त्रं जपेद् दशसहस्रकम् ।
पशुपतये नम इति लिङ्गं संस्थापयेद् बुधः ।।५९।।
विल्वपत्रस्य माहात्म्यं वक्तुं कः शक्त एव हि ।
विल्वपत्रैर्विना देवि लिङ्गपूजा तु निष्फला।।६०।।
पूजयेत् परया भक्त्या चाष्टमूर्त्तिं शिवस्य च ।
आग्नेयन्ताः प्रपूज्यास्ताः वेद्यां लिङ्गे शिवं यजेत् ।।६१।।

---

१. सिध्यर्थं।
२. हराय
३. वक्षसि
४. वामवाहौ च कालाय
५. हकारेण
६. प्रतिष्ठाप्य ततो लिङ्गे मूलमन्त्र जपेद्दश इति।

लिङ्गवेदी भवेद्देवि लिङ्गं साक्षान्महेश्वरः ।
तयोश्च पूजनात्[१] स्यातां देवीदेवौ[२] च पूजितौ ।।६२।।

ॐ सर्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः। ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः।। ॐ भीमाय आकाशमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः। ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्यमूर्त्तये नमः।।

पुष्पाञ्जलित्रयं देवि शङ्कराय निवेदयेत्[३]।
स पूजाफलमाप्नोति नान्यथा लक्षपूजनात् ।।६३।।
ततो मूलं प्रजप्तव्यं देवि चाष्टोत्तरं शतम्।
सजलैर्विल्वपत्रैश्च[४] जपं लिङ्गे समर्पयेत् ।।६४।।
ॐ गुह्यातिगुह्यगोप्ता[५] त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ।।६५।।

त्वयिस्थिते इति क्वचित् पाठः। स्तोत्रञ्च लिङ्गार्चनचन्द्रिकादावनुसन्धेयं कवचञ्च। ततो मुखवाद्यादिकञ्चरेत्।

संपूज्य पार्थिवं लिङ्गं मुखवाद्यं चरेत्तु यः।
शिवसायुज्यमाप्नोति तथा करतलध्वनिम्[६] ।।६६।।
अर्द्धप्रदक्षिणं कृत्वा प्रणमेत् पार्वतीश्वरम् ।
याम्याञ्च गच्छेत् कौवेरीं पुनस्तत्रागतिश्चरेत् ।।६७।।
पृष्ठे हस्तं समादाय मह्यां जानुद्वयं तथा ।
शीर्षं रसायां दत्त्वा तु अर्द्धचन्द्राकृतिर्भवेत् ।।६८।।
यो दद्यात् संविदा पत्रं शङ्कराय महेश्वरि[७]।
अश्वमेधकृतं पुण्यं पत्रेणैकेन जायते ।।६९।।
द्वादश्यां शङ्करो देवो लिङ्गं दृष्ट्वा तु पार्थिवम्।
संविदा पत्रमादाय सर्वं दद्यात्[८] कृताञ्जलिः।।७०।।

---

१. तयोः
२. देवश्च
३. प्रदापयेत्
४. पत्रेण
५. गुप्ता
६. ध्वनिः
७. महेश्वर
८. सर्वदछ स्यात्

नार्चयेच्छङ्करस्यापि लिङ्गं यस्तु नरः क्वचित्।
न विष्णुभक्तः[1] शाक्तो वा न शैवः[2] स नराधमः।।७१।।

नृत्यगीतवाद्यनामोच्चारणेन शिवं सन्तोष्य संहारमुद्रया क्षमस्वेति विसृज्य स्थानं संस्कुर्यात्।

हरस्य पार्थिवं लिङ्गं पूजयित्वा[3] नरो यदि।
जले संस्थापयेद्देवि स दरिद्रो भवेद् ध्रुवम्।।७२।।
पूजयित्वा तु यो लिङ्गं पार्वतीप्रियमुत्तमम्।
स्थापयेद् भुविरौद्रे च दन्दशूकं प्रयाति सः।।७३।।
शिवलिङ्गं पूजयित्वा भूमौ संप्रापयेत्[4] किल।
अथवा स्थापयेत्तोये दन्तशूकं व्रजेन्न च।।७४।।

यत्र यत्र नरकश्रुतिस्तत् सुधीभिर्न कार्यम् दरिद्राभिभवश्च न कार्यं किन्तु महालिङ्गेश्वरतन्त्रे उभयपत्रदोषश्रवणात्। दन्दशूकं व्रजेन्न चेति श्रवणाच्च भूमौ प्रापणमेव कार्यम्। तदभावे[5] जले वा क्षिपेत्।

न जले[6] पूजयेच्छम्भुं भागीरथीजलं विना।। इति रुद्रयामले

त्रिपुरानन्देन श्रीमद्गुरुणा व्याख्यातम्। पूजने गङ्गाजले बिल्वपत्रादिभिर्विनापि न च सामान्यजले न स्थापयेत्। मुद्रादर्शनादिभिर्न पूजयेदित्यर्थः। तथा तारानिगमे महालिङ्गेश्वरतन्त्रे च।

पार्थिवं नार्चयित्वा तु कालीं ताराञ्च सुन्दरीम्।
अर्चयेद् यस्त्रिलोकस्थः स गच्छेद् यमयातनाम्।।७६।।

एतेनादौ महाविद्यां पूजयित्वा ये शिवपूजां[7] वदन्ति। तन्न। लिङ्गार्चन-चन्द्रिकायाम्-

महाविद्यां पूजयित्वा शिवपूजां समाचरेत्।
अन्यथा करणाद् देवि न पूजाफलमाप्नुयात्।।७७।।

इति महाविद्यानां प्रशंसार्थं शिववाक्यम्। तथा च त्रिपुराकल्पे-

---

१. भक्तो न
२. शौरः
३. शङ्करस्य
४. संस्थापयेत्
५. शक्तौ
६. नो जले स्थापयेल्लिङ्गं
७. शिवपूजनं

यावन्न पूजयेल्लिङ्गं-पार्थिवं साधकाधमः।
तस्य पूजां न गृह्णाति[1] सुन्दरी तारकासिता ।।७८।।

इति ब्रह्मानन्दपरमहंसपरिव्राजकाचार्यतीर्थावधूतविरचिते तारारहस्ये शिवलिङ्गार्चनप्रकरणम्।

◆◆◆

अथ अन्तर्यागप्रकरणम्

तत्रादौ शक्तिसारे-

प्रातःकृत्यं चरेदादौ प्रातः सन्ध्यां ततः परम्।
ततः स्नानं विधायाथ सन्ध्यां मध्याह्निकीं तथा ।। ७९।।
शिवपूजां ततः कुर्यात् तथान्तर्यजनं शिव।
ततः पूजा विधातव्या ततो होमं समाचरेत्।।८०।।
बलिं दद्यात्ततो देव्यै षोढां कुर्यात्ततः परम्।
भागं दत्त्वा महादेव्यै सायं सन्ध्यां समाचरेत् ।।८१।।
ततो योगोविधातव्यस्ततश्च साधनमुत्तमम्।
एवं प्रकारमसाध्य तारकां साधयेद् यदि।
तदा सिद्धिमवाप्नोति नान्यथा कल्पकोटिभिः ।।८२।।
स्तवञ्च कवचञ्चापि[2] सहस्राख्यं पठेत्ततः।
प्रपठेत् साधकश्रेष्ठस्त्रिसन्ध्यं कार्यसिद्धये ।।८३।।

एतेन शिवपूजनान्तर्यजनस्य कर्त्तव्यत्वात्तदेव लिख्यते। तारानिगमे च-

न पूजाफलमाप्नोति विनान्तर्यजनं शिव।
तस्मादर्चनतः पूर्वमन्तर्यागं समाचरेत् ।।८४।।

तथा चैकजटापक्षे-

स्वीकीय हृदये ध्यायेत सुधासागरमुत्तमम्।
तन्मध्ये रत्नद्वीपञ्च सुवर्णबालुकामयम् ।।८५।।
पारिजातवनं तत्र रत्नानाञ्चापि मन्दिरम्।
श्मशानं तत्र संचिन्त्य तत्र कल्पद्रुमं स्मेरत् ।।८६।।

---

१. गृह्णन्ति।
२. कवचं देवि।

तन्मध्ये मणिपीठञ्च नानामणिविभूषितम् ।
चतुर्दिक्षु शवामुण्डाश्चिताङ्गारास्थि[1]भूषणम् ।।८७।।
विभाव्य यत्नतो मन्त्री रत्नद्वीपे वसेत् स्वयम् ।
ब्रह्मरन्ध्रे सदा ध्यायेन्महादेवं जगद्गुरुम् ।।८८।।
तस्य वामस्थितां देवीं तारां तारस्वरुपिणीम् ।
विभाव्य प्रणमेद्विद्यां प्रातःकृतिरितीरिता[2] ।।८९।।
ब्रह्मरन्ध्रे विन्दुरूपं पुष्करं तीर्थमुत्तमम् ।
प्रकुर्यात् साधकस्तत्र स्नानं सर्वमलापहम् ।।९०।।
बधूबीजस्वरूपे च शिवतीर्थं हृदि न्यसेत् ।
मध्ये सुषुम्नानाड्यास्तु स्नायात् साधकसत्तमः ।।९१।।

इति स्नानम्

स्वकीयहृदये ध्यायेत् सिंहासनमनन्यधीः ।
तत्र संभाव्यते शय्या ज्ञानानन्दस्वरूपिणी ।।९२।।
शिवं तत्र विभाव्याथ सर्वालङ्कारभूषितम् ।
दिगम्बरं महाकाव्यं उन्मत्तं कामभावतः ।।९३।।
शय्या[3]यां मूर्द्धालिङ्गञ्च भावयेत् साधकाग्रणीः ।
भावयेच्च ततो देवीं अमृतानन्दरूपिणीम्[4] ।।९४।।
तप्तकाञ्चनवर्णाभां सर्वालङ्कारविभूषिताम्[5] ।
पारिजातान्वितां देव्याः कबरीं परिभावयेत् ।।९५।।
त्रिसन्ध्यं सन्ध्या कर्त्तव्या मन्त्रसिद्धिमभीप्सता ।
माता कामेश्वरी देवी पिता कामेश्वरः शिव ।
श्रद्धावान् भावयित्वा च अष्टसिद्धीश्वरो भवेत् ।।९६।।

इति सन्ध्या

सर्वतेजोमयीं देवीं शिवशक्तिं जडात्मिकाम् ।
ज्वलत्[6]सूर्याग्निचन्द्राभां तड़ित्कोटिसमप्रभाम् ।।९७।।

---

१. शवमुण्डश्चिताङ्गवास्ति संयुतम्
२. कृत्यमितीरितम्
३. शय्यास्यमूर्द्धलिङ्गम्
४. नन्दिनीम्
५. वस्त्रालङ्कारभूषिताम्
६. जलचन्द्राग्नि सूर्याभां

भावयेत् साधको यस्तु ध्यानयोगेश्वरश्च सः।
इति ध्यानं विधातव्यं साधकैर्मन्त्रसिद्धये ।।९८।।

इति ध्यानम्

ब्रह्मरन्ध्रे चन्द्रपात्रात्तर्पयेत्तारिणीं पराम्।
तत्रस्थ[१]सूर्यपात्राच्च अर्घ्यं दद्यान्मनोहरम्।।९९।।
दया ज्ञानं क्षमा पुष्पं पुष्पमिन्द्रियनिग्रहम्।
ज्ञानदानं पुण्यपुष्पमहिंसापुष्पमुत्तमम्।।१००।।
आचारपुष्पं[२] मे नाथ स्वयम्भूपुष्पमुत्तमम्।
आनन्दपुष्पं दातव्यं पुष्पञ्च साधकार्चनम्।।१०१।।
दशपुष्पं यः प्रदद्यात् स गच्छेत्तारकापदम्।
त्रिलोकस्थभद्रद्रव्यैः पूजयेत् साधकोत्तमः।।१०२।।
तत्त्वं दद्यात्तारकायै मत्स्यमांससमन्वितम्।
तदा सिद्धिमवाप्नोति न जपात्र कुलार्चनात्।।१०३।।

इति पूजा

प्रजपेद् वर्णमालाभिर्न्यासपूर्वं कुलेश्वर।
हृत्पद्मे षोडशारे तु विन्यसेत् षोड़शस्वरम्।।१०४।।
पूर्वादितः समारभ्य वह्निकोणान्तपरतः।
आधारे विन्यसेद् विद्वान् ककारादिचतुष्टयम्।।१०५।।
पश्चिमादिदले न्यस्य उत्तरान्तं सुसाधकः।
लिङ्गमूले न्यसेत् पद्मे षड्दले चोत्तरक्रमात्।।१०६।।
ङकारादिञकारान्तं षड्वर्णं साधकोत्तमः।
नाभिमूले न्यसेद्वर्णं टादिढान्तं मनोहरम्।।१०७।।
दक्षिणादिक्रमान्न्यस्यन्[३] वर्णरूपान्महामनून्।
विन्यसेत्तालुमूले च चतुर्दशदलान्विते।।१०८।।
धकारादिसकारान्तं इन्द्रवर्णं[४] न्यसेद् बुधः।
ललाटे च भ्रुवोर्मध्ये हक्षौ वर्णौ न्यसेत् सदा।।१०९।।

---

१. तत्रस्यात्
२. पुष्प मौनोऽथ
३. क्रमेन्यस्यान्
२. क्रमात् सुधिः

आदौ दक्षे तथा[1] वामे शुक्लपक्षे सुनिश्चितम्।
द्वादशार्णे न्यसेद्विद्वान् कादिठान्तान् सुसिद्धये ।।११०।।
उकारादिविसर्गान्तान् सहस्रारे न्यसेत् सदा।
एवञ्चान्तर्मातृकाणां विना न्यासेन पार्वति ।।१११।।
अन्तःपूजां चरेद् यस्तु स गच्छेद् यमसाधनम् ।।११२।।

इति मातृकान्तर्यागं कृत्वा वर्णमालया जपेत्। सा तु–

अकारादिक्षकारान्तं हक्षयोर्णञ्च मध्यतः।
नादबिन्दुसमायुक्तं वर्णान्ते प्रजपेन्मनुम् ।।११३।।
अनुलोमविलोमेन जपेदष्टोत्तरं शतम्।
उ कु चु टु तु पु यु शु अष्टवर्गेषु अष्ट संजपेत् ।।११४।।

उ अवर्गः षोड़शस्वरवर्णः[2]। कु कवर्गः, चु चवर्गः, टु टवर्गः, तु तवर्गः, पु पवर्गः, यु यवर्गश्चतुर्वर्णः, शु शवर्गः, षड्वर्णः।

तारार्णवे–

नादबिन्दुसमोपेतं सर्ववर्णे व्यवस्थितम्।
स्त्रीशूद्रयोरेतदेव नादबिन्दुविवर्जितम्।
नादबिन्दुसमायुक्तं जपन्यासे च मोक्षदम् ।।११५।।

एतेन मोक्षश्रवणात् सर्ववर्णानामर्द्धचन्द्रखण्डभूषितवर्णमोक्षजपेन्यासे चाधिकारः। स्त्रीशूद्रयोस्तु विसर्गस्तोकारबिन्दूनां च चन्द्रखण्डयोगः। तथा च तारासारे–

निश्चन्द्रं न चरेद् वर्णं जपे न्यासे च शूलधृक्।
अन्यथा करणान्मूढो नरकं याति निश्चितम्।।११६।।
स्वकीयहृदये ध्यायेद् योनिमण्डलमुत्तमम्।
रजोभिश्च समोपेतं त्रिकोणं सर्ववर्णकम् ।।११७।।
कामाख्यायोनिं संभाव्य नीलमण्डलमुत्तमम्।
हुनेत् षोडशवरञ्च धृतेर्लिङ्गोद्भवैर्धिया ।।११८।।

---

१. ततो
२. षोड़श वर्णः

ततः प्रदक्षिणं कुर्यान्मानसेन शिवां त्रयम्।
इत्यन्तर्यजनं मूढो नाकृत्वा पूजयेत् पराम्॥
न पूजाफलमाप्नोति तारायाः कोटिजन्मतः ॥११९॥

इत्यन्तर्यजनम्

अथोग्रतारान्तर्यागम्

अथोग्रतारकायाश्च अन्तर्यागं वदाम्यहम्।
स्वकीये हृदये ध्यायेत् सुधासागरमुत्तमम् ॥१२०॥
हृत्पद्मे षोडशारे च[1] तर्पयेदुग्रतारिणीम्।
दले दले महादेवीं मूलमन्त्रमनुस्मरन् ॥१२१॥
तस्या योनौ हुनेद् वत्स मन्त्रेणानेन साम्प्रतम्।
ॐ नाभिचैतन्य रूपाग्नौ हविषा मनसा श्रुचा ॥१२२॥
सुषुम्नावर्त्मना नित्यमक्षवृर्त्तिजुहोम्यहम्।
प्रकाशकाशहस्ताभ्यामवलम्ब्योन्मनाः स्रुचा।
धर्माधर्मकलास्नेहपूर्णवह्नौ जुहोम्यहम्॥१२३॥
ततश्च वर्णमालाभिर्जपेदष्टोत्तरं शतम्।
प्रदक्षिणीकृत्य ततः प्रणिपत्य सुखञ्चरेत् ॥१२४॥

इत्युग्रतारान्तर्यजनम्

स्वकीये हृदये ध्यायेत् शारदां नीलरूपिणीम्।
प्रत्यालीढ़पदां देवीं व्याघ्रचर्मावृत्तां कटौ ॥१२५॥
हास्यवक्त्रां महाघोरां यजेन्नीलसरस्वतीम्।
विपरीतरताशक्तां वागीशत्वप्रदायिनीम् ॥१२६॥
पाययित्वा सुधाधारां[2] मत्स्यमांससमन्विताम्।
चसकेन ददेद् वक्त्रे आसवं मांससंयुतम् ॥१२७॥
महाहृदि[3] परं ध्यायेन्नीलवर्णां सुरेश्वरीम्[4]।
आसवोन्मत्तहृदयां शिववक्त्रे पुनः पुनः ॥१२८॥

---

१. तु
२. सारां
३. महाह्लादपरां
४. सरस्वतीम्

प्रपातवातयोगेन चुम्बनञ्च करोति हि।
पादपद्मं महादेवि विधृत्य निजहस्ततः ॥१२९॥
उत्थाय तारिणीवक्त्रं स चुम्बति पुनः पुनः।
तस्य वक्त्रे प्रदद्याच्च मत्स्यं दग्धं महासवम्[१] ॥१३०॥
दग्धमत्स्यं दग्धमांसं शोणितं पशुदेहतः।
शूकरस्योष्ठमांसञ्च भगलिङ्गमृतन्तथा ॥१३१॥
दद्यान्नीलसरस्वत्यै उच्छिष्टं हरवक्त्रके।
पुनः पुनः पूजायित्वा पूजयेद्वर्णमालया[२] ।
इत्यन्तर्यजनं प्रोक्तं नीलवाण्याः सुशोभनम् ॥१३२॥
योऽर्चयेत् परयाभक्त्या हस्ते तस्य सदा भवेत् ।
सर्वा सिद्धिर्महादेवि वक्त्रे वाणी वसेद् ध्रुवम् ॥१३३॥
शिवारात्रौ कुलाचारे एवं यस्तु विभावयेत्।
तस्य भोगश्च मोक्षश्च इच्छासिद्धिः करे वसेत् ॥१३४॥

इति नीलसरस्वत्या अन्तर्यजनम् ॥

◆◆◆

अथयन्त्रोद्धारप्रकरणम्

अथ एकजटायन्त्रोद्धारः

ब्राह्मणेतरवर्णानां षट्कोणं कर्णिकागतम् ।
ब्राह्मणानां सदा लेख्यं त्रिकोणं कर्णिकागतम् ॥१३५॥
मध्ये कूर्चं लिखेद्विद्यां[३] वृत्तद्वयमतः परम्।
ततश्चाष्टदलं लेख्यं चतुर्बीज समन्वितम् ॥१३६॥
पूर्वे लज्जा वधूर्दक्षे उक्तरेफः प्रकीर्त्तितः।
पश्चिमे टं समाख्यातं कोणे वेणुकायुतम्।
चतुरस्त्रं चतुर्द्वारं लिखेद् यंत्रं सुशोभनम् ॥१३७॥

---

१. महासवम्
२. प्रजपेत्
३. विद्वान्

एवं यन्त्रं परित्यज्य भिन्न[1]यन्त्रे प्रपूजयेत् ।
तस्यै दत्वा रुषा शापं देवी याति हरं प्रति ।।१३८।।
अस्या भेदेन[2] तारायाः वक्ष्यामि तदनन्तरम् ।
त्रिकोणञ्च त्रिवृत्तञ्च लिखेच्चापि चतुर्दलम् ।।१३९।।
ततश्चाष्टदलं लेख्यं द्विवृत्तं तदनन्तरम् ।
चतुरस्त्रं चतुर्द्वारं कामताराप्रपूजने[3] ।।१४०।।

एतासां धारणयन्त्रम् यथा-

त्रिकोणं साधकाख्यञ्च षट्कोणं तदनन्तरम् ।
लिखेदष्टदलं पद्मं षोडशस्वरसंयुतम् ।।१४१।।
पद्मावत्याश्च मन्त्रेण सप्तवर्णेन वेष्टयेत् ।
चतुरस्त्रं चतुर्द्वारं कोणे वज्रसमन्वितम्।। इति।।१४२।।

अथ-यन्त्रसंस्कारप्रकरणम्

अथोग्रतारायन्त्रम्

नवकोणं लिखेदादौ पञ्चपत्रसमन्वितम् ।
द्विवृत्तं द्विगुणं[4] पद्मं सर्वत्र रेणुभूषितम्[5] ।।१४३।।
चतुरस्त्रं चतुर्द्वारं उग्रताराप्रपूजने ।
षट्कोणञ्च चतुष्कोणं पञ्चवृत्तसमन्वितम् ।।१४४।।
लिखेदष्टदलं पद्मं चतुरस्त्रादिकं तथा[6] ।
वर्तुलं बिन्दुसंयुक्तं षट्कोणं तदनन्तरम्।
लिखेदष्टदलं पद्मं भूगृहं तदनन्तरम्।।१४५।।

अथ नीलतारिणीयन्त्रम्[7]

त्रित्रिकोणं समं लेख्यं मध्ये विन्दुसमन्वितम् ।
द्विवृत्तं षड्दलं विद्धि त्रिवृत्तं द्वादशं दलम् ।।१४६।।

---

१. परयन्त्रै
२. भेदोहि
३. तारा यन्त्रमितीरितम्
४. द्विदलं
५. चतुरस्त्रादिकन्या
६. भूगृहंतदनन्तरम्
७. अथनीलवानी यन्त्रम्

पुनर्वृत्तत्रयं लेख्यं चतुर्द्वारात्मकं गृहम् ।
द्वित्रिकोणञ्च षट्कोणं वृत्तं चाष्टदलन्तथा ।
पुनर्वृत्तं कलापत्रं चतुर्द्वारात्मकं गृहम् ।।१४७।।

साधारणयन्त्रमेकजटाप्रकरणोक्तं सर्वत्र इति तारायन्त्रोद्धारः।[१]

अथ यन्त्रसंस्काराः[२]

तारानिगमे[३]–

ताम्रपात्रे कपाले वा श्मशाने काष्ठनिर्मिते ।
स्वर्णे रौप्येऽथवा लौहे यन्त्रं कुर्याद् विधानतः ।।१४८।।

संस्कारस्य नित्यतामाह तारासारे–

असंस्कृते तु ये यन्त्रे पूजयन्ति नराधमाः ।
ज्ञानं पुण्यं न चेत् पुत्रं[४] साधने सिद्धयः कथम् ।।१४९।।
यन्त्रं लिखित्वा ये पूजां न कुर्वन्ति दिने दिने ।
तेषां पूजां न गृह्णन्ति देवाय[५] चासुराय तत् ।।१५०।।

तत्रैव–

यन्त्रस्य लेखनेऽशक्तः पुष्पयन्त्रे प्रपूजयेत्।
अपरायां[६] जवायाञ्च द्रोणे च करवीरके ।।१५१।।
गौरीपट्टे शिवस्यापि तत्त्वपालेऽथवा पुनः ।
अभावे सर्वयन्त्राणां शालग्रामे जलेऽर्चयेत् ।।१५२।।
सुमत्त्यां[७] सर्ववर्णाश्च तद्यन्त्रे च[८] प्रपूजयेत् ।
शालग्रामेतरे यन्त्रे शस्यते शूद्रयोषितः ।
गौरीपट्टे तु पूजायां पाषाणादौ[९] न पार्थिवे ।।१५३।।

तथा शक्तियामले–

---

१. नवयन्त्रोद्धारः
२. संस्कारः
३. आदौ पात्रं अधिक पुन्था
४. पश्येत्पात्र
५. देवताश्चां
६. अपराजितायां
७. सम्मत्त्याः
८. च अधिकम्
९. यागे सादौ

पार्थिवे योनिवेद्यास्तु[१] पूजने रेणुनासकृत्।
पच्यते नरके घोरे न मोक्षः कोटिजन्मतः।।इति ।।१५४।।
रक्तासनास्थितोवीरः[२] कामाख्यामुख एव च।
लिखेदष्टदलं पद्मं कुङ्कुमेन सुसिद्धये।।१५५।।
तत्र संस्थापयेद् यन्त्रं पञ्चगव्येन सेचयेत्।
वीक्षणं मूलमन्त्रेण अस्त्रेण पुष्पताड़नम् ।।१५६।।
मूलेन निक्षिपेद् विन्दून् लेपयेच्चन्दनेन च।
गन्धपुष्पाक्षतैर्यन्त्रं समभ्यर्च्य विलोकयेत् ।।१५७।।
ॐ यन्त्रराजाय विद्महे सर्वाधाराय धीमहि तन्नो यन्त्रः प्रचोदयात्।
एतया वापि गायत्र्या शतैस्तमभिमन्त्रयेत्।
देवताभावमासाद्य मूलमन्त्रशतं जपेत् ।।१५८।।
प्रतिष्ठोक्तक्रमेणापि प्रतिष्ठाप्य निरीक्षयेत्।
गायत्र्या देवतायास्तु शतं तमभिमन्त्रयेत्।।१५९।।
देवीं ततः समावाह्य दशमूलेन मन्त्रयेत्।
पुष्पाञ्जल्यष्टकं दत्त्वा चोपचारैश्च पूजयेत् ।।१६०।।
कलाभिर्दशभिर्वापि पञ्चभिर्वाप्यशक्तितः[३]।
तर्पणन्तु ततः कृत्वा शतमष्टोत्तरं हुनेत् ।।१६१।।
होमकर्मण्यशक्तश्चेद् द्विगुणं जपमाचरेत्।
प्रणम्य[४] धार्य्य तद्यन्त्रं सदा सद्भावसिद्धये।
गुरुणा कारयेद् वापि स्वयं वापि विशोधयेत् ।।१६२।।
ब्राह्मणानां क्षत्रियाणां वैश्यानां हरसुन्दरि!।
योषितामपि शूद्राणां चाधिकारोऽत्र सन्निधौ ।।१६३।।
सर्वत्र होमे पूजायां संस्कारे बालकस्य च।
प्रयोगे यन्त्रसंशुद्धौ स्रजः संस्कारकर्मणि ।।१६४।।

---

१. वेद्या
२. रक्तासनेस्थिते
३. शक्तया:
४. प्रणम्य शिरसा यन्त्रं मन्त्रं मद्भाव सिद्धये।

शवानाञ्च चितानाञ्च लतानाञ्चापि साधने ।
रज्ज्वा तु प्रणवस्थाने ह्रीं बीजं वह्निवल्लभम् ।। १६५।।
सेतुस्थाने कूर्चबीजं षोढायां कामबीजकम्।
स्वर्गमोक्षप्रदं विद्धि सर्वत्र शूद्रयोषितः ।।१६६।।

इति श्री ब्रह्मानन्दपरमहंसपरिव्राजकावधूत-
विरचिते ताराहस्ये मन्त्रसंस्कारः।।

◆◆◆

अथ मालाप्रकरणम्

तारानिगमे–

नृकपालस्य खण्डेन रचिता जपमालिका ।
महाशङ्खमयी माला अकस्मात् सिद्धिदा स्मृता[1] ।।१६७।।
दन्तजैर्वा प्रकर्तव्या तथा चाङ्गुलिपर्वभिः ।
काली तारा महाविद्या मन्त्रे तिष्ठत्यतन्द्रिता[2] ।।१६८।।
अभावे स्फाटकी माला महाशङ्खस्य शङ्कर ।
शोधयित्वा जपेन्मन्त्रं सर्वकामार्थसिद्धये ।।१६९।।
महाशङ्खजपाद् वत्स अकस्मात् सिद्धिभाग् भवेत् ।
मन्त्रसिद्धिः स्फाटिके स्याद्रुद्राक्षे सर्वसिद्धिभाक्।।१७०।।
कुशग्रन्थिः शान्तिके स्यात् खरदन्ता च मारणे।
उच्चाटने चाश्वदन्ता वश्ये प्रवालमालिका ।।१७१।।
विद्यायाञ्च धने चापि स्त्रियाआकर्षणे तथा।
शत्रूणां स्तम्भने वापि माला रौप्यमयी तथा ।।१७२।।

संस्कारे नित्यतामाह–

असंस्कृतमालाभिर्मन्त्रं जपति यो नरः ।
तस्मै दत्त्वा रुषा शापं देवी याति हरं प्रति ।।१७३।।

---

१. सिद्धि देवता
२. तिष्ठत्यमन्त्रिता

त्रिकोणं संलिखेद् भूमौ[१] मालां तत्र निधापयेत्।
देवप्रतिष्ठा मन्त्रेण तत्र देवी प्रतिष्ठयेत् ।।१७४।।
संस्कृत्य तत्र तेनैव सहस्रविन्दुकं क्षिपेत्।
सिन्दूरकरवीराद्यैः पूजयेत्तारिणीं पराम् ।।१७५।।
तुलसीगोमयस्पृष्टां गङ्गास्पृष्टाञ्च मालिकाम्।
गोपयेद् बहुयत्नेन गुरोरपि न दर्शयेत्।।१७६।।
अपमृत्युगतस्यापि चास्थि विप्रेतरस्य च।
स्त्यर्कबेधे देवेशि[३] चास्थि चादाय यत्नतः।
धमन्यां ग्रथयेन्मालां रक्तसूत्रेण वा पुनः ।।१७७।।

इति महाशंख-माला।।

अथ सामान्यमाला

मारणे पञ्चदशकमष्टादश सदोच्चरे।
अष्टाविंशतिमालाभिर्वश्येऽप्याकर्षणे तथा ।।१७८।।
धनार्थं[४] त्रिंशता जप्यं सिद्धौ स्यात् पञ्चविंशतिः।
एकपञ्चाशन्मनुभिः सर्वसिद्धिमवाप्नुयात् ।।१७९।।
ब्राह्मणीकन्यका या तु अनूढा स्यात् कलेवरम्[५]।
कृन्तसूत्रैश्च[६] कर्तव्यं स्रजं सर्वसुखावहम् ।।१८०।।
शान्तिके श्वेतसूत्रं स्यात् सिद्धौस्याद्रक्तसूत्रकम्।
ज्ञानसूत्रं वर्णरूपे कृष्णसूत्रन्तु[७] मारणे ।।१८१।।
आकर्षणे नीलसूत्रं धमनी[८] सर्वसिद्धिदा।
त्रिगुणं त्रिगुणीकृत्य दृढ़रज्जुसमन्वितम्।।१८२।।
सन्धिद्वयावेष्टनेन ग्रन्थिं कुर्याद् यथादृढ़म्।
ब्रह्मग्रन्थियुतां[९] कुर्याद् ग्रन्थिं वापि त्रिवेष्टिताम्।।१८३।।

---

१. भूमौ संलिख्य माला
२. संस्कृत्वा तत्त्वं
३. च मालां
४. धनार्थी त्रिंशता जाप्यं सिद्धिः स्यात्पञ्चविशति।
५. सत्कुलेवरम
६. तद्दस्त सूत्रैः कर्त्तव्यं रज्जु।
७. च
८. धरनी
९. युतं

अथवा ग्रन्थिकं तत्र दृढ़रज्जुसमन्वितम्।
एषा पुष्पमयी माला सर्वसिद्धिप्रदा मता ।।१८४।।

अथ शोधनम्

अश्वत्थपत्रनवकैः पद्माकारन्तु[1] कारयेत्।
तन्मध्ये स्थापयेन्मालां मातृकामूलमुच्चरन्।
क्षालयेत् पञ्चगव्येन वामदेवेन घर्षयेत् ।।१८५।।

वामदेवस्तु मन्त्रमहाकुलार्णवे–ॐ वामदेवाय सर्वसिद्धीश्वराय सर्वपापहराय सर्वमालिकेश्वराय ॐ हुँ ॐ ऐं क्लूँ फट् इत्यनेन चन्दनकुङ्कुम-गोरोचनादिभिर्घर्षयेत्।

तत्त्वज्ञैर्न[2] तु नेतव्यो वामदेवस्तु वैदिकः।
कुलाचारविहीनानां न वेदाः फलदायकाः।।१८६।।
ॐ लज्जा तु सुभगा चैव वाग्भवं काम एव च[3]।
एतेन वीक्षणं कुर्यात्तारामन्त्रसुसिद्धये ।।१८७।।

इति वीक्षयेत्

शताभिमन्त्रितं मूलेन कुर्यात् , ततो मातृकावर्णैः प्रत्येकं विन्दुं निक्षिपेत्[4]। प्रतिमासं मूलेन[5] देवीं तर्पयेत्।

मूलेन स्नापयेन्मालां कुङ्कुमेनापि लेपयेत्।
घर्षयेद् विधिबोधेन कामबीजेन पूजयेत् ।।१८८।।
ततश्च मूलमन्त्रं हि मालोपरि[6] शतं जपेत्।
तत्र देवीप्रतिष्ठोक्तविधिना प्रतिष्ठापयेत् ।।१८९।।

तत आवाहनमुद्राभिर्आवाहयेत्। ततः षोड़शोपचारैः पञ्चोपंचारैर्वा पूजयेत्। तत अष्टोत्तरशतं हुनेत्। तत अशक्तौ द्विगुणजपः। ततः सप्तप्रदक्षिणं कृत्वा[7] प्राणायामं कृत्वा कराङ्गषड़ङ्गन्यासौ विन्यस्य मालां शिरसि संवेष्ट्य गोपायेत्।

---

१. यक्षाकारन्तु
२. तत्त्वज्ञैर्वतु
३. सर्वलज्जवातु सुभगा वाग्भवं काम एव च।
४. निक्षेपं कुर्यात्
५. प्रतिमालासु मूलेन
६. तदुपरि।
७. कराङ्ग षड़ङ्गै

मुखे मुखन्तु संयोज्य पुच्छे पुच्छं नियोजयेत्।
मुखतः प्रजपेन्मन्त्री पुच्छतो न कदाचन ।।१९०।।
पुच्छतं[1] प्रजपित्वा तु शोकदुःखभयादिकम्[2]।
कृताञ्जलिर्यस्य देवी तस्यापि नरकं किल ।।१९१।।
न सद्गतिर्न वै सिद्धिर्विघ्नस्तस्य सदा भवेत्।
शब्दे जाते भवेद्रोगो धूननं बहुदुःखदम्।
हेलनात् सिद्धिहानिः स्यात्तस्माद् यत्नपरो भवेत् ।।१९२।।

इति मालासंस्कारः

अथ होमः

प्रागग्रा उदगग्राश्च तिस्रो रेखा विलेखयेत्।
तन्मध्ये च चतुःकोष्ठं लेपं[3] कुर्याद् विधानतः ।।१९३।।
त्रिकोणमादौ लिख्याथ मध्ये लज्जासमन्वितम्।
वृत्तं ततश्च षट्कोणं कोणे वज्रचतुष्टयम् ।।१९४।।
गजकुम्भं बाह्यकोणे द्वारे योनिद्वयं द्वयम्।
अष्टयोनियुतं चक्रं गजकुम्भचतुष्टयम् ।।१९५।।
एवं कुण्डं स्थण्डिलं वा कृत्वा देवीं विभावयेत्।
अग्नौ प्रपूजयेद् विष्णुं ऐशान्यां शूलधारिणम् ।।१९६।।
वायव्याञ्चापि ब्रह्माणं नैर्ऋत्यामिन्द्रमेव च।
लक्ष्मीं सरस्वतीं पूर्वे द्वे त्रिकोणे[4] प्रपूजयेत् ।।१९७।।
शचीं कृष्णां चोत्तरस्यां छायां संज्ञाञ्च पश्चिमे।
दुर्गां देवीञ्च त्रिपुरां दक्षिणास्यां प्रपूजयेत् ।।१९८।।
प्रागग्रासु यजेद्देवान् मुकुन्देशपुरन्दरान्।
यजेद्वा चोत्तराग्रेषु ब्रह्मवैवस्वतेन्दुकान् ।।१९९।।

---

१. पुच्छः
२. भयाकुलः
३. रूपं
४. त्रिकोणं

देवीं प्रपूजयेत् पश्चात् षट्कोणेषु सदाशिवम्।
दुर्गां काञ्चीं तथा कालीं त्रिपुरां भैरवीन्तथा।।२००।।
असितां पूजयेत् कोणे तारिणीं मोक्षदायिनीम्।
मध्ये प्रपूजयेद् वत्स यथाशक्त्युपचारकैः।।२०१।।
देव्या योनिं विभाव्याथ भावयेच्च रजोयुताम्।
पुष्पाञ्जलित्रयं दत्त्वा काष्ठं तत्र निपातयेत्।।२०२।।
ततो वह्निं समानीय कांश्यपात्रे[1] स्थितं शुभम्।
ॐ कन्यादिभ्यो हुं फट् स्वाहा इत्यनेन त्यजेद् बुधः।।२०३।।
पुनर्मूलेन चानीय योनिमध्ये निधापयेत्।
योनिमुद्रां प्रदर्श्याथ मूलन्तत्र जपेद् दश।।२०४।।
तत्र देवीं चिन्तयित्वा रजसा योनिमण्डलम्।
गन्धपुष्पेण संपूज्य देवीं सर्वार्थसाधिनीम्।।२०५।।

ॐ चित्त पिङ्गल हन हन पच पच मथ मथ[2] विध्वंसय विध्वंसय मम दुष्टान् पापान् सत्त्वान् शत्रून् ग्रस ग्रस पिब पिब अनेन होमेन सर्वाज्ञां ज्ञापय मम सर्वकार्याणि साधय स्वाहा इति पठित्वा वह्निं ध्यायेत्।

ध्यानम्

रजोगुणसमुद्भूतं रक्तवर्णं त्रिलोचनम्।
द्विभुजं सर्वपापघ्नं समिद्धं विश्वतोमुखम्।
नानालङ्कारसंयुक्तं बहुजिह्वासमन्वितम्।।२०६।।

एवं ध्यात्वा अग्नेत्वं वरदनामासि इति नाम कृत्वा ॐ वरदनामाग्ने इहागच्छ इहागच्छ इह तिष्ठ तिष्ठ मम सर्वकर्माणि साधय स्वाहा इत्यावाहयेत्। ततो मूलेन नमस्कुर्यात्। एवं आज्यस्यापि श्रुवस्य च। आज्यपात्रस्य दक्षिणभागादाज्यं गृहीत्वा मूलेन[3] अग्नेर्दक्षिणनेत्रे जुहुयात्। तथा[4] वामभागादाज्यं गृहीत्वा वामनेत्रे मध्यतो मध्यनेत्रे। ततो महाव्याहृतिभिः ॐ भूः स्वाहा। ॐ भुवः स्वाहा। इति स्त्रीशूद्रयोर्विना। ततो मूलेन एकादशाहुतिं हुत्वा श्रीतारादेव्याः पीठदेवताभ्यः

---

१. पात्र
२. अधिकं पाठ।
३. मूलेन अधिकम् पाठः
४. वामतो वामनेत्रे

स्वाहा। ततः[1] अक्षोभ्य ऋषये ततः काम्यकर्म चरेत्। सङ्कल्पः नित्यश्चेन्न तथा। त्रिमधुरान्वितेन प्रकृतहोमं समाप्य स्त्रीशूद्रेतरो महाव्याहृतिभिर्हुत्वा आवरणदेवताभ्यः अष्टाहुतिर्हुत्वा वह्निं गन्धपुष्पमाल्यताम्बूलैरभ्यर्च्य श्रीसदाशिवं पूर्वश्रुवाहुतित्रयं दत्त्वा मूलेन पूर्णाहुतिं दत्त्वा वह्निं प्रदक्षिणीकृत्य प्रणम्य काम्यदक्षिणादिः। तिलकन्तु मूलेन संहारमुद्रया क्षमस्वेति विसर्जयेत्। इति होमः।।

यत्रान्ते[2] कमला कृताञ्जलिपरा वीणाधरा सारदा।
तारावाक्यमनुस्मरन् प्रियतमं वामोवचः[3] कारणम्।।
ब्रह्मानन्दकृतौ सुसाधनविधौ ताररहस्ये शुभे।
दीक्षादौ पटलो द्वितीयशुभदः सिद्धिप्रदः[4] सत्त्वरम्।।२०७।।

।।इति ताराहस्यतन्त्रे द्वितीयपटलः समाप्ततामगमत्।।२।।



---

१. तथा
२. यत्रास्ते
३. चोमा वचः
४. सत्यं स्तुसिद्धाकम्

तृतीयः पटलः

अथ मन्त्रविस्मरणप्रायश्चित्तम्[1]

तत्रादौ मन्त्रविस्मरणे प्रायश्चितम्
तारानिगमे तारार्णवे च। अन्यासां व्यवस्था अत्रैव।
कालीतारासु विद्यासु यदि स्यान्मन्त्रविभ्रमः।
तारापूजां ततः कृत्वा चैकलिङ्गे[2] शिवालये ।।१।।
कुशासनस्थितो वीरो जपेत् पद्मावतीमनुम्।
एकादशसहस्राणि ततो[3] मन्त्रस्मृतिर्भवेत् ।।२।।
कालीतारासु विद्यासु चक्रचिन्ता न विद्यते।
अरिदोषादिदोषाद्यैर्न लोको लिप्यते क्वचित् ।।३।।
यदि भाग्यवशाद्देवि तारामन्त्रं प्रलभ्यते।
ऋणिधन्यादिकं चक्रं न च तत्र परीक्षयेत्।।४।।
ताराविद्या चक्रमध्ये न कदाचिद्धनी भवेत्।
महाचीनक्रमं प्राप्य सर्वस्यैव ऋणी भवेत् ।।५।।
तस्माद्देव्याश्च तारायाः प्राणान्तेऽपि च साधकः।
साधने पूजने वापि महाचीनं त्यजेन्न च।।६।।
महाचीनं महानीलं न साधयति यो नरः।
न[4] तस्य साधने शक्तिः कुम्भीपाकेन हीयते ।।७।।
वामाचारं परित्यज्य पूजनं वा जपञ्चरेत्।
स गच्छेन्नरकं घोरं यावदिन्द्राश्चतुर्दश ।।८।।

---

१. अथ मन्त्रादिनाशप्रायश्चितम्
२. चैकलिङ्गे
३. तदा
४. का

वामाचारं विना देवि ताराया: परिपूजनम्।
शोकाय मरणायेह परे च नरकाय च।।९।।
न पूजा न जपो यस्य न सन्ध्या न च तर्पणम्।
महाचीनक्रमं कृत्वा स गच्छेत्तारकापदम्।।१०।।
पञ्चतत्त्वं विना देवि ब्राह्मणः शूद्रतामियात्।
पञ्चतत्त्वयुतो देवि शूद्रोऽपि विप्रतां व्रजेत्।।११।।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चैवान्तजास्तथा।
महाचीनक्रमं कृत्वा शिवः साक्षाद् भवेत् स्वयम्[1]।।१२।।
कौलं दृष्ट्वा यदा कौलस्तस्य पूजां न कारयेत्।
चक्रे स्थित्वाथवा मन्त्री लतायोगं समाचरेत्।।१३।।
मध्ये चक्रे स्थितः कौलः शक्तिभ्यः साधकाय च।
दातुं नैव मनश्चक्रे स्वयं नेतुं प्रचक्षते।।१४।।
अथवा दिवसं प्राप्य कुलपूजां चरेन्न च।
साधकानपि शक्तीश्च स्वेच्छाचारैर्न तोषयेत्।।१५।।
प्रसन्नमनसा वापि सत्कौलाय प्रदीयते।
स्वयं स्वीयकुलैः सार्द्धं क्रियते च कुलक्रिया।।१६।।
तस्य यन्त्रश्च[2] माला च पूजापद्धतिरेव च।
धारणस्यादि[3]कवचं हीयते[4] योगिनीगणैः।।१७।।
वह्निर्दह्यते वापि जले वापि प्रलीयते।
चोरैर्वा नीयते किञ्चित् तत् सर्वं योगिनीगणैः।।१८।।
एवञ्चेज्जायते वत्स यन्त्रादिहरणं शिवः।
पञ्चकौलान् समानीय कुमारीश्च विशेषतः।।१९।।
गन्धाक्षतैश्च संपूज्य वन्दयेच्छिरसा नतः।
होमं कुर्यात् सहस्रन्तु चक्रमध्ये सुसाधकः।।२०।।

---

१. ध्रुवम्
२. मन्त्रमश्च
३. साधारण यापि
४. ह्रियते

अष्टोत्तरशतं कुर्यात्तर्पणं साधकोत्तमः।
दग्धमीनासवेनादिसर्वदोषैर्न लिप्यते ॥२१॥
यन्त्राद्यलाभे चैतत्तु प्रायश्चित्तं शिवोक्तितः।
प्रजपेद् वर्णमालाभिरष्टोत्तरशतं मतम् ॥२२॥

इति प्रथमं प्रकरणम्



संस्कारप्रकरणम्

अथ पञ्चतत्त्वसंस्कारः

लाक्षारुणगृहे वापि कामाख्यावदने जनः।
सर्वं[1] शृङ्गारवेशञ्च कुर्य्यात् साधकसत्तमः ॥२३॥
सिन्दूरं कुङ्कुमं वापि धारणं कुलचन्दनम्।
वामभागकृता शक्तिः सर्वाभरणशोभना ॥२४॥
गन्धपुष्पाक्षतैस्तान्तु पूजयित्वा तु साधकः।
षट्कोणं बिन्दुसंयुक्तं वृत्तञ्चापि त्रिकोणकम् ॥२५॥
पुनर्वृत्तं चतुष्कोणं कुङ्कुमेन विलेखयेत्।
रक्तचन्दनसंलिप्तं रक्तवस्त्रेण वेष्टयेत् ॥२६॥
मूलमन्त्रेण संवीक्ष्य योनिमुद्रां प्रदर्शयेत्।
देवतां भावयेत्तत्र परमानन्दरूपिणीम् ॥२७॥
प्रणमेत् पञ्चमुद्राभिः कारणाधारमुत्तमम्।
द्रीं नमो योनिमुद्रादौ क्षं नमश्च कृताञ्जलौ ॥२८॥
ष्लुं नमः कलमुद्रायां[2] ग्लौं नमो मत्स्यरूपके।
हौं नमः संपुटाकारे पञ्चमुद्राः समीरिता ॥२९॥
प्रोक्षयेन्मूलमन्त्रेण धूपयेत्तेन कारणम्।
गन्धपुष्पं ततो दत्त्वा प्राणायामं समाचरेत् ॥३०॥

---

१. सर्व
२. कलसमुद्रायां

ऋष्यादिन्यासं कृत्वा तु कराङ्गञ्च षडङ्गकम्।
वर्णन्यासं ततः कृत्वा पञ्चमुद्राः प्रदर्शयेत् ।।३१।।
धेनुं योनिञ्च मत्स्यञ्च शङ्खं खड्गमतः परम् ।
हस्तं दत्त्वा ततः पात्रे पठेन्मन्त्रमनुत्तमम् ।।३२।।
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ।।३३।।
ॐ सूर्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमावीजमयौदेवि शुक्रशापाद्विमुच्यताम् ।।३४।।
ॐ देवानां प्रणवोबीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन देवेशि ब्रह्महत्यां व्यपोहतु ।।३५।।

ॐ वाँ वीं वूं वैं वौं वः ब्रह्मशापाद्विमोचितायै[1] सुधादेव्यै नमः। इति दशधा जपेत्।

ककारो रेफसंयुक्तः षड्दीर्घैश्चन्द्रसंयुतः।। सुधाकृष्ण पाशं मोचय मोचय अमृतं श्रावय श्रावय स्वाहा। इति दशधा जपेत्। ॐ छां छीं छूं छैं छौं छः छूः करिकामिव शोभिनि। सर्वपशुजनमनश्चक्षूंषीन्द्रियाणि स्तम्भय स्तम्भय नाशय नाशय घातय इति त्रिः। ॐ परमस्वामिनी परमाकाशशून्यवाहिनी चन्द्रसूर्य्याग्निभक्षिणि पात्रं विश विश स्वाहा। इति त्रिः।

अथ ध्यानम्

तन्मध्ये भावयेद् देवीं अमृतानन्दनन्दिनीम्।
सूर्यकोटिप्रतीकाशां चन्द्रकोटिसुशीतलाम् ।।३६।।
रक्तवस्त्रपरीधानां सर्वालङ्कारभूषिताम् ।
रत्नकेयूराङ्गदाद्यैः शोभितां सर्वरूपिणीम्।।३७।।

इति ध्यानम्

विधातव्यं सुधामध्ये साधनञ्च सुसाधकैः।
पूजयेद्बिल्वपत्राद्यैरमृतानन्दनन्दिनीम् ।।३८।।
तन्मध्ये भावयेद्देवं भैरवं भैरवीप्रियम् ।
अमृतार्णवमध्यस्थं पञ्चवक्त्रं त्रिलोचनम् ।।३९।।

१. शाप

वृषारूढं नीलकण्ठं सर्वाभरणभूषितम्।
अष्टादशभुजैर्युक्तं गदामूसलधारिणम् ।।४०।।
खड्गखेटकपट्टीशमुद्गरं शूलदण्डकम्।
पाशाङ्कुशशरं चापं मुद्रां विद्याञ्च मालिकाम् ।।४१।।
मृगं कपालं नागञ्च विधृतं सर्वरूपिणम्।
जटामण्डलमध्यस्थं सुधामध्ये विभावयेत् ।।४२।।

पूजयेद् गन्धपुष्पाद्यैर्देवदेवं महेश्वरम्। ॐ आनन्देश्वराय विद्महे सुधादेव्यै धीमहि तन्नोऽर्धनारीश्वरः प्रचोदयात्। इति दशधा जपेत्। तदुपरि मूलं एकविंशति-वारं वं इति सुधावीजं एकविंशतिवारं जपेत्। मूलेन त्रिर्गन्धं गृह्णीयात्।

सुधामध्ये लिखेद् योनिं योनिमध्ये हलौ[1] ततः।
तन्मध्ये भावयेद् देवीं तारिणीं सिद्धिदायिनीम् ।।४३।।
स्ववामे लेखयेद् विद्वान् बिन्दुयुक्तं मनोहरम्।
त्रिकोणं बाह्यवृत्तञ्च षट्कोणं वृत्तमेव च।।४४।।
अष्टकोणं लिखेद् भद्रं मूलेन परिपूज्य च।
श्रीपात्रं तत्र संस्थाप्य सुधां किञ्चित् समानयेत्।।४५।।
स्वल्पपात्रे ततो नीत्वा सुधां किञ्चित् समानयेत्।
यात्रान्तरगृहीतञ्च शुद्धिञ्चापि निवेदयेत्।।४६।।

ॐ सर्वपशिक देवता मम कल्याणं कुर्वन्तु हौं क्षौं स्वाहा। इति पठित्वा बृहन्नपात्रोपरि त्रिः परिभ्रामयित्वा।[2] श्रीपात्रे भ्रामयित्वा बिल्वमूले चतुष्पथे नद्यां तडागे वेश्यागारे वा क्षिपेत्। ततस्तत्र देवीं समावाह्य स्वकल्पोक्तविधिना परदेवताम्। संपूज्य सामान्यार्घ्यविशेषार्घ्याद्यैः।

ततो भावयेच्च देवीममृतानन्दनन्दिनीम् ।
सदा षोडशवर्षीयां प्रसन्नास्यां त्रिलोचनाम् ।।४७।।
रक्ताभरणशोभाढ्यां नानालङ्कारभूषिताम् ।
कामदेवेन चोन्मत्तां कन्यकारूपधारिणीम् ।।४८।।

---

१. हेसौ
२. भ्रामयित्वा

सदाशिवमयीं देवीं रत्युल्लासहृदान्विताम्।
महामोदप्रदां[1] देवीं भावयेत् साधकाग्रणी ।।४९।।

ततः पुष्पाञ्जलिं दत्त्वा तत्तत्कल्पोक्तन्यासादिकम् कृत्वा कुङ्कुमकर्पूरगन्ध-चन्दननानानन्दजनकपरदेवताया मन्त्रं तत्र भावयेत्। द्रव्याणि दापयेत्। ततः कृताञ्जलिः।

ॐ नमस्तस्यै सुधादेव्यै तारकासिद्धिदायिनीम्।
दात्रे पुण्यप्रदायै च भुक्त्यै मुक्त्यै महेश्वरि[2] ।।५०।।
भावयित्वा महादेव्यै कामेश्वर्यै विशेषतः।
माता कामेश्वरी देवी पिता कामेश्वरश्च सः ।।५१।।
द्वयोर्योगं[3] विभाव्याथ पूजयेत् परदेवताम्।
कालिकां तारकां वापि योऽर्चयेत् स नरोत्तमः ।।५२।।
महाचीनक्रमेणैव एतदेव हि शोधनम्।
ये च[4] मूढाश्यन्त्यनं तत्तत् सर्वं वृथा वृथा[5] ।।५३।।

इति तत्त्वसंस्कारः।

◆◆◆

अथ शक्तिसाधनप्रकरणम्

अथ मांससंस्कारः

मांसं तत्र समानीय शोधयेन्मूलमन्त्रतः।
साधयेत् परया भक्त्या मन्त्रमेतत् समुच्चरन् ।।५४।।

ॐ तद् विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत् परमं पदम्।।

ॐ कोलमांसं महामांसं मांसं छागादिकस्य च।
योषावर्जं सर्वमांसं तारायाः शुद्धिहेतवे ।।५५।।
परमानन्ददश्चैव मांसं परमकारणम्।
तारायाश्च प्रियं द्रव्यं सर्वदोषं विहाय च।।५६।।

---

१. मोह
२. महेश्वरीम्
३. उभयोर्योगं
४. अधिकः पाठः
५. भवेत्

ॐ ह्रौं क्षौं मांसं शोधय शोधय ॐ ह्रौं क्षौं स्वाहा।

इति मांसशुद्धिः।[१]

अथमीनशुद्धिः

यदा हिरण्यरूपं च अण्डजं विष्णुरूपिणम्।
महाहिवलयं देवं मत्स्यरूपिणमव्ययम्।
महामहेति विख्यातं मत्स्यरूपिणमव्ययम् ।।५७।।

ॐ ह्रीं क्लीं मौं व्लं सः सः सः इमं मीनं शोधय शोधय स्वाहा।।

इति मीनशुद्धिः।

अथमुद्राशुद्धिः

योनिमुद्रां ततो बद्ध्वा दृष्टा च योनिमुद्रिकाम्।
पठेदिमं मनुं वत्स सर्वकर्मसु सिद्धये।।५८।।
योनिविद्यां महाविद्यां कामाख्यां कामदायिनीम्।
तत्सिद्धिप्रदां देवीं कामबीजादिकां पराम् ।।५९।।
ॐ क्लीं कामेश्वरीमहामाये क्लीं कालिकायै नमः।
ॐ योनिविद्यां महाविद्यां चतुवर्गप्रदायिनीम्।
कलाकलासु विज्ञानतारानामतरोर्मते ।।६०।।

ॐ क्षौं क्लूं द्रौं द्रः

योनिविद्ये योनिसिद्धे योनिकारणकारिके।
कामदा कामदा ज्ञेया तत्त्वमध्ये महामहा ।।६१।।

ॐ सौः बाले बाले त्रिपुरसुन्दरि योनिरूपे मम सिद्धिं देहि देहि योनिमुक्तां कुरु कुरु स्वाहा। इति मुद्राशुद्धिः।

ततः शक्तिशोधनम् । ॐ ऐं क्लीं त्रिपुरादेवि सर्वशक्ति शवत्वं देहि देहि ॐ औं[२] इति तस्याः शीर्षे दशधा जप्त्वा तस्या देहे मातृकान्यासं कृत्वा ऋष्यादिन्यासं कराङ्गन्यासौ[३] विन्यसेत्। मूलं तद्हृदये[४] शतं जपेत्।

इति शक्तिसंस्कारः

---

१. शोधनम्
२. ॐ ऐं इति तस्याः
३. कराङ्ग षडङ्गै विन्यस्य
४. तद् अधिकम्

मूलं चोक्त्वा स्ववामे तु त्रिकोणं विलिखेद् बुधः ।
तत्र मध्ये लिखेल्लज्जां कामतत्त्वस्वरूपिणीम् ।।६२।।
तत्र पूजा विधातव्या गन्धपुष्पाक्षतैरपि।
साधकांश्चापि शक्तिश्च प्रणम्य च पुनः पुनः ।।६३।।
लज्जापूर्वे जलं दत्त्वा आज्ञां नीत्त्वा च साधकात् ।
तर्पयामीति चोक्त्वा तु तर्पयस्व समानय ।।६४।।
वामहस्तानामिकयाऽप्यङ्गुष्ठयोगमाश्रयेत् ।।६५।।

ह स न क्ष[1] म ल व र यीं आनन्दभैरवीं तर्पयामि स्वाहा इति त्रिः। इति शुद्ध्या[2]युक्तासवेन ब्रह्मरन्ध्रे त्रिस्तर्पयेत्। एवं गुरुं परमगुरुं परापरगुरुं ह स क्ष म ल व र यूं आनन्दभैरवं स्वाहा इति त्रिः। ततो हृदये तद्रूपेण मूलमुच्चार्य्य भीमामेकजटां परमपददात्रीं तारादेवीं तर्पयामि स्वाहा। एवं सर्वत्र देवीविषये। तथा च तारानिगमे–

तर्पयेत्तु सदा[3] तारां तर्पयेत् कालिकां पराम् ।
तर्पयेत् षोड़शीं देवीं ह्यन्यथा निष्फला क्रिया ।।६६।।
यत्ते[4] काली परा प्रोक्ता सा तारा परिसुभ्रता[5] ।
सैव श्रीषोडशी देवी महात्रिपुरसुन्दरी ।।६७।।
अभेदं भावयेद् यस्तु स एव श्रीसदाशिवः ।
अन्यथा भावयेद् यस्तु स मूढोऽभून्महेश्वर[6] ।।६८।।
स्वर्गे मर्त्त्ये च पाताले यत्पादे[7] युगमाश्रयेत् ।
स भवेत् कल्पपादपो महःमोक्षानुकूलकः ।।६९।।
यत्रास्ति भोगो न च तत्र मोक्षो यत्रास्ति मोक्षो न च तत्र भोगः।
श्रीसुन्दरीतर्पणतत्पराणां भोगश्च मोक्षश्चकरस्थ एव ।।७०।।

ततः स्वदक्षिणकरतले त्रिकोणं विलिख्य शुद्धियुक्तासवं त्रिकोणमध्ये संस्थाप्य लज्जाबीजं दशधा जप्त्वा ॐ ह्रीं[8] हौं हां ह्रीं अं आं इं ईं उँ ऊँ ऋं लँ एं ऐं ओं

१. ह स न क्ष म न व र यीं
२. अधिकं पाठम्
३. तदा
४. यातु
५. सुप्रभा
६. सतु मूढ़ो महीतले
७. यत् पादाब्ज युगाश्रयात्।
८. ॐ ह्रां ह्रीं द्रां द्रीं अं आं ईं ई उं ऋ ॠ ऌ ॡं एं ऐं ओं औं अं अः जीवतत्त्वं अधः कोणस्थ तत्त्वेन।

औं अं अः। बीजतत्त्वम् अधःकोणस्थपरमतत्त्वेन शोधयामि स्वाहा।। इति शुद्धिखण्डं वामहस्ते नीत्वा गृहणीयात्। वामखण्डं नीत्वा ॐ[१] ह्रीं हौं ह्रां ह्रीं कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं वामतत्त्वस्थं परमतत्त्वेन शोधयामि स्वाहा। इति पूर्ववत्। ततो दक्षिणखण्डं नीत्वा ॐ ह्रीं हौं ह्राँ ह्रीं दँ धँ नँ पँ फँ बँ भँ मँ यँ रँ लँ वँ शँ षँ सँ दक्षकोणस्थतत्त्वेन शक्तितत्त्वं शोधयामि स्वाहा। इति पूर्ववत्।[२] ततश्च साधकेभ्यः शक्तिभ्यश्च पात्रं शुद्धिञ्च दद्यात्। सर्वे यथाविधिकर्म कुर्वन्ति। ततः कुण्डलिनीमुखे पात्रं गृहीतव्यम्।

पात्रोपरि जपेन्मन्त्रं सप्तधा साधकोत्तमः।
गुरुं स्मृत्वा पिबेन्मद्यं सर्वकामार्थसिद्धिदम्।।७१।।

ततः कुण्डलीनीमुखे मन्त्रपूर्वकं जुहुयात्। प्रथमपात्रं नीत्वा द्वितीयपात्रे शक्त्युच्छिष्टं नीत्वा च पिबेत्। तथा च-

शक्त्युच्छिष्टं पिबेन्मद्यं वीरोच्छिष्टन्तु चर्वणम्।
वीरोच्छिष्टात् पृथक् पाने पशुपानं प्रकीर्तितम्।।७२।।
निन्दाश्रुतिः साधकानां हिंसाज्ञानं कुले यतः।
निन्दा वा शाक्तकौलानां साधकानां न पूजनम्।।७३।।
अनिच्छया शक्तियोगं चक्रे वापि च मैथुनम्।
कामतः शक्तियोगं वा न ध्यानं दैवते न वा।।७४।।
जपहोमविहीनं यद् भक्तिहीनं कुलार्चनम्।
प्रकटं साधकानाञ्च असन्तुष्टश्च[३] साधकः[४]।।७५।।
एष धर्मयुतः कौलो भ्रष्टः कौलः प्रकीर्त्तितः।
पञ्चमं पुरतः कृत्वा चतुर्थे जपमाचरेत्।
जपपूजां विना पानं पशुपानं प्रकीर्त्तितम्[५]।।७६।।

---

१. ॐ द्रीं हौं द्रीं द्रीं कंखं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं दक्ष कोणस्थ।

२. अथो मध्य खण्डं नीत्वा ॐ द्रीं हौं द्रीं द्रीं हं लं क्षं मध्य एव मध्यस्थ मातत्त्वेनमायातत्त्वं शोधयामि स्वाहा। इति पूर्ववत्।

३. असन्तोषश्च

४. साधके

५. श्रीगुरुः

अथ पात्रबन्दनमन्त्राः

श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं ।
क्षेत्राधिष्ठितयोगिभिर्जनगणैः[१] सिद्धैः समाराधितम् ।।
आनन्दार्णवकं महात्मकमिदं साक्षातलिखण्डामृतम् ।
वन्दे श्री प्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ।।७७।।
हेमं नीलकलान्वितं सुमहिमायोगं महामांसकम् ।
किञ्चिन्नेत्रविचञ्चलं रविवरच्छायापदं शाश्वतम् ।
आनन्दादिमहार्णवे विगलितं ज्ञानं महामोक्षदम् ।
वन्दे पात्रमहं द्वितीयमधुना स्वात्मावरोधक्षमम् ।।७८।।
महापद्मे करे पद्मे योनिमालोकयन् धिया ।
दग्धमीनसमोपेतं वन्दे पात्रं तृतीयकम् ।।७९।।
मुद्रारूपां योनिमुद्रां सिद्धिदां सिद्धरूपिणीम् ।
भजामि परया भक्त्या चतुर्थं पारयाम्यहम् ।।८०।।
योनिना[२] लिङ्गमाप्रोतं पञ्चमं परिकीर्त्तितम् ।
तत्तद्भूतेनामृतेन कल्पयामीह[३] पञ्चमम् ।।८१।।
सदानन्दप्रदं द्रव्यं महानन्दप्रदायकम् ।
गुरुपादगते दाने षष्ठे पात्रं नमाम्यहम् ।।८२।।
समुद्रसप्तसम्भूतं समुद्रवारिजं शुभम् ।
समुद्रे निगमे प्राप्ते गृह्णामि सप्तमीं सुधाम् ।।८३।।
अष्टदुर्गा शक्तिरूपा महिषासुरनाशिनी ।
पुनाति सा जगद्धात्री नवमे शङ्करप्रियाम् ।।८४।।
महाविद्या दश प्रोक्ता महतीसिद्धिदायिनी ।
महामोहविनाशञ्च मोहिनी दशमे करे ।।८५।।
एकादश महारुद्रा वसुसिद्धिप्रदायकाः ।
चतुःषष्टिसिद्धिदांस्तान् वन्दे चैकादशे करे ।।८६।।

---

१. क्षेत्राधिश्वर योगिनी जनगनैः
२. योनि मात्तङ्गनोपेतं मा प्रेतं
३. कल्पयामिह

द्वादशे द्वादशादित्याः सदा तर्पणतत्पराः।
वामनेत्रस्वरूपेण द्वादशं वन्दयाम्यहम् ।।८७।।
त्रयोदशे महाविद्या शारदा परिभूयते।
वाचां सिद्धिप्रदां देवीं वन्दे पात्रे त्रयोदशे।।८८।।

इति त्रयोदशपात्रवन्दनं सदा सुखम्[1] अन्यद्यत्प्रकारान्तरं पात्रवन्दनं ग्रन्थान्तरे आगमे दृश्यते तत् काली–तारा–त्रिपुरसुन्दरीतरविषयपरम्।

यावन्न चलते चक्षुर्यावन्न चलते मनः।
तावत् पानं प्रकर्त्तव्यं मन्त्रसिद्धिप्रदायकम् ।।८९।।
पीत्वा[2] पीत्वा पुनः पीत्वा पुनः पतति भूतले।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते।।९०।।

अथ तारानिगमोक्तकेवलश्रीताराविषये सर्वपात्रवन्दनमन्त्रश्चैकएव–

ॐ नाहं कर्त्ता कारयित्वा न च मे कार्यं नाहं
भोक्ता भोजयित्वा वा न च भोज्यम्[3]।
अहं चिदात्मा स्वमेव तेजः स्वयं गुरुर्विष्णुरहं सरूपः नान्यं
स्मरेन्न च भजे परिहाय चाद्यां नान्यां तपो न च गतिः परिहाय चाद्याम्।।

इति पात्रं[4] सर्वत्रशुद्धियुक्तेन। प्रथमं यथाशक्ति पिबेत्। ततः पञ्चतत्त्वक्रमः। प्रथमं वामहस्ते त्रिकोणाकारपानमुद्रया द्रव्यं नीत्वा दक्षिणहस्ते शुद्धिं नीत्वा मूलमुच्चार्य–इदं शुद्धियुक्तासवं श्रीमत्तारा–एकज़टामहादेव्यै नमः। सर्वत्र शुद्धिसंस्कारे मूलमन्त्रजपः। इति।

ततः वामहस्ते मांसं धृत्वा मूलं सप्तधा जप्त्वा एषा मांसशुद्धिः श्रीमत्तारा एकजटादेव्यै नमः। ततो मीनं वामहस्ते नीत्वा एषा मीनशुद्धिः श्रीमत्तारा एकजटादेव्यै नमः। तत च शक्तिलिङ्गमुद्रां प्रदर्श्य एषा शक्तिः। श्रीमत्तारा एकजटादेवी महानन्दकल्पनाय रक्ष रक्ष पश्य पश्य प्रसीद प्रसीद अस्या योनौ मम सिद्धिं देहि देहि ॐ ॐ ॐ स्वाहा।। इति निवेद्य यथायोग्यमानन्दं कृत्वा

---

१. सुखदम्
२. पीत्वा
३. भोक्षमं
४. पानं ख.पु.पा.

चक्रादितरस्थाने शक्तिं नीत्वा स्वपुरतः पुरीमुखां[१] संस्थाप्य तदुपरि बिन्दुविनिक्षेपं कृत्वा योनिलिङ्गमुद्रां प्रदर्श्य अदीक्षिता चेत् कर्णे लज्जाबीजमुक्त्वा कृताञ्जलिः।

शक्तिरूपे महादेवि योनिसिद्धिस्वरूपिणी।
प्रसीद जगतां सृष्टिकारिणी ब्रह्मरूपिणी ।।९१।।
योनिरूपा महाविद्या योनिसिद्धिप्रदायिनी।
सृष्टिः प्रजायते यस्मात् पुत्रत्वेनापि पाल्यते ।।९२।।
पुनः प्रलीयते योनौ सृष्टिस्थितिलयालये।
साधयामि महामन्त्रं तेन सिद्धिं विधेहि[२] मे ।।९३।।

ॐ हौं ह्रौं[३] क्लीं कामेश्वरि महात्रिपुरे त्रिपुरालये ! ममैवं सिद्धिं देहि देहि स्वाहा। इति पठित्वा[४] लिङ्गे शापमन्त्रं[५] सप्तधा जप्त्वा दिगम्बरो भूत्वा तां दिगम्बरीकृत्वा पद्मं दृष्ट्वा तत्र बिम्बं रविबिम्बं चामरं सफरीञ्चापि शिखरं तथा नाभौ शतं जपेत्।

योनिमध्ये शतं जप्त्वा प्रवेशं कारयेद्बुधः।
महायोनिमयीं देवीं पार्वतीं परिभावयेत् ।।९४।।
स्वयं शिवस्वरूपः स्यात् आत्मानं शिवरूपिणम्।
भावयित्वा[६] निर्विकारं स्वयम् आढ्यं विघातयेत् ।।९५।।
साधको भावयेद्यस्तु कामुको वा प्रजायते।
पच्यते नरके घोरे न मोक्षः कोटिजन्मतः ।।९६।।
तस्मात् सर्वप्रयत्नेन निर्विकारो[७] भवेत् स्वयम्।
अन्यथा सिद्धिहानिः स्यात् पतते नरके स्वयम् ।।९७।।
ॐ नाभिचैतन्यरूपाग्नौ हविषा मनसा श्रुचा।
ज्ञानं[८] प्रदीप्यते नित्यमक्षवृत्तिर्जुहोम्यहम् ।।९८।।
ॐ धर्माधर्महरेर्दीप्त आत्माग्नौ मनसा श्रुचा।
सुषम्नावर्त्तना नित्यमक्षवृत्तिर्जुहोम्यहम् ।।९९।।

---

१. परां मुखां
२. विदेहि
३. द्रौं
४. इत्युक्तवा
५. पाशमन्त्रं
६. निर्विकारः स्वयं द्राढ्यं विद्यातयेत्
७. निर्विकारः स्वयं भवेत्
८. ध्यानप्रदीपे

इति त्यजेत्।

ततस्तत्रासने[1] स्थित्वा सहस्रं जपेत् । ततः पात्रं प्रक्षाल्य अर्घ्ये च जले मायाबीजं विलिख्य तत्रस्थेन मृदा–

ॐ ॐ यं यं स्पृशामि पादेन यो मां पश्यति चक्षुषा।
स एव दासतां याति यदि शत्रुसमो[2] भवेत्।।१००।।

इति ललाटे टीकां नीत्वा[3] विहरेत्। द्रव्यं वारणाक्षितोलकमितं[4] पात्रे सदावेशयेत्।

साधकेभ्यश्च शक्तिभ्यो दत्त्वा पात्रं समानयेत् ।
साधयेत् त्रिविधैर्भावैर्दिव्यवीरपशुक्रमैः ।।१०१।।
दिव्यास्तु देववत् प्रायाः सदाचारपरायणाः।
ऋणाधानं तथा पाठ्यं हिंसाञ्चैव विशेषतः।।१०२।।
स्नानं सन्ध्याञ्च पूजाञ्च दिवा कुर्यात्त्रयं त्रयम् ।
परस्त्रीमाहरदबोध्या[5] परं पुत्रवदिष्यते ।
सदा सत्त्वगुणं स्मृत्वा ब्रह्मचारी भवेद्ध्रुवम् ।।१०३।।
योषावक्त्रं उरुञ्चापि कचं वा साधकोत्तमः।
दृष्ट्वा मन्त्रं जपेल्लक्षं द्वादशस्वर्णमुत्सृजेत् ।।१०४।।
तर्पयेत् सुधया देवीं तारां तारकदायिनीम् ।
साक्षादिन्द्रो भवेत् सोऽपि यदि योषां न च स्पृशेत्।।१०५।।
योषास्पर्शनमात्रेण दिव्यभावो वृथा भवेत् ।
यावत्तपस्या कर्त्तव्या तावद् योषां विवर्जयेत् ।।१०६।।
मत्स्यमांसं तथा तैलं स्निग्धान्नं[6] मोदकन्तथा ।
स्त्रीशूद्रो नैव द्रष्टव्यो चान्यथा पतनं भवेत्।।१०७।।
याते[7] सिद्धे च तपसि ऋतुकाले व्रजेत् स्त्रियम्।
पञ्चपर्व वर्जयित्वा न चेद् भ्रष्टो भविष्यति ।।१०८।।

---

१. ततस्त्रासने
२. शक्र
३. कृत्वा
४. वानगुणाक्षितो न कमितं
५. मातृवत् बोध्या
६. सिद्धान्नं
७. चातौ

अत्रायं संक्षेपः भावसारावल्यां व्याख्यातं वीराचारं[1] चापि संक्षेपतः। कामाख्यामूले व्याख्यातं पश्चाचारस्तु–

चितीं[2] वा कामिनीं वापि शवं वा न च साधयेत्।
कालीतारासु विद्यासु नैवान्तर्यजनञ्चरेत् ।।१०९।।
पीठस्थानं भावयेन्न परयोषां न दर्शयेत् ।
वीरभावकुलो दिव्यस्तस्माद्दिव्यं प्रशंसयेत् ।।११०।।
अशक्तत्वाद्भवेद्वीरो न पशुश्च कलौ क्वचित्।
येन केन प्रकारेण पशुभावं विवर्जयेत् ।
स्वेच्छा यद्भक्षणे चास्ति का सिद्धिस्तेन भावतः[3] ।।१११।।

अथ तारानिगमोक्तश्लोकमेकं शान्तिस्तोत्रम्

ॐ पाहि त्वं करुणामयि प्रियतमं सत्साधकं रक्षतु।
भ्रष्टान्नाशय नाशय प्रियतमावक्त्रारविन्दं मया ।
नित्यं देहि साधु[4]सुधाचयमयीं सिद्धिं शिवे सिद्धिदम्।
ज्ञानं मोक्षविधायकं कुरु शिवे संहारिणी पाशवे ।।११२।।
इति शान्तिस्तोत्रं पठित्वा तु यथेच्छं[5] विहरेन्नरः ।
चक्रमध्ये भवेद् या सा वक्तव्या न च कुत्रचित् ।।११३।।
कथा प्रातर्भवेत् सापि नाशाय नरकाय च।
चक्राकारं चरेच्चक्रं पङ्क्त्याकारमथापि वा ।।११४।।
प्रविष्टे भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः।
निवृत्ते भैरवीचक्रे तथा[6] सर्वे पृथक् पृथक् ।।११५।।
गन्तुं चक्रात् समायातं नत्वा नत्वा पुनः पुनः ।
अन्यथा मरणं तस्य गतिः स्याद् यमसादने ।।११६।।
अन्यचक्रस्थ[7] - दूरस्थं स्वचक्रं वा सकृत् सकृत् ।
स भवेत्तारकापुत्रो वसुसिद्धीश्वरो भवेत् ।।११७।।

---

१. बीरश्चापि
२. चितां
३. भारतः
४. सुधां
५. यथेष्टं विहरेत
६. सर्वे वर्णा
७. चक्रश्च।

अश्वमेधसहस्राणि वाजपेयशतानि च।
कलामात्रेण देवेषु कोट्यश्वमेधजं फलम्।।११९।।
उपवासं भृगोः पातं सन्ध्या सव्रतधारणम्।
तीर्थं पर्यटनञ्चैव कौलं पञ्च विवर्जयेत्।।१२०।।
महापीठं व्रजेन्नित्यं न चेत् पीठमनुत्तमम्।
तारापुरं महापीठं गन्तव्यं यत्नतः सदा।
लक्षत्रयजपाद्देवि सर्वसिद्धीश्वरो भवेत्।।१२१।।
ईशाने चक्रनाथस्य वैद्यनाथस्य पूर्वतः।
तारापुरमिदं ख्यातं नगरं भुवि दुर्लभम्।
तत्र यत्नेन गन्तव्यं यत्र ताराशिवालयम्[१]।।१२२।।

इति संक्षेपः।

।।इति श्रीब्रह्मानन्दपरमहंसपरिव्राजकावधूतविरचिते
ताराहस्ये तत्त्वादि-रहस्यम्।।

◆◆◆

अथ पूजाप्रकरणम्

अथ पूजा। तथा च तारानिगमे तारासारे च-

आदौ जलञ्च संशोध्य क्षालनं हस्तपादयोः।
मूलेन तिलकं कुर्याद् विभूत्या तु[२] त्रिपुण्ड्रकम्।।
रक्तचन्दनटीकां वा सिन्दूरस्यापि वा पुनः।।१२२।।

ॐ मणिधरि वज्रिणि सर्ववशङ्करि हुं फट् स्वाहा। इति शिखां बध्वा ॐ ह्रीं स्वाहेति[३] आचमनम्। ॐ गुरुः प्रथमं पूजा। पूजागृहद्वारमागत्य ॐ ब्रजोदके हुं फट् स्वाहा। इति जलमधिष्ठाय। ॐ विशुद्धधर्मगायत्री सर्वपापानि शमयाशेष-विकल्पमानीय हुं फट् स्वाहा। इति ततो पादौ च प्रक्षाल्य मूलेन तिलकं विभूत्या त्रिपुण्ड्रं सिन्दूरगोरोचनान्यतमटीकां गृहीत्वा। ॐ मणिधरि वज्रिणि सर्ववशङ्करि हुं फट् स्वाहा। इति शिखां बध्वा ॐ ह्रीं[४] स्वाहा इत्याचम्य।।

---

१. शिलामयी
२. विभूत्यादि
३. ॐ द्रीं स्वाहाइत्यांचम्य
४. द्रीं

ततः पीठं चिन्तयेच्च कृताञ्जलिपरो भवेत् ।
ताराचमनं ततः कृत्वा सर्वसिद्धीश्वरो भवेत् ।।
वैरोचनादीन् विन्यस्य भूमिं संशोधयेत्ततः ।।१२३।।
ततश्च भूमिं शोधयेत्[१] आसनाधस्त्रिकोणकम्[२]।
संशोध्य आसनं पश्चात् सर्वविघ्नान् विनाशयेत् ।।१२४।।

ततः प्रयोगः

श्मशानं तत्र संचिन्त्य तत्र कल्पद्रुमं स्मरेत् ।
तन्मध्ये मणिपीठञ्च नानामणिविभूषितम् ।।१२५।।
नानालङ्कारसंयुक्तं मणिदेवैर्विभूषितम् ।
शिवाभिर्बहुमांसास्थि मोदमानाः समन्ततः ।।१२६।।
चतुर्दिक्षु शवमुण्डचिताङ्गारास्थिसंयुतम् ।
तन्मध्ये भावयेद् देवीं यथोक्तध्यानयोगतः ।।१२७।।

ततस्ताराचमनम्। ॐ उग्रतारायै[३] स्वाहा। ॐ एकजटायै स्वाहा। ॐ नीलसरस्वत्यै स्वाहा। इत्याचम्य। ॐ ह्रीं[४] स्वाहा इति करौ संशाध्य वधूबीजेन कूर्चेन ओष्ठौ परिशोधयेत्। पुनरस्त्रेण हस्तौ च क्षालयेत् कलसोदितं[५] परम्। ॐ वैरोचनाय नमः नासायां। ॐ शङ्खपाण्डवाय नमः ॐ पद्मनाभाय नमः। चक्षुषोः। ॐ असिताङ्गाय नमः ॐ नामकाय नमः कर्णयोः। ॐ मामकाय[६] नमः ॐ पाण्डवाय नमः नाभौ। ॐ तारकाय नमः हृदि। ॐ पद्मान्तकाय नमः शिरसि। ॐ यमान्तकाय नमः वामबाहौ। ॐ विघ्नान्तकाय नमः दक्षबाहौ। ॐ नरान्तकाय नमः इति ताराचमनम्।

ॐ पवित्रे[७] भूमे हुं फट् स्वाहा।। इति योनिमुद्रया भूमिमभिमन्त्र्य ॐ पवित्रे३ भूमे हुं फट् स्वाहा इति जलसेकाद्भूमिं संशोध्य। तत आसनाधस्त्रिकोणं विलिख्य ॐ आः सुरेखे वज्ररेखे हूं फट् स्वाहा इत्यासनमभ्यर्च्य ॐ ह्रीं[८] आधारशक्तिकमलासनाय नमः इत्यासनमभ्यर्च्य ॐ सर्वविघ्नानुत्सारय हूँ फट् स्वाहा इत्यासनमभ्यर्चयेत्। आसनं तारार्णवे।

---

१. संशोध्य
२. कोणकम्
३. उग्रायै
४. द्रीं
५. शोधितं
६. बामकायं
७. पवित्रवज्रभूमे
८. पाठे नास्ति

कोमलं विष्टरं वापि चूणकं मुदकन्तथा ।
अष्टमासान्तगर्भस्य पतनं मृदुरुच्यते ।।
चतुर्वर्षान्तरालश्च चूडकश्च विधीयते ।।१२८।।
पञ्चाशत् कुशपत्रनिर्मितं भस्मबालुकाभिः शोधितं मार्जितमिति।
ततश्चाण्डालिनीगर्भजातश्च ब्राह्मणोरसात् ।
ब्राह्मणीगर्भजातं वा चाण्डालस्यापि चौरसात् ।।
कमला[१]सनमित्युक्तं मन्त्रसिद्धिप्रदायकम् ।।१२९।।

इत्यादि कमलासनं संशोध्य। ॐ सर्वविघ्नानुत्सारय हूँ फट् स्वाहा इति पुष्पाक्षतक्षेपैर्विघ्नान्नाशयेत्। दिव्यदृष्ट्यावलोकेन खेचरान् वामपादघातत्रयेण भौमान् विघ्नानपसार्य्य–

गणेशादीन् प्रणम्याथ दशदिग्बन्धनञ्चरेत् ।
करौ च गन्धपुष्पाभ्यां शोधयेत्तदनन्तरम् ।।१३०।।

फडिति गन्धपुष्पाभ्यां करौ संशोध्य तालत्रयं दत्त्वा छोटिकाभिर्दशदिग्-बन्धनञ्चरेत्।[२] वस्त्रेण ग्रन्थिं बन्धयित्वा कायवाक्चित्तं विशोधयेत्[३]।।

पुष्पञ्च शोधयित्वा तु भूतशुद्धिं समाचरेत्।
ततश्च कर्त्तारं[४] ध्यात्वा मूलं शीर्षे जपेद्दश ।।१३१।।
एकादश प्रजप्तव्यं प्रतिष्ठामनुरेव च ।
मातृकान्यासकं कृत्वा मातृकायाः षडङ्गकम् ।।१३२।।
कराङ्गं मातृकायाश्च योनिद्वादशकं न्यसेत् ।
प्राणायामं ततः कुर्यादृष्यादिन्यास एव च।।१३३।।

ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हूं फट् स्वाहा। इति वस्त्रान्तरे[५] ग्रन्थिं बध्वा ॐ आं हूं फट् स्वाहा।। इति कायवाक्चित्तं विशोधयेत्। ॐ पुष्प- केतुराजार्हते शताय सम्यक् सम्बद्धाय।। ॐ शताभिषेके हूं फट् स्वाहा।। ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे। पुष्पचयावकीर्णे[६] हूं फट् स्वाहा। इति पुष्पं संशोध्य भूतशुद्धिं कुर्यात्। स्वाङ्के उत्तानौ करौ कृत्वा हंसः इति

---

१. कोमला
२. कृत्वा
३. शोधयेत
४. कृर्तकां
५. वस्त्रान्तिके
६. पकीर्णे

कुलकुण्डलिनीं जीवात्मनं चतुर्विंशतितत्त्वानि सुषुम्नावर्त्मना शिरोवस्थित-परमात्मनि शिवे संयोज्य द्रींकारं रक्तवर्णं नाभौ ध्यात्वा तदुद्भूतेनाग्निना लिङ्गशरीरं संदह्य स्त्रीकारं पीतवर्णं हृदि विचिन्त्य तदुद्भूतेन वायुना भस्म प्रोत्सार्य हुंकारं श्वेतवर्णं शिरसि। विचिन्त्य तदुद्भूतेनामृतेन तदस्थि प्लावितं कृत्वा तस्मिन् विश्वव्यापके[1] वारिणी आ:काराद्रक्तपङ्कजं तदुपरि टांकारात् श्वेतपङ्कजं तदुपरि हूंकारं नीलसन्निभं तदुपरि द्रीं बीजं भूषितां मातृकां[2] ध्यायेत्।

ॐ प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्।
खड्गकर्त्रीसमायोगे[3] सव्येतरभुजद्वयाम् ।।१३४।।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम् ।
पिङ्गोग्रैकजटां ध्यायेन्मौलवक्षोभ्यभूषिताम् ।।१३५।।
अक्षोभ्यो[4] देवीमूर्द्धन्यास्त्रिमूर्त्तिनागमूर्तिरूपधृक्[5]।
चन्द्रसूर्याग्निनयनां मद्यपानप्रमत्तिकाम् ।।१३६।।

इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वान्तर्यजनप्रकारेण मानसोपचारैराराध्य नमस्कुर्यात्। ततः स्वशिरसि ॐ आं ह्रीं क्लीं स्वाहा इत्येकादशधा जप्त्वा प्रतिष्ठाप्य कृताञ्जलिः।

अथ ध्यानम्

पञ्चाशल्लिपिभिर्विभक्तमुखदोः यन्मध्यवक्षःस्थलां।
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् ।।
मुद्रामक्षगुणं सुधाख्यकलसं विद्याञ्च हस्ताम्बुजै-
र्विभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये।।१३७।।

इति मातृकां ध्यात्वा। मातृकान्यासं कुर्यात्।

अथ मातृकान्यास

अं नमो[6] ललाटे। आं नमो मुखे। इं नमो दक्षिणचक्षुषि[7]। ईं नमो वामचक्षुषि[8]। उं नमो दक्षकर्णे। ऊं नमो वामकर्णे। ऋं नमो दक्षनसि। ॠं नमोवामनसि। लं

---

१. अधिकम्
२. कर्तकां
३. समायुक्त
४. अक्षोभ्य.
५. अधिकम्
६. नमः
७. नेत्रे
८. नेत्रे

नमो दक्षगण्डे। ॡं नमो वामगण्डे। एं नमो ओष्ठे। ऐं नमो अधरे। ओं नमो उर्ध्वदन्ते। औं नमोऽधोदन्ते। अं नमो ब्रह्मरन्ध्रे।। अः नमो मुखे। कं नमो दक्ष–बाहुमूले। खं नमः कूपूरि। गं नमः कवंचे। घं नमोऽङ्गुलिमूले। ङं नमोऽङ्गुल्यग्रे।

तथा दक्षहस्तेन चं छं जं झं ञं वामबाहुमूलचतुःसन्ध्यग्रेषु। टं ठं डं ढं णं दक्षपादमूलचतुःसन्ध्यग्रेषु। तं थं दं धं नं वामपादमूलचतुःसन्ध्यग्रेषु।। पं नमो दक्षपार्श्वे। फं नमो वामपार्श्वे। बं नमः पृष्ठे। भं नमो नाभौ। मं नम उदरे[1]। यं नमो हृदये। रं नमो दक्षस्कन्धे। लं नमः ककुदि। वं नमो वामस्कन्धे। शं नमो हृदादिदक्षकरे। षं नमो हृदादिवामकरे। सं नमो हृदादिदक्षपादे। हं नमो हृदादि–वामपादे। लं नमो हृदादि–उदरे। क्षं नमो हृदादि–मुखे।।

मतान्तरे यथा–

ललाटे मुखवृत्ते च चक्षुषोः कर्णयोर्नसोः ।
गण्डयोरोष्ठयोर्वापि दन्तपङ्क्त्योर्विशेषतः ।।१३८।।
ब्रह्मरन्ध्रे पुनर्वक्त्रे अकारादीन् न्यसेद्बुधः।
तर्जनीमध्यमायोगं अकारे विन्यसेत् बुधः ।।१३९।।
मध्यमानामिकायोगान्मध्यं वक्त्रे न्यसेत्ततः[2] ।
मध्यमाङ्गुष्ठयोगेन विन्यसेच्चक्षुषोस्तथा ।।१४०।।
अनामिकाङ्गुष्ठयोगेन कर्णयोर्न्यसनीयकम् ।
तर्जन्यङ्गुष्ठयोगेन नासायोगे परिन्यसेत् ।।१४१।।
अनामामध्यमायोगाद्गण्डयोर्विन्यसेत् सदा ।
अङ्गुष्ठपर्वणा न्यासः कर्तव्यश्चोष्ठयोरपि ।।१४२।।
मध्यमाग्रं समादाय दन्तयोर्न्यसनीयकम् ।
अङ्गुष्ठाग्रं ब्रह्मरन्ध्रे मुखे करतलं विदुः ।।१४३।।
विद्यामुद्रां[3] समादाय हस्तयोः साधकोत्तमः।
विन्यसेद्धस्तपादेषु पार्श्वे पृष्ठे च नाभितः ।।१४४।।
हृदाकारतलं प्रोक्तं मातृकान्यासकर्मणि ।
ककुदि स्कन्धयोर्वापि[4] पुनः सर्वत्र हस्तयोः ।।१४५।।

---

१. जठरे
२. न्यसेत् बुद्धः
३. बिना मुद्रां
४. वापि अधिकम्

ततो मूलेन शिर आदि पादान्तं पादादि शिरोऽन्तं शिर आदि हृदयान्तं हृदादि मुखान्तम् इति व्यापकत्र्यं कुर्य्यात्।

अकारादिपुटैवर्गैर्न्यसेदङ्गकराङ्गकम्।

अथ अङ्गन्यासः

अं कं खं गं घं ङं आं हृदयाय नमः। इं चं छं जं झं ञं ईं शिरसे स्वाहा। उं टं ठं डं ढं णं ऊं शिखायै वषट्। एं तं थं दं धं नं ऐं कवचाय हुं। ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट्। अं यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्याम् अस्त्राय फट्। अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः। इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा। उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्। एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं।ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट्। अं यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्यां अस्त्राय फट्। एवं करन्यासः।

अथ योनिन्यासः

योनिद्वादश विद्याश्च विन्यसेत् साधकोत्तमः।
मूर्ध्नि वक्त्रे तथा कण्ठे हृदये चोदरे तथा।।१४६।।
नाभावाधारपद्मे च पदोर्बाह्वोश्च सर्वतः।
योनिविद्या योनिनित्या योनिरूपा तथैव च।।१४७।।
योनिमध्या योनिसिद्धा योनिक्लृप्ता च योनिदा।
योनिहा योनिसाध्या च योनिज्ञाना च योनिपा।।
योनिपुण्या तथा न्यासश्चतुर्वर्गस्य सिद्धये।।१४८।।

मृगमुद्रया मूर्ध्नि ओं योनिवेद्यायै[1] नमः। वक्त्रे ॐ योनिमध्यायै नमः।। उदरे ॐ योनिसिद्धायै नमः। नाभौ ॐ योनिक्लृप्तायै नमः। मूलाधारे ॐ योनिदायै नमः। दक्षपादे ॐ योनिहायै नमः।। वामपादे ॐ योनिसाध्यायै नमः। दक्षबाहौ ॐ योनिज्ञानायै नमः।। वामबाहौ ॐ योनिरूपायै नमः। सर्वाङ्गे ॐ योनिपुष्पायै[2] नमः। इति विन्यसेत्। इति द्वादशयोनिन्यासः।

---

१. वेधायै
२. योनिपुण्यायै

अथ प्राणायामः

दक्षहस्ताङ्गुष्ठेन दक्षनासापुटं धृत्वा मूलं षोडशवारं जप्त्वा वायुं पूरयेत्। ततो नासापुटौ धृत्वा चतुःषष्टिवारजपेन। कुम्भयित्वा वामनासायां कनिष्ठानामिकाभ्यां धृत्वा द्वात्रिंशद्वारजपेन दक्षिणेन रेचयेत्। पुनर्दक्षिणेनापूर्य्य वामेन रेचयेत्।[1]

कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयः पूरककुम्भकरेचकैः ॥१४९॥
इत्थमेव वारत्रयं कुर्यादिति प्राणायामः ।

अथ ऋष्यादिन्यासः

शिरसि ॐ अक्षोभ्य-ऋषये नमः। मुखे ॐ बृहस्पतिच्छन्दसे नमः। हृदि श्रीमत्तारायै एकजटायै देव्यै नमः। मूलाधारे हं बीजाय नमः। पादयोः फट् शक्तये नमः। सर्वाङ्गे निजबीजकीलकाय नमः॥

इति ऋष्यादिन्यासः।

अथ पीठन्यासः

पीठन्यासं ततः कृत्वा पीठशक्तिं न्यसेत्ततः ।
तत्त्वन्यासं विधायाथ बीजन्यासं समाचरेत् ॥१५०॥
कराङ्गञ्च षडङ्गञ्च न्यस्त्वा वर्णान्न्यसेत्ततः ।
संशोध्य यन्त्रं देहे तु[2] पीठपूजां समाचरेत् ॥१५१॥
गणेशं वटुकञ्चैव क्षेत्र[3]पालञ्च योगिनीम् ।
पीठपूजां ततः कृत्वा पीठशक्तिं[4] प्रपूजयेत्॥१५२॥
षोढां कृत्वा ततो मन्त्री अर्घ्यं कृत्वा च तत्पुनः ।
व्यापकं पञ्चधा कृत्वा पूजयेत् परदेवताम् ॥१५३॥

हृदि हस्तं दत्त्वा मृगमुद्रया हृत्पद्मस्य[5] केशरेषु–

ॐ श्मशानाय नमः। ॐ कल्पवृक्षाय नमः। ॐ मणिपीठाय नमः। ॐ नानालङ्कारेभ्यो नमः। ॐ मुनिभ्यो नमः। ॐ देवेभ्यो[6] नमः।

---

१. पुनर्वामेनापूर्य दक्षिणेन रेचयेत्।
२. व
३. क्षत्र
४. शक्तीः
५. पद्म
६. देवताभ्यो

ॐ बहुमांसास्थिमदमानशिवाभ्यो नमः चतुर्दिक्षु। ॐ शवमुण्डचिताङ्गारास्थिभ्यो नमः। इति पीठन्यासः।

हृदि ॐ लक्ष्म्यै नमः। ॐ सरस्वत्यै नमः[१]। ॐ प्रीत्यै नमः। ॐ कीर्त्यै नमः। ॐ शान्त्यै नमः। ॐ तुष्ट्यै नमः। ॐ पुष्ट्यै नमः।

अथ तत्त्वन्यासः

ॐ आत्मतत्त्वाय स्वाहा इति आधारादि हृत्पर्यन्तम्। ॐ विद्यातत्त्वाय स्वाहा इति हृदादिमुखपर्यन्तम्। ॐ शिवतत्त्वाय स्वाहा मुखादिब्रह्मरन्ध्रान्तम्। इति तत्त्वन्यासः।

अथ बीजन्यासः

मन्त्रं पञ्चखण्डं कृत्वा ब्रह्मरन्ध्रात् ललाटान्तम्। आद्यबीजं नमोऽन्तं न्यसेत्। ललाटात् मुखान्तं द्वितीयबीजं नमः। मुखाद्कण्ठं तृतीयबीजं नमः। कण्ठात् हृदयान्तं चतुर्थबीजं नमः। हृदयान्मुखान्तं पञ्चमबीजं नमः।

इति बीजन्यासः

अथ कराङ्गन्यासः

हकारं[२] रेफसंयुक्तं षड्दीर्घेण समन्वितम्।
चन्द्रखण्डयुतं कृत्वा विन्यसेत् साधकोत्तमः ।।१५४।।
एकजटातारिणी च न्यस्या वज्रोदका तथा।
उग्रजटा ततो न्यस्या महाप्रतिसरा तथा ।।
पिङ्गोग्रैकजटा पश्चात् कराङ्गेषु षडङ्गतः ।।१५५।।

तथा ह्रां[३] एकजटायै अङ्गुष्ठाभ्यां नमः।। ह्रीं तारिण्यै तर्जनीभ्यां[४] स्वाहा। ह्रूं वज्रोदके मध्यमाभ्यां[५] वषट्। ह्रैं उग्रजटे[६] अनामिकाभ्यां हुं। ह्रौं महाप्रतिसरे[७] कनिष्ठाभ्यां वौषट्। ह्रः पिङ्गोग्रैकजटे करतलकरपृष्ठाभ्याम् अस्त्राय फट्।

इति कराङ्गन्यासः।

---

१. सरस्वत्यै
२. हकारो
३. यथाद्रां
४. द्रीं तारिण्यै शिरसे स्वाहा।
५. द्रूं वज्रोदके शिखायै वषट्।
६. कवचाय
७. द्रौं महाप्रति सारे नेत्राय वौषट्

अथ षडङ्गन्यासः

ह्रां एकजटायै हृदयाय नमः। ह्रीं तारिण्यै शिरसे स्वाहा। ह्रूं वज्रोदके शिखायै वषट्। ह्रैं उग्रजटे कवचाय हुं। ह्रौं महाप्रतिसरे नेत्रत्रयाय वौषट्। ह्रः पिङ्गोग्रैकजटे करतलकरपृष्ठाभ्याम् अस्त्राय फट्। इति षडङ्गन्यासः।।

अथ मन्त्रशोधनप्रकारः

अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं नमो हृदि। एं ऐं ओं औं अं अः कं खं गं घं नमो दक्षबाहौ।। ङं चं छं जं झं ञं टं ठं डं ढं नमो वामबाहौ। णं तं थं दं धं नं पं फं बं भं नमो दक्षपादे।। मं यं रं लं वं शं षं सं हं लं क्षं नमो वामपादे। ततः श्रीमदेकजटामन्त्रं उद्धृत्य संस्कुर्यात्।। ॐ आः सुरेखे वज्ररेखे हुं फट् नमः। इति योनिमुद्रां प्रदर्श्य यन्त्रं शोधयेत्।।

अथ पूजा-प्रारम्भः

ततः पूजामारभेत्। पूर्वादितः ॐ ह्रीं गां गणपतये नमः। दक्षिणे ॐ ह्रीं वां वटुकाय नमः। पश्चिमे ॐ ह्रीं क्षां क्षेत्रपालाय नमः। उत्तरे ॐ ह्रीं यां योगिनीभ्यो नमः। पीठन्यासवत्[1] पीठपूजां कृत्वा पूर्वाद्यष्टदले पीठशक्तिं सम्पूज्य मध्ये हसौः सदाशिवमहाप्रेतपद्मासनाय नमः।

ततः स्ववामे बिन्दुमध्यत्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा तत्र श्रीमदेकजटा-देव्या अर्घस्थापनाय नमः।। तत्र त्रिपदिकामावाह्य जलेनाभ्युक्ष्य फडिति पात्रं प्रक्षाल्य तत्र संस्थाप्य श्रीमदेकजटादेव्या ॐ अर्घ्यपात्राय नमः।

ततो मूलेनापूर्य रक्तचन्दनबिल्वपत्रदूर्वाक्षतादीन्निक्षिप्य विलोममातृकावर्णैः मूलेन च बिन्दुश्रुतसुधामयजलेन शङ्खमापूर्य तत्र गङ्गे चेत्यादिनाङ्कुशमुद्रया अर्घमावाह्य वं इति धेनुमुद्रया अमृतीकृत्य योनिमुद्रां प्रदर्श्य मत्स्यमुद्रयाच्छाद्य तत्र देवीं ध्यात्वा पुष्पाञ्जलिं दत्त्वा, अंकुशमुद्रया षडङ्गानि विन्यस्य मूलमन्त्रं दशधा जप्त्वा तज्जलं। किञ्चिद् अन्यजले निक्षिप्य पुष्पादिनात्मानं पूजोपकरणञ्चाभ्युक्ष्य पञ्चार्घ्यं कृत्वा पञ्चधा। व्यापकं कृत्वा देवीं ध्यायेत्।

---

१. पीठन्यासन्तं

२. तज्जलं

ध्यायेत् श्रीतारकादेवीं करकच्छपमुद्रया।
विशेषतः फलार्थी च ध्यायेद् योनिमुद्रया।।१५६।।
प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्तृखर्परभुजा हुंकारबीजोद्भवा।
खर्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता।
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम्।।१५७।।

इति ध्यात्वा यन्त्रे तत् पुष्पं दत्त्वा ध्यानरहस्यं विभाव्य आवाहयेत्।

यथा-सर्वामभिनवजलधरनीलां लम्बोदरीं व्याघ्रचर्मावृतशोभितकटीम्। पीनोन्नतपयोधरां रक्तवर्त्तुलनेत्रत्रयां पृष्ठेतिनीलजटाजूटां शीर्षेऽक्षोभ्यमहादेवकृत-नागफड़ाति[1]शोभितां पार्श्वद्वये लम्बमाननीलोत्पलभालां पञ्चमुद्रास्वरूपपशु-त्रिकोणाकारकपालपञ्चतयां अतिनीलजटाजूटां विस्तीर्णचमरिकाकेश इव महाविगलितचिकुरां शुभ्रवर्णतक्षकनागकृतकङ्कणां रक्तवर्णनागकृतस्वल्पहारां चित्रितवर्णशेषनागकृतहारां स्वर्णवर्णस्वल्पनागपादाङ्गुलीयकां ईषद्रक्तनागकृत कटिसूत्रां दूर्वादलश्यामलनागकृतवलयां चन्द्रसूर्यवह्निकृतनेत्रत्रयां कोटि-कोटि-बालरविच्छविकृतदक्षिणनेत्रां कोटि-कोटि-बालचन्द्रकृतवामनेत्रां लक्षलक्षदहन-कृत-ऊर्ध्वनेत्रां ललज्जिह्वां महाकालशवरूपहृदयस्थितसङ्कुचित-दक्षिणचरणां शवपादद्वयस्थितप्रसारितवामचरणाम्।

एतेन प्रत्यालीढपदां सद्यश्छिन्नगलरुधिरान्योन्यकेशग्रथितमुण्डमालावलीरम्यां सर्वस्त्र्यलङ्कारशोभिताम्। महामोहविमोहिनी महामोक्षविदायिकां[2] विपरीतरताशक्तां रत्यावेशस्मेराननाम्। दक्षिणहस्ताधोधृतकर्तृकां तदूर्ध्वे लक्षचन्द्रहासखड्गधरां वामो[3]र्ध्वे सर्वशिष्याणां भयहरणाय आसवगलितनीलोत्पलकिञ्चिद्-विकस्मररक्तनाग[4]धरां तदधः कपालचसकसद्यःकृत्तमुण्डशोभितभुजां हुङ्कारबीजोद्भवां सर्वब्रह्माण्डानां कर्त्रीं हन्त्रीं क्षपयत्रीं[5] षोडशाब्दां सर्वज्ञानविदायिनीं ध्यात्वाऽऽवाहयेत्।

---

१. फडा।
२. प्रदायिकाम्
३. कामौर्द्धे
४. नीलधरां
५. पालयित्रीं

ॐ देवेशि भक्तिसुलभे परिवारसमन्विते।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ।।१५८।।

इत्युक्त्वा ऊर्ध्वाञ्जलिना श्रीमदेकजटे देवि इहागच्छागच्छ, अधोमुखाञ्जलिना इह तिष्ठ तिष्ठ, गर्भाङ्गुष्ठमुष्टिभ्याम् इह सन्निधेहि, तदधोमुखेन इह सन्निरुद्धस्व, हस्तं भ्रामयित्वा अत्र अधिष्ठानं कुरु मम पूजां गृहाण।

आकारं बिन्दुसंयुक्तं मायापाशविभूषितम्।
वह्निजाया च हंसान्तः प्रतिष्ठामन्त्र ईरितः ।।१५९।।

ॐ आं ह्रीं क्रों स्वाहा हंसः श्रीमदेकजटादेवतायाः[1]। प्राणा इह प्राणाः एवं जीव इह स्थितः। एवं सर्वेन्द्रियाणि इह स्थितानि एवं वाङ्मनश्चक्षुः[2]श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इत्यनामाङ्गुष्ठसंयुक्ताग्रेण प्रतिष्ठापयेत्। ततो मूलं दशधा जप्त्वा धेनुयोनिमत्स्याङ्कुशशङ्खखड्गमृगंगालिनीमुद्राः प्रदर्श्य श्रीमदेकजटे[3] देवी वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा। इति पुष्पाञ्जलीन् दत्त्वा पूजयेत्।

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनं स्नानं वसनाभरणानि च।
सुगन्धिकुसुमो धूपदीपनैवेद्यवन्दनम्।।१६०।।

दशोपचारैर्वा पञ्चोपचारैर्वा पूजयेत्। पुरुषधिया सोऽहमिति मत्त्वा ॐ वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा इत्युच्चार्य्य पूजयेत्। एतत् पाद्यं नमः पाद्यं गृहीत्वा तदुपरि पूजामन्त्रम् एकजटादेवतायै एतत् पाद्यं नमः। इति कृतमुष्टिप्रसारिताङ्गुष्ठतर्जनीभ्यां दद्यात्। तथा इदमर्घ्यं स्वाहा।

पाद्यञ्च पादयोर्दद्यात् मौलौ चार्घ्यं निवेदयेत्।
गन्धं भाले तथा पुष्पं पादयोश्च निवेदयेत्।।१६१।।

इदं स्नानीयं स्वधा[4]। मृगमुद्रया गन्धोयं[5] नमः। अञ्जलिना पुष्पाणि वौषट्। ततः स्ववामे घण्टां चानीय गन्धपुष्पाभ्यां ॐ जयध्वनिमन्त्रमातः स्वाहा इति घण्टां सम्पूज्य धूपं पात्रोपरि संस्थाप्य पूजामन्त्रं जप्त्वा वामहस्ते धृत्वा एष

---

१. देव्या
२. श्रोत्र
३. श्रीमदेकर्जटे
४. स्वाहा
५. गन्धं

धूपः स्वधा। इति निवेद्य मृगमुद्रयां नीत्वा वामहस्तेन घण्टां वादयन् आनासामुखतो धूपसमीरणं घ्रापयेत्। तथा दीपोयं स्वाहा। दृष्टिपर्यन्तं दीपं दत्त्वा निराजयेत्। तथान्यत् सर्वं मालादिकं देयम्।

स्ववामे त्रिकोणं विलिख्य तत्र नैवेद्यमानीय इति धेनुमुद्रयाऽमृतीकृत्य योनिमुद्रां प्रदर्श्य। तत्र मूलं दशधा जप्त्वा फडिति अस्त्रेण[1] संरक्ष्य गालिनीमुद्रां प्रदर्श्य वामहस्तानामिकांगुष्ठाभ्यां धृत्वा अर्घ्योदकेन एतन्नैन्नैवेद्यं सोपकरणं श्रीमदेकजटादेव्यै नमः। स्त्रीशूद्रेतरस्तु ॐ अमृतोपस्तरणमसि स्वाहेति जलं दत्वा वामहस्ते ग्रासमुद्रां बद्ध्वा दक्षहस्तेन प्राणादिमुद्राः प्रदर्शयेत्।

ततः प्राणार्थजलं ततस्ताम्बूलं चुल्वकादिशेषं[2] समापयेत्। घण्टावाद्यैः तथा यथाशक्त्युपचारैः सम्पूज्य योनिमुद्रां प्रदर्श्य देवि आज्ञापय परिवारांस्ते पूजयामि इत्युक्त्वा षडङ्गानि सम्पूज्य देव्या मौलौ ॐ अक्षोभ्य वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा इत्यादिना सर्वत्राभ्यर्चयेत्। देव्या दक्षहस्तोर्ध्वे खड्गं तदधः कर्त्तृकां बामोर्ध्वे इन्दीवरं तदधः सद्यःकृत्तशिरःसहितचसकं सम्पूज्य वायव्यात् शिवकोणपर्यन्तं गुरुपंक्तिं प्रपूजयेत्।

ऊर्ध्वकेशव्योमकेशनीलकण्ठवृषध्वजान् ।
तत्रैवानन्दनाथान्तान् पूजयित्वा फलं लभेत् ।।१६२।।
तारावती भानुमती जया विद्या महोदरी ।
अम्बान्ताः पूजयेच्चैता इष्टमोक्षार्थसिद्धये ।।१६३।।

वशिष्ठमीननाथश्च हरिनाथकुलेश्वरौ। विरूपाक्षमहेश्वरसुखपारिजाताः। महाकालरुद्राणीं[3] उग्रां भीमां घोरां भ्रामरीं कालकर्णीं[4] विश्वरूपाञ्च।

ॐ ऊर्ध्वकेशानन्दनाथ वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा। व्योमकेशानन्दनाथ -नीलकण्ठानन्दनाथ-वृषध्वजानन्दनाथान् एवं तारावत्यस्व[5]-भानुमत्यस्यं[6]- जयावत्यस्य[7]-विद्यावत्यस्य[8]-महोदर्यस्य तथा वशिष्ठानन्दनाथ- मीननाथानन्दनाथ-हरिनाथानन्दनाथ-कुलेश्वरानन्दनाथ-महेश्वरानन्दनाथ[9]

---

१. मन्त्रेण
२. ततश्चुलुकादि
३. महाकालीं रुद्राणीं
४. कालरात्रीं
५. द्य
६. द्य
७. द्य
८. द्य
९. विरूपाक्षानन्दनाथ

सुखानन्दनाथ-पारिजातानन्दनाथान् तथा महाकालरुद्राव्यस्व-उग्रास्व-भीमास्व-घोरास्व-भ्रामर्यस्व-कालरात्र्यस्व-विश्वरूपास्वाः। तत पूर्वादिवामावर्त्तेनाष्टदले पूजयेत्। ॐ विरोचनवज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा।

एवं शङ्ख-पाण्डर-पद्मनाभ-असिताङ्ग-नामक-पाण्डर-तारक-पद्मान्तक-वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहा इति पूर्वद्वारे तथा उदीच्यां यमान्तकः पश्चाद्विघ्नान्तकः। दक्षिणे नरान्तकः एतान् संपूज्य पुष्पाञ्जलिं दत्त्वा ध्यात्वा पाद्यार्घ्यादिना देवीं संपूज्य। वामे त्रिकोणं षट्कोणं वृत्तं चतुरस्रं विलिख्य तत्र बिभरितसाधारपात्रं समांसतण्डुलदधिहरिद्रादग्धमीनासवपिन्नाकलवणार्द्रकान्यतमं गृहीत्वा दक्षहस्ते जलं नीत्वा ॐ ह्रीं श्रीमदेकजटे देवि मयोपनीतं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय मम शान्तिं कुरु कुरु परविद्यामाकृष्याकृष्य त्रुट त्रुट छिन्धि छिन्धि भिन्धि भिन्धि सर्वजगद्वशमानय ॐ ह्रीं स्वाहा इति त्रिः पठित्वा बलिं दद्यात्।

यदुक्तं कालिकल्पे बलिं स्वतनुशोणितम्।
तत् सर्वं कालिकार्चायां न ताराविषये क्वचित्।।१६४।।
स्वगात्ररुधिरं यत्तु तारकायै[2] प्रदीयते।
तस्य रुष्टा सदा तारा न पूजाफलमाप्नुयात्।।१६५।।
त्रिकोणञ्चाष्टकोणञ्च वृत्तं कोणचतुष्टयम्।
बलिदाने त्विदं[3] स्थानं शश्यते तारकार्चने।।१६६।।
ॐ द्रीं एकजटेत्युक्त्वा देवीति तदनन्तरम्।
महायक्षाधिपतये मयोपनीतकं पदम्।।१६७।।
बलिञ्चोक्त्वा गृह्णयुग्मं श्रावयेदनन्तरम्।
गृह्णापय पदद्वन्द्वं मम शान्तिं समाचरेत्[4]।।१६८।।
कुरुद्वयं परविद्यामाकृष्याकृष्य एव च।
त्रुटयुग्मं वदेत् पश्चात् छिन्धियुग्मं[5] ततः परम्।।१६९।।
भिन्धियुग्मं समुच्चार्य सर्वजगद्वशमानय।
लज्जातारं समुच्चार्य्य बलिं दद्यात् पठेत् त्रयम् ।।१७०।।

---

१. दत्त्वा
२. तारकायै
३. द्विवदं
४. समुच्चरेत
५. छिन्दि

ततः पुनरर्घ्यं कृत्वा ॐ ह्रौं ऐं श्रीमदेकजटे[1] देवि मम सर्वविद्यां सिद्धय सिद्धय गृहाणार्घ्यं सर्ववाचस्पतित्वं देहि स्वाहा। इत्युक्त्वा जय जय इत्युक्त्वा नीराजनपुरःसरं देव्या मौलौ यथाशक्ति जप्त्वा समर्प्य जलं देव्या वामहस्ते दद्यात्। ततः स्तवकवचादिपाठः सर्वत्र कुलक्रियादिपूर्विका पूजा।

ततः प्रदक्षिणं कुर्यात् घण्टावाद्यपुरःसरम्।
ऊर्ध्वं दक्षिणकं हस्तं कृत्वा वारत्रयं नरः ।।१७१।।
याम्याच्च वायव्यां गच्छेत् स्थित्वा किञ्चिच्च शाङ्करीम्।
पुनर्याम्यं प्रगत्वा तु प्रणमेच्च[2] पुरः स्थितः ।।१७२।।
प्रणमेत् सप्तवारन्तु त्रिः प्रकुर्य्यात् प्रदक्षिणम्।
दण्डाकारं निपत्याथ कः फली भूमिमध्यतः ।।१७३।।
अङ्गुलीनाञ्च अग्राणि एकीकृत्य सुमानसः।
त्रिकोणाकारमाधाय किञ्चिद्वामांशतो नमेत् ।।१७४।।
उरसा शिरसा पश्चात् पाणिभ्यां जानुतस्तथा।
नासचिबुकयोगेन प्रणम्य सिद्धिमाप्नुयात् ।।१७५।।

अथजपक्रमः

कुल्लुकां प्रजपेच्छीर्षे दशधा मन्त्रसिद्धये।
मुखे सेतुं सप्तधा च प्रणवेन पुटं हृदि।।
प्राणायामपरः पूर्वं जपेत् साधकसत्तमः ।।१७६।।

अथ कुल्लुका

कुल्लुका यथा–

स्वरं द्वितीयं चन्द्राढ्यं लज्जा चाङ्कुश एव च।

आं ह्रीं क्रौं इति शिरसि दशधा जपेत्। मुखे सेतुं ॐ इति सप्तधा जपेत्। हृदि प्रणवपुटितमन्त्रं सप्तधा जपेत्। सर्वत्र आदौ प्राणायामः। ततः सेतुं ततो महासेतुं ततो मन्त्रशिखाम् ॐ ह्रौ ऐं इति सप्तधा जपेत्। ततो मन्त्रप्राणं कलरीं इति सप्तधा। ततः सहस्रम् अष्टोत्तरशतं विंशतिं वा जपेत्। ततो जलपुष्पं करतले नीत्वा।

---

१. जटा
२. प्रणमेत्तु।

ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थिते ॥१७७॥

इति जपं देव्या वामहस्ते समर्पयेत्। ततः प्राणायामः। इति जपक्रमः। काम्यजपः पुरश्चरणप्रकरणे वक्तव्यः नित्यजपे नियमम् अस्या एव।

सहस्रं प्रजपेन्मन्त्रं धर्ममोक्षार्थसिद्धये।
अष्टोत्तरशतं यत्तु तत् पूजायाः फलाप्तये[1]॥
विंशतिञ्च जपेन्मन्त्रं पूजासिद्ध्यर्थमेव हि ॥१७८॥

पूजनेतरजपे तारासारे–

यावन्न क्रियते कर्म पुरश्चरणमुत्तमम्।
तावन्नैव प्रजप्तव्यं सहस्रादधिकं शिव ॥१७९॥
प्रजपेत् साधको यस्तु क्षोभयुक्तोऽप्यनन्यधीः।
सहस्रादधिकं[2] वत्स सहस्रेषु समर्पयेत् ॥१८०॥

एतेन पुरश्चरणहीनः सहस्रादूर्ध्वं न जपेत्। यद्येकदायुतं[3] जपेत् तदा सहस्रं सहस्रं जप्त्वा समर्पयेत्।

सहस्रं प्रजपेन्मन्त्रं पुरश्चरणकर्मणि।
शतं तेन प्रजप्तव्यं ह्यधिकं न कदाचन ॥१८१॥

ततोऽर्घ्यजलं नीत्वा ॐ इतः पूर्वं प्राणबुद्धिः। देहधर्माधिकारितो[4] जाग्रत्स्वप्न-सुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु। मां मदीयं सकलं सम्यक् श्रीमदेकजटा-देवतायै सर्वं समर्पितमस्तु।

ततः आशिर्ग्रहणम्। संहारमुद्रया क्षमस्वेति विसृज्य ऐशान्या त्रिकोणे ॐ उच्छिष्टचाण्डालिन्यै नमः। ततस्तेन यन्त्रलेपनचन्दनेन टीकापाद्यादिकं[5] नैवेद्यं किञ्चित् स्वीकृत्यान्यच्छक्तिभ्यो दत्त्वा यथेच्छं विहरेदिति एकजटापूजापद्धतिः।

---

१. तत् पूजाफलमाप्तये
२. सहस्रादधिकम्
३. यद्याकाङ्क्षया वा
४. कारतः
५. टीकामादयपादोदकं

अथ तारापूजनम्

प्रत्यालीढपदां देवीं महामायां त्रिलोचनाम् ।
सर्वालङ्कारभूषाढ्यां महानीलप्रभां पराम् ।।१८२।।
खड्गं पाशं दक्षिणे च वामेन्दीवरमूर्ध्वतः ।
दधतञ्चषकं[1] देव्या भावयेत् साधकोत्तमः ।।१८३।।

इति ध्यात्वा तत्कल्पोक्तयन्त्रे पूजयेत् ।। इति तारापूजा।।

अथ कामतारापूजनम्

तत्कल्पोक्तयन्त्रे–

घोरहास्यां महादेवीं तारिणींताररूपिणीम् ।
चसकेन्दीवरञ्चैव खड्गञ्चापि वरन्तथा।।१८४।।
व्याघ्रचर्मपरीधानां सर्वालङ्कारभूषिताम् ।
वक्षसा नागहारञ्च महायोगस्वरूपिणीम्।।१८५।।

इति ध्यात्वा आवाह्य पूर्ववत् सर्वम्। इति कामतारापूजनम्।

अथ उग्रतारापूजनम्।

उग्रताराप्रकरणोक्तयन्त्रे या या लक्ष्म्यादिपीठशक्तयः। अत्र ताः न किन्तु–

इच्छाज्ञानक्रियाञ्चापि कामिनीं कामदायिनीम् ।
रतिं रतिप्रियाञ्चैव रतिदाः परिपूजयेत् ।।१८६।।
शवोपरि महादेवीं शवेशहास्यसंयुताम् ।
विपरीतरताशक्तां उग्रतारां परात्पराम् ।।१८७।।
कर्त्तृकां खड्गसंयुक्तां दक्षिणे तारिणीं पराम् ।
वामभागे नीलपद्मं चसकं तदधः स्मृतम् ।।१८८।।
मुण्डमालावलीरम्यां रक्तधाराविभूषिताम् ।
घोरहास्यां त्रिनेत्राञ्च सर्वदा ज्ञानदायिनीम्।।१८९।।
एकवेणीं महावेणीं फडिराजविभूषिताम् ।
सुवर्णमुकुटे शोभां राजते दन्तकुन्दकाम् ।।१९०।।

इति ध्यात्वा पूर्ववत् इत्युग्रतारापूजनम्।

---

१. अधतश्च

शम्भुपत्नीमहाकालप्रियाणाम् आसां प्राणायामः वेदकलावसुमन्त्रयुतः।

इयान् विशेषः-

नीलवाणीं सदा वन्दे नीलाञ्जनचयप्रभाम्।
स्त्र्यलङ्कारसमोपेतां व्याघ्रचर्मावृतां कटौ ।।१९१।।
नागेनावेष्टितां देवीं फडिहार[1]विधारिणीम्।
फडिमस्तक योगेन दक्षपादं प्रपञ्चितम्।।१९२।।
वामपादं शवे नाभौ रत्युल्लासहृदान्विताम्।
तामसीं महतीं विश्वमोहिनीं घोरकामिनीम् ।।१९३।।
शिववक्त्रस्य भ्रमरां प्रत्यालीढपदां शुभाम्।
चमरी केशसंस्कार सदागलित कुन्तलाम् ।।१९४।।
नानामणियुतां शीर्षे महातापविनाशिनीम् ।
कपालञ्चापि खड्गञ्च नीलपद्मां सरस्वतीम् ।
भावयेत् सर्वसिद्ध्यर्थं नीलवाणीं कपित्थदाम्[2] ।।१९५।।

एवं ध्यात्वा सर्वं पूर्ववत्। यन्त्रस्याष्टदिक्षु पद्म[3]-खड्ग-दण्ड-पाश-कपाल-शूल-गदा-पद्म-चक्र एतान् पूजयेत्। इति विशेषः। इति पूजनं नीलशारदायाः। महानीलसरस्वत्याश्च। ततो यथाशक्ति नित्यहोमः।

तथा निगमे-

एकधा आहुतिं यस्तु तारकायै प्रदीयते।
कोटिजन्मकृतं पापं तत्क्षणादेव नश्यति।।१९६।।

ततो बलिदानम्

छागं वा महिषं वापि शूकरं वा पतत्त्रिणम् ।
हस्तिनं मूषिकं वापि मार्जारञ्चापि मेषकम्।।१९७।।
दत्त्वा देव्यै महादेव्यै स भवेत् कुलनायकः।
बलिं पुरतानीय योनिमुद्रां प्रदर्श्य च।।१९८।।
दक्षिणे तद्गलं धृत्वा वामपृष्ठे नियोजयेत् ।

---

१. नागहार
२. कपित्थदाम्
३. शङ्ख

श्रीमदेकजटे देवि बलिं गृह्ण सुरोत्तमे।
मन्त्राणाञ्चापि मे सिद्धिं लतासिद्धिञ्च देहि मे ।।१९९।।

ॐ द्रीं हाँ हुं ऐं ऐं सर्वसिद्धिप्रदे मे चतुर्वर्गसिद्धिं देहि देहि बलिं गृह्ण गृह्ण स्वाहा। इति निवेद्य खड्गं जलपुष्पादिना सम्पूज्य एकघातेन छेदयेत्। इति बलिदानम्।

आसवं संविदाञ्चापि निवेद्यानन्दमाचरेत्।
तदा पूजा प्रकर्त्तव्या ह्यन्यथा निष्फला भवेत् ।।२००।।
संविदां चतुर्धा विभज्य प्रथमे तत्त्वमुद्रया।
ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे।
भैरवाणाञ्च तृप्त्यर्थं पवित्रा भव सर्वदा ।।२०१।।

ॐ ब्राह्म्यै नमः स्वाहा। इति भूमौ प्रक्षिपेत्।

ॐ सिद्धिमूलकरे देवि हीनबोधप्रबोधिनि।
राजप्रजावशंकरि शत्रुकण्ठे त्रिशूलिनि ।।२०२।।
ऐं क्षत्रियायै नमः।
ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि।
त्रैलोक्यविजये मातः समाधिफलदाभव ।।२०३।।
द्रीं वैश्यायै नमः स्वाहा।
ॐ अज्ञानेन्धनदीप्ताग्ने ज्वालाग्नि ब्रह्मरूपिणि।
आनन्दस्याहुतिं प्रीतिं सम्यग् ज्ञानं प्रयच्छ मे।।२०४।।

क्लीं शूद्रायै नमः स्वाहा। ततस्तन्मध्ये त्रिकोणं विलिख्य ॐ अमृते अमृतोद्भवे अमृतवर्षिणि प्रिये अमृतमाऽकर्षयाकर्षय स्वाहा। ततस्तत्त्वमुद्रया पूर्ववत्तर्पयेत्। ततौ भूमौ किञ्चिन्निक्षिप्य ऐं ऐं वद वद वाग्वादिनि मम जिह्वायां स्थिरीभव सर्वशत्रुक्षयं कुरु कुरु स्वाहा इत्यनेन जुहुयादिति।

यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा
तारावाक्यमनुस्मरन् प्रियतमं चोमावचः कारणम्।
ब्रह्मानन्दकृतौ सुसाधनविधौ ताररहस्ये शुभेऽ-
प्याचारादिविधौ तृतीयपटलः सर्वार्थसिद्धिप्रदः ।।२०५।।

।।इति ताररहस्यतन्त्रे तृतीयपटलः समाप्ततामगमत्।।३।।

चतुर्थः पटलः

अथ षोढा

अथ त्रिषोढाप्रकरणम्

तारानिगमादौ कामाख्यामूले च–

प्रणवं[1] मातृकावर्णैः पुटितं मातृकास्थले ।
तेनैव पुटितं वर्णं न्यसेत्तत्रैव पार्वति ।।१।।
केवलां मातृकां कृत्वा मातृकां तारसम्पुटाम् ।
तारेण पुटितां तान्तु लज्जा तु मातृकापुटा ।।२।।
लज्जया पुटिता सा तु न्यस्तव्या साधकोत्तमैः ।
मातृकया[2] पुटा योषा योषया मातृका तथा ।।३।।
मातृकया पुटं कूर्चं कूर्चेन पुटितार्णताम्[3] ।
मातृकापुटितं चास्त्रं अस्त्रं मातृकया तथा ।।४।।
मातृकापुटितं मन्त्रं मन्त्रेण पुटितान्तु ताम् ।
अयुतं विन्यसेद्यस्तु वायुकुम्भकयोगतः ।।
महायोगी भवेत् सोऽपि देवीं पश्यति चक्षुषा ।।५।।
षोढाहीनस्य मन्त्रस्य दुर्बलत्वं प्रजायते ।
न सिद्धिदो भवेत् सोऽपि मोक्षदो न कदाचन ।।६।।

अं तारं अं ॐ अं नमः। ॐ अं ॐ नमः। स्त्रीं अं स्त्रीं अं नमः। स्त्रीं अं स्त्रीं नमः। अं द्रीं अं नमः। द्रीं अं द्रीं नमः। अं हूं अं नमः। हूं अं हूं नमः। अं फट् अं नमः। फट् अं फट् नमः। अं मूलं अं नमः। मूलं अं मूलं नमः। अं

---

१. पुटितं
२. मातृकापुटिता
३. पुटितान्तुतां

नमः अं लज्जा अं नमः अं कूर्चं अं नमः। कूर्चं अं कूर्चं नमः। अं फट् अं नमः। फट् अं फट् नमः। अं मूलं अं नमः। मूलं अं मूलं नमः। इति वायुधारणेन न्यस्तामूलेन सप्तधा व्यापकं कुर्यात्। इति गुह्यषोढा।

अथ महाषोढा

द्रीं ऐं हौं क्लीं हुं फट्

लज्जा वाग्भवबीजञ्च प्रासादं काममेव च।
वर्मबीजं ततोऽप्यस्त्रं न्यस्तसिद्धिमवाप्नुयात् ॥७॥

इति महाषोढा।

धूं धूं धूमावति स्वाहा इति मन्त्रं जपेद्दश।
वर्णन्यासक्रमेणैव मायया पुटिता वधूः ॥८॥
बध्वा सम्पुटितान् वर्णान् विन्यसेत् साधकोत्तमः।
षड्धा न्यासं ततः कृत्वा महासिद्धिमवाप्नुयात् ॥९॥

इति पूर्ववत् पुटितं कृत्वा वर्णन्यासवत् पञ्चाशत्स्थाने[1] षड्धा न्यसेत्। इति महाषोढा।

प्रत्यहं क्रियते येन षोढा वत्स महामहा।
मन्त्रसिद्धिर्भवेत्तस्य स्वप्ने वाक्यं शृणोति हि॥१०॥

इति ब्रह्मानन्दपरमहंसपरिव्राजकावधूत विरचिते ताराहस्ये त्रिषोढाप्रकरणम्।

षोढा नक्तं मत्स्यमांसं परमान्नादिभिर्युतम्।
सायंसन्ध्यां ततः कृत्वा योगं च परिकल्पयेत्[2] ॥११॥
आधारमूलं ग्रीवाग्रं मेरुदण्डं प्रकीर्त्तितम्।
तदाश्रित्य वसेत् लोके कोटितीर्थत्रयं तनौ ॥१२॥
वामे तदंशे नाडी स्यात् इडा सर्वार्थसिद्धिदा[3]।
दक्षिणे पिङ्गला नाडी सर्वतीर्थमयी शुभा ॥१३॥

---

१. पञ्चस्थाने
२. प्रकल्पयेत्
३. साधिका

सुषुम्ना मेरुपुरतः पुण्यनाड्याखिलप्रदा ।
तन्मध्ये चित्रिणी वज्रा[1] तन्मध्यमध्यतः स्मृतः ॥१४॥
ब्रह्मनाडी सा ख्याता ब्रह्मानन्दप्रदायिनी।
इन्दीवरमृणालेव राजते मध्यमध्यतः ॥१५॥
स्थिरवायुसमा योगात्तिष्ठत्येवं चराचरम्।
स तावत् कुण्डलीशक्तिर्नामा वायुः प्रकीर्तितः ॥१६॥
मायायोगसमायोगात् पथान्याष्टस्थितानि वै ।
तिलकाकाररजतं यथा भाति[2] वितिष्ठति ॥१७॥
चैतन्यरहिता नाड्यो बद्धास्तिष्ठन्ति देहतः।
तीर्थं पुण्यं महापीठं तदाश्रित्य वितिष्ठति ॥१८॥
यन्त्रञ्च देवता तत्र अमूलाचलता यथा ।
मेरोर्मूले यथा पद्मं मूलाधारं प्रकीर्त्तितम् ॥१९॥
चतुरङ्गुलविस्तीर्णं उच्छ्रूतं चतुरङ्गुलम्।
चतुःपर्णं शोनवर्णं त्रिकोणं कर्णिका ततः ॥२०॥
तन्मध्ये बिन्दुरूपो हि काकिनीशक्तिसंयुता[3]।
स्वयम्भूलिङ्गमाख्यातं स्वर्णवर्णं सुशोभनम् ॥२१॥
यवपञ्चकमानन्तु महालिङ्गं मनोहरम् ।
विवेष्टयित्वा विहरेत् शक्तिः कुण्डलिनी परा[4] ॥२२॥
विलोलभुजगाकारा ब्रह्मरूपविधारिणी ।
सार्द्धं त्रिवलयाकारा महायोगमयी सदा ॥
षट्पदेव प्रोच्यमाना नैव लिङ्गं स्पृशेत् क्वचित् ॥२३॥
सूर्यकोटिप्रतीकाशा चन्द्रकोटिसुशीतला ।
तडिच्चञ्चलरूपाभा परंब्रह्मस्वरूपिणी ॥२४॥

---

१. ज्ञेया
२. भाले वतिष्ठति
३. संयुतम
४. शिवा

विराट्मूर्त्तिर्देवेशो विहरेत् पूर्वतो दले।
चित्कलाशक्तिसंयुक्तं स्तूयते च कृताञ्जलिः।।२५।।
महाकालो दक्षिणे च कालिकाशक्तिसंयुतः।
स्तूयते परया भक्त्या मनज्ञान[1]स्वरूपिणीम्।।२६।।
नारायणं पश्चिमे च महालक्ष्मीकुलेश्वरः।
स्तूयते परया भक्त्या[2] भावेन कुण्डलीं पराम्।।२७।।
उत्तरे च महादेव पार्वत्या सह शङ्करः।
स्तूयते तारिणीं देवीं सर्पाकारां महेश्वरीम्।।२८।।
यदा कदाचित् तद्वाचाम् एकं वाक्यं शृणोति हि।
तदा सृष्टिं स्थितिञ्चापि संहारं कर्त्तुमेव हि।।२९।।
ते शक्त्याः स्युर्महादेव साधु साधु प्रकाशितम्।
यदा लिङ्गे भवेल्लिप्ता तदा निद्रां व्रजेन्नरः।।३०।।
यदा सा परमा शक्तिः स्थिरलग्नेतरे भवेत्।
तदा पुण्यकरो लोको भविष्यति न संशयः।।३१।।
यदा मूर्द्धनि लिङ्गस्य स ददाति सुखं परम्।
जपाशक्तो भवेज्जीवस्तत्र शब्दे च सिद्धिदा।।३२।।
यदा पुच्छं लिङ्गमूर्द्धिं ददाति ब्रह्मरूपिणीम्।
गुरुतल्पं ब्रह्मयोषां गच्छेद्बाल्याञ्च कामिनीम्।।३३।।
षड्दलं लिङ्गमूले च पद्मं स्याद्रक्तपाण्डुरम्।
तन्मध्ये रक्तपाण्डूञ्च लिङ्गं विश्वोद्भवात्मिकाम्[3]।।३४।।
हाकिनीशक्तिसंयुक्तं सर्वसिद्धिप्रदायकम्।
ब्रह्मा विष्णुस्तथा रुद्रो भगश्चन्द्रः शचीपतिः।।३५।।
राजते दलमध्ये तु सर्वशक्तिसमन्वितम्।।
स्तूयते परमं लिङ्गं सर्वकामार्थसिद्धिदम्।।३६।।

---

१. महाज्ञान
२. भक्ति भावेन
३. भवाख्यकम्

मूलाधारात् कुण्डलिनीं तत्र यत्नेन चालयेत् ।
तस्या स्पर्शनमात्रेण दलं तस्योत्तरं मुखम् ।।३७।।
पद्मोपरि व्रजेन्नैव महाशक्तिर्महेश्वरि ।
किन्तु तत्र स्थिताः सर्वे सर्वा गच्छन्ति तत्कुले।।३८।।
एकत्रीभूय ते सर्वे स्तुवन्ति सिद्धिदायिनीम्[1]।
नाभावष्टदलं पद्मं नवीनजलदप्रभम् ।।३९।।
विश्वान्तकस्तत्र[2] लिङ्गं शाकिनीशक्तिसंयुतम् ।
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।।४०।।
कुबेरस्तत्र ईशानः स्वस्वशक्तिसमन्वितः ।
तत्र पद्मस्य मध्ये तु ब्रह्मनाडीसमाश्रिताम् ।।४१।।
कृता तु यस्य[3] पात्राणि चोत्तरास्या विभावयेत् ।
ते ते देवास्ततो गत्वा स्तुवन्ति भक्तिसंयुताः ।।४२।।
हृदये च ततो ध्यायेत् पद्मं षोडशभिर्दलैः ।
महाशुक्लं महापद्मं गजकुम्भाकृतिं दलम् ।।४३।।
इन्द्रश्चन्द्रो गुरुः शुक्रो वामदेवः शिवापतिः ।
ईश्वरः शङ्करः कृष्णः वामदेवः कुलेश्वरः ।।४४।।
कमलानायकः कोपः कामरूपः कृपामयः ।
करणे षोडशके च स्वस्वयोषासमन्वितः ।।४५।।
स्तूयते सर्वदा भक्त्या महालिङ्गं महेश्वरम् ।
लाकिनीशक्तिसंयुक्तं भावयेच्च परात्परम् ।।४६।।
तत् पन्थानं समारुह्य तत्र देवीं समानयेत् ।
तद्वामे राजते जीवस्तदधः पाप एव च।।४७।।
सुरापानहृद युक्तं गुरुतल्पकटिद्वयम् ।
वज्रदन्तसमोपेतं मृदुदन्तविभूषितम्।।४८।।

---

१. दायकम्
२. तथा
३. तस्य

महाकायं महादेवरहितं हृदये सदा।
नखे स्वर्णहृतं चिह्नं सर्वदोषयुतं परम्।।४९।।
नवाकारं मोक्षहीनं कुलाचारविहीनकम् ।
कामदं कामरूपेण रतिदोषप्रदं तथा ।।५०।।
ततः परं भावयेच्च दशपत्रं सुशोभनम् ।
नीलवर्णं महापद्मं सर्वसिद्धिप्रदायकम् ।।५१।।
महालिङ्गं कामनाम राजते कामिनीयुतम् ।
वामदेवश्च[1] शाम्बश्च कामाचारश्च कामुकः ।।५२।।
कामिनी नायकः कामो ब्रह्मानन्दः कुलेश्वरः ।
त्रिलोकेशः सदानन्दः कौलो दशदलो स्थितः ।
स्वस्वशक्तिसमोपेताः स्तुवन्ति कुण्डलीं पराम् ।।५३।।
ललाटे नेत्रपत्रञ्च ब्रह्मलिङ्गसमन्वितम् ।
सशक्तिर्विष्णुरुद्रस्य स्तौति तारा समन्वितः ।।५४।।
तं विभिद्य गता देवी कुण्डली शक्तिरुत्तमा।
अधोमुखं सहस्रारं मेरुदण्डाग्रनाडीतः ।।
त्रिलोकस्थास्ततो देवाः सन्ति तत्रैव शक्तिभिः ।।५५।।
नाडीत्रयसमोपेतं सरोजं द्वादशं जलम् ।
त्रिकोणकर्णिका तत्र ब्रह्मविष्णुशिवान्विता[2] ।।
दान्तारौक्मवती शय्या शक्तिवज्रसमन्विता ।।५६।।
तत्रापि श्रीगुरुः साक्षात् सर्वभूतहिते रतः।
कर्पूरधवलो देवो ब्रह्मरूपिणमव्ययम् ।।५७।।
परम शिवमाख्यातं कौबेरास्यं विभावयेत्।
मूलादिदेवताः सर्वे स्तुवन्ति सर्वकारणम् ।।५८।।
कुण्डलिनीं महाशक्तिं ललाटे कमलावतु[3] ।
योजयेत् शिवरूपेण वामभागे समानयन् ।।५९।।

---

१. कामदेवश्च
२. न्वितम्
३. दतः

वामे रतिञ्च संस्थाप्य गुरोरेव सुसिद्धये।
समुत्थाय गुरुस्ताञ्च साकारं मन्त्ररूपिणीम्[१] ।।६०।।
तत्रापि[२] गुरूणा देवि रतिशक्ता महेश्वरी।
उवास स्थीयते तेन महामोहविनाशिनी ।।६१।।
वामपादाङ्गुष्ठतोऽस्याः वक्ष्यतेऽमृतमुत्तमम्।
तत् पीत्वा सुखदुःखाभ्यां जीवो जीवति नित्यशः ।।६२।।
भावनाभ्यासयोगेन यदि नाडी प्रवेशयेत्।
महासिद्धिं स लभतेऽप्यमरो जायते ध्रुवम् ।।६३।।

।।इति तारायोगे योगसारः।।

यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा
ताराराध्यमनु[३]स्मरन् प्रियतमं चोमावचः कारणम्।
ब्रह्मानन्दकृतौ सुसाधनविधौ तारारहस्ये शुभे
योगाचारविध चतुर्थपटलः सर्वार्थसिद्धिप्रदः ।।६४।।

।।इति तारारहस्यतन्त्रे चतुर्थपटलः समाप्ततामगमत्।।४।।



१. रूपिणम्
२. तत्रैव
३. तारा वाक्यमनु

।।अथ पञ्चमः पटलः।।

अथ पुरश्चरणम्

जीवहीनो यथा देही सर्व्वकर्म्मसुनक्षमः।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ।।१।।
भावयोगविहीनानां कलौ संख्या चतुर्गुणा।
काली-तारा-सुन्दरीषु कलिदोषो न विद्यते ।।२।।

एतेन प्रकृतजपादेव पुरश्चरणम्। पुरश्चरणप्रयोगस्तारानिगमोक्तम्।

तृतीयदिवसे हविष्यं कृत्वा परदिने वाद्यपुरःसरं वेदिकां कृत्वा तत्र चतुर्दिक्षु अश्वत्थोडुम्बरप्लक्षानामन्यतमस्य दशकीलकान् अष्टोत्तरशताभिमन्त्रितान् मूलेन कीलकम् अश्वत्थकाष्ठमयं संप्रोक्ष्य वेतालाश्चेति पूजाप्रकरणोक्त विघ्नान्नाशयेत्। अत्र कुङ्कुमादिरचितबीजरहितपूजायन्त्रं निर्म्माय तस्य चतुष्कोणे घटचतुष्टयं संस्थाप्य रक्तवस्त्रेणाच्छाद्य तत्र श्रीगुरुं संपूज्य अद्येत्यादि अमुकदेवताया अमुकमन्त्रसिद्धिकालेन पुरश्चरणकर्म्मणि सर्वपापक्षयकर्म्मसर्व्वविघ्नविनाशहेतवे श्रीमदेकजटादेवतायाः सहस्रगायत्रीजपं षोड़शोपचारेण गणेशपूजनमहङ्करिष्ये। इति सङ्कल्प्य सहस्रगायत्रीं जप्त्वा समर्प्य प्रथमघटे गणेशं द्वितीयघटे दिक् गणान् संपूज्य तृतीयघटे श्रीदुर्गामाराध्य संपूज्य चतुर्थे महादेवमाराध्य संपूज्य सर्व्वदेवांश्च संपूज्य तत्र अस्त्रादिकं वाद्यादिकं संस्थाप्य गृहं चन्द्रातपेनाच्छाद्य त्रिशूलयुक्तं पताकाचतुष्टयं गृहचतुष्केन दत्वा द्वारे घण्टात्रयं दर्पणञ्च संस्थाप्य शङ्खं गङ्गाञ्च संस्थाप्य गृहस्तम्भादिकं रक्तनीलवस्त्रेणाच्छाद्य किङ्किणीजाल-मालादिकं संस्थाप्य यथाशक्तिं कुमारीं भोजयित्वा दुग्धघृतादिकं पीत्वा आनन्दमहोत्सवै रात्रिं नयेत्।

ततः प्रातः स्नात्वा गुरोराज्ञां नीत्वा तं संपूज्यासनादिकं संशोध्य तद्यन्त्रे घटचतुष्टयमध्ये एकं घटं संस्थाप्य तत्र देवीं समावाह्य संपूज्य शङ्खादिघोषैः सङ्कल्पं कुर्य्यात्। यथा–

विष्णुरोम् तत्सदद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रः श्रीअमुक-देवशर्म्मा अमुकदेवताया अमुकमन्त्रसिद्धिकामः अद्यावद्य यावत् कालेन सेत्स्यति तावत् कालपर्य्यन्तं अमुकदेवताया अमुकमन्त्रस्य इयत्–संख्यकजपं तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशं ब्राह्मणभोजनरूपपुरश्चरणमहङ्करिष्ये।। इति संङ्कल्प्य प्राणायामं कराङ्गषडङ्गादितत्तत्कल्पोक्तन्यासं कृत्वा षोड़शोपचारैर्देवीं संपूज्य मध्यदिनावधि जपेत्।

मध्यदिनादुर्द्ध्वञ्चेज्जपेत्तदाभिचारो भवति। समाप्तौ जपे होमं कल्पोक्तद्रव्य मन्त्राद्यैस्तद्दशांशं जुहुयात्। कर्पूरादिशुद्धजलेन मूलं श्रीमदेकजटादेवीं तर्पयामि स्वाहा।

इति तद्दशांशं तर्पयेत्। ततो गन्धपुष्पचन्दनाद्यजलपूर्णकलसेन मूलं श्रीमदेकजटां देवीमभिषिञ्चामि नमः। इति तद्दशांशमभिषिञ्चेत्। कलशाभावे शङ्खाभावे कलशमुद्रया चतुर्व्विधप्रकारेण ब्राह्मणानां भोजनं प्रत्यहन्येव षोडशोपचारैस्त्रि सन्ध्यां देवतां पूजयेत्। एवं कुमारीभोजनञ्च तासां पूजा च। कर्म्मान्ते महती पूजा कर्त्तव्या।।

सायं पूजाद्यनन्तरं स्वयं फलमूलादिकं निवेद्य भुक्त्वा नक्तं दशदण्डाभ्यन्तरे दिव्यशय्यायां शृङ्गारवेशस्त्रिया सह ताम्बूलपूर्णवदनो जपेत्। दिवा यत् संख्यं रात्रौ तथा। कुलक्रियां विना पुरश्चरणे नाधिकारः।

शान्तितिलकदक्षिणा अवभृतस्नानादिः।
मण्डपं मण्डपद्रव्यम् आचार्य्याय निवेदयेत्।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।।३।।
च॰,सूर्य्यग्रहं प्राप्य ग्रहणं यो विचारयेत्।
यवनत्वं भवेत्तस्य न सिद्धिर्जायते प्रिये।।४।।

अद्येत्यादि ग्रासाद्विमुक्तिपर्य्यन्तं जपरूपपुरश्चरणमहङ्करिष्ये। इति सङ्कल्प्य ग्रासकालावधि मुक्तिपर्य्यन्तं जपेत्।

ततस्तद्दिने तत्परदिने वा होमादिकं सर्वं पूर्ववत्।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।।५।।
शवमेकं समानीय कृष्णपक्षे विशेषतः।
अष्टम्यादिचतुर्दश्यन्तं मन्त्रसिद्धिमवाप्नुयात्।।६।।
सर्व्वत्र अनिवार्यरूपेण सहस्रजपः।
यत्र यत्र जपे होमे संख्या नोक्ता मनीषिभिः ।।
अष्टोत्तरसहस्रन्तु पुरश्चरणकर्म्मणि ।।७।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
कुजेऽहनि समादाय शववाणं सुरेश्वरि ।।
प्रापयित्वा तदा भूमौ प्रजपेत् साधकोत्तमः।।८।।
अमादिपौर्णमासान्तं मन्त्राणां सिद्धये ध्रुवम्।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।।९।।
द्वारे शवं लिखित्वाथ गृहमध्ये शवन्तथा।
गृहेशानं शवं स्थाप्य पूजयेत् साधकोत्तमः।।१०।।
मूलेन शुभ्र[1]पुष्पैश्च पूजयेद्याविजां पराम् ।
अस्तोदयं ततः कृत्वा पुरश्चरणमाप्नुयात् ।।११।।
अथवावान्यप्रकारेण पुरश्चरणमिष्यते ।
प्रजपेत्तारकामन्त्रं पञ्चरात्रं फलाप्तये।।१२।।
अथवान्य प्रकारेण पुरश्चरण मिष्यते।
एकमुण्डं समादाय गृहमध्ये कुजेऽहनि।
प्रापयित्वा ततो जप्त्वा सहस्त्रं सिद्धिमाप्नुयात्।।१३।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
दिनत्रयं तत्र जप्त्वा सर्व्वसिद्धीश्वरो भवेत् ।।१४।।
प्रतिपद्येवमारभ्य कृष्ण पक्षे विशेषतः ।
अमान्तं प्रजपित्वा तु देवदर्शनमाप्नुयात् ।।१५।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।

---

१. इति वा पाठमनुमीयते - चोग्र, चोद्र

मासमेकं जपेन्मन्त्रं सर्व्वदा चक्रमध्यतः।।
जायते दर्शनं देव्यास्तदा स्यात् कल्पपादकः ।।१६।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
पञ्चमुण्डं समानीय बिल्वमूले च प्रोक्षयेत्।।
सर्व्वदा प्रजपेन्मन्त्रं दिवारात्रं सुसिद्धये।।१७।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
नरमुण्डं समानीय[1] पञ्चगव्येन क्षालयेत् ।।१८।।
सिद्धये प्रजपेद्देव्या मूलमन्त्रं शतं शतम् ।
प्रापयेत् प्राङ्गणे सत्यं सहस्रञ्च दिने दिने।।१९।।
मासेन देवसिद्धिः स्यात् सत्यं सत्यं वरानने।
शुक्लाष्टमीं समासाद्य यावत् कृष्णाष्टमी भवेत्।।
तावत् जपेत् सहस्रञ्च तदा सिद्धिमवाप्नुयात्।।२०।।
दिनद्वयं जपेत्तत्र दिवारात्रं सदाशिव।
तदा सिद्धिमवाप्नोति मन्त्रसिद्धिरनुत्तमा।।२१।।
महाशङ्खस्य मालायां पञ्चलक्षं जपेद्यदि।
तदा सिद्धिमवाप्नोति सत्यं सत्यं वरानने ।।२२।।
बिल्वमूले जपेन्मन्त्रं लक्षसंख्यं सुरेश्वरि।
तदा सिद्धिमवाप्नोति महामाये शिवप्रिये।।२३।।
चतुष्पथे जपेन्मन्त्रं द्विलक्षं शुद्धमानसः।
तदा सिद्धिमवाप्नोति चन्द्रखण्डविभूषिते ।।२४।।
योनिमध्ये जपेन्मन्त्रं कुलकर्म्मरतो नरः।
तदा सिद्धिमवाप्नोति देवतादर्शनं भवेत् ।।२५।।
उदयादुदयान्तं यदनिशं जपमाचरेत्।
मन्त्रसिद्धिर्भवेत्तस्य सत्यं सत्यं वरानने।।२६।।
एवंविधं परित्यज्य पुरश्चरणमाचरेत्।
न तस्य मन्त्रसिद्धिः स्यात् कुलपूजामृते शिवे।।२७।।

।। इति पुरश्चरणम् ।।

---

१. यकारो नास्ति मूलमातृकायाम्।

यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा।
तारावाक्यमनुस्मरन् प्रियतमं चोमावचः कारणम्।
ब्रह्मानन्दकृतौ सुसाधनविधौ ताररहस्ये शुभे।
सिद्धौ योगविधौ पुरश्चरणतो बाणस्तु पटलो गतः ।।२८।।

।।इति तारारहस्यतन्त्रे पञ्चमपटलः समाप्ततामगमत्।।५।



।। अथ षष्ठः पटलः।।

शवचितासाधनम्

कृष्णपक्षे विशेषेण साधयेत् सिद्धिमुत्तमाम्।
शवस्य देवदेवेशि अष्टमी कुहुकानने ।।१।।
चतुर्दश्यां पौर्णमास्यां मङ्गले शनिवासरे ।
साधयेत् फलभावेन ह्यन्यथा सिद्धिबोधकृत् ।।२।।
बिल्वमूले श्मशाने च चितायां वा चतुष्पथे।
जायते दर्शनं देव्यास्तदा स्यात् कल्पपादपः।।३।।
शून्यालये महादेवीं साधयेत् शक्तिमुत्तमाम् ।
तत्तत् स्थाने महाशवमानीय कुलधर्म्मतः ।।४।।

शवस्याकाशमुखं शोधयेत्तं शरं पुनः। आदावाभ्युक्ष्य महामोहमयीं विभाव्य पूजाकल्पोक्तप्रकारेण शवललाटे लिखितमन्त्रेण संपूज्य पञ्चयोगेन परदेवतां साधयेत्।

केशे च पादयोः पाण्योर्बन्धयेत् मूलमन्त्रतः ।
कारणञ्च प्रदातव्यं स्वयञ्चापि विधीयते ।।५।।
ताम्बूलं तस्य वदने स्वयञ्चापि च भुज्यते ।
कारणेन समोपेतं दग्धमीनं सुशोभनम् ।।६।।
मासं मांसं हरिद्राभं दद्याद्दिक्षु बलित्रयम् ।
ततस्तस्यापि हृदये उवास प्रजपेन्मनुम् ।।७।।
द्विमासेन त्रिमासेन सततं साधयेद्यदि ।
तेन वा सिद्धिराख्याता सा चात्र स्मरणादपि ।।८।।
त्रिदण्डे पञ्चदण्डे वा सप्तदण्डेऽथवा पुनः।
देवतादर्शनं सत्यं भविष्यति सुनिश्चितम् ।।९।।

दिक्षु नालोकनं कार्य्यं सुहृद्भिः शस्त्रपाणिभिः ।
सर्पिषा ज्वालयेद्दीपं प्रजपेत् साधकोत्तमः ।।१०।।
व्याघ्रया भल्लूकयापि वा महाभूतादिकं शिव ।
योगिनीया पिशाचाद्या दृष्ट्वा उभयमाचरेत् ।।११।।
पूर्णानन्दो जपेन्मन्त्रं समीपे शक्तिमत्तथा ।
यदि वाक्यं सदाकाशे शृणोति देवतात्मकम् ।।१२।।
बलिं देहि बलिं देहि तदा वाक्यं वदेत् स्वयम् ।
स्वः प्रदास्यामि देवेशि गद्यते पुरतस्तव ।।१३।।
समायाति ततो देवी तारिणी तापहारिणी ।
वरं वृणु वरं वृणु वदेत् संख्यं यतस्ततः ।।१४।।
ध्यानेन देवीमालोक्य वह्निश्चापि कुलेश्वरि ।
तत्संख्यञ्च वरं ग्राह्यं शवसाधनकर्म्मणि ।।१५।।
एवञ्चापि साधयित्वा प्रातःकाले प꣡ऽहनि ।
पूजयित्वा महादेवीं तारकां सिद्धिदायिनीम् ।।१६।।
क्षीरस्यापि दृढस्यापि बलिं महिषछागलम् ।
दद्याद्देव्यै प्रयत्नेन सर्व्वसिद्धीश्वरो भवेत् ।।१७।।

।।इति शवसाधनम्।।

शनौ वामकुले वापि चितामध्ये व्रजेत् स्वयम् ।
अष्टम्यां च चतुर्दश्यां कृष्णपक्षे विशेषतः ।।१८।।
चतुर्दिक्षु बलिं कुर्य्यात् परमानन्दहेतवे ।
ॐ महिषमर्दिनि देवेशि सर्वसिद्धिप्रदायिनि ।
बलिं गृह्ण महादेवि सर्वसिद्धिं विधेहि मे ।।१९।।

।।इति चतुर्दिक्षु बलिं कुर्य्यात्।।

ॐ द्रीं प्राभाण्डिके महाघोरे घोररूपिणि महामाये त्रिकोणेश्वरि सर्व्वविघ्नान्नाशय नाशय मे सिद्धिं देहि त्रिपुरेश्वरि तारे स्वाहा। लोष्ट्रं क्षिपेत्, वस्त्रे ग्रन्थिञ्च बन्धयेत्। ततः षोढां कृत्वा जपेत्। अयुतजपात् सिद्धिः।

।।इति चितासाधनम् ।।



अथ शिवाबलिः

शनौ वापि गुरौ वापि, मङ्गले वा सुरेश्वरि ।
बिल्वमूले शून्यगेहे वने वापि प्रदापयेत् ।।२०।।
दग्धमीनं तथा मांसं दध्याज्यं परमान्नकम् ।
बिल्वपत्रयुतं दद्यात् दुग्धं घृतसमन्वितम् ।।२१।।
पुरतः स्थापयित्वा तु दशदण्डान्तरे निशि ।
शोधयेन्मूलमन्त्रेण सहस्रं प्रजपेन्मनुम् ।।२२।।
उत्थाय प्रजपेन्मन्त्रं कृताञ्जलिपरो भवेत् ।
ॐ महामाये जगन्मातर्जगदानन्दरूपिणि ।।
कालिके पाहि मां नित्यं शिवारूपे महेश्वरि ।।२३।।
ॐ कृष्णवर्णे पीतवर्णे कृष्णानन्दप्रदायिनि ।
कामरूपे कारणास्ये तारके पाहि मां शिवे ।।२४।।
ॐ शिवे देवि जगन्मातः कामदे कामसुन्दरि ।
त्रिपुरे षोडशी देवि शिवारूपे पुनीहि माम् ।।२५।।

इत्युक्त्वा बलिञ्चोत्तरास्यो दत्त्वा ततो दक्षिणदशहस्तं गत्वा जपेत्। काली तारां षोडशीरूपां भावयेत्।।

समायाति ब्रह्ममयी शिवरूपा हि चण्डिका ।
भुज्यते तं बलिं देवि निःशब्दा कार्य्यसिद्धिदा ।।२६।।
कठोरशब्दं कुरुते विवादं वा परस्परम् ।
तदा मूलं विजानीयात् सिद्धिहानिः पदे पदे ।।२७।।
कठोरदृष्टिः कुरुते क्रोधाद्यैर्वदन्ति हि ।
तदाशुभं भवेन्नित्यं सत्यं सत्यं वरानने ।।२८।।

।।इति शिवाबलिः।।

यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा
तारावाक्यमनुस्मरन् प्रियतमं चोमावचः कारणम् ।
ब्रह्मानन्दकृतौ सुसाधनविधौ ताररहस्ये शुभे
शवानां साधने षष्ठः पटलः सुसिद्धिकरः ।।

।।इति ताररहस्यतन्त्रे षष्ठपटलः समाप्ततामगमत्।।६।।



।। अथ सप्तमः पटलः।।

अथ तारास्तोत्रम्

ॐ घोररूपे महारावे सर्व्वशत्रुभयङ्करि।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम् ।।१।।
सुरासुरार्च्चिते देवि सिद्धगन्धर्वसेविते।
जाड्यपापहरे देवि त्राहि मां शरणागतम् ।।२।।
जटाजूटसमायुक्ते लोलजिह्वाऽन्धकारिणि।
द्रुतबुद्धिकरे देवि त्राहिमां शरणागतम् ।।३।।
सौम्यरूपे क्रोधरूपे चण्डरूपे नमोऽस्तु ते।
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतम् ।।४।।
जडानां जडतां हंसि भक्तानां भक्तवत्सले ।
मूढतां हर मे देवि त्राहि मां शरणागतम्।।५।।
हुँ हुँकारमये देवि बलिहोमप्रिये सदा ।
उग्रतारा नमस्तुभ्यं त्राहि मां शरणागतम् ।।६।।
बुद्धिं देहि यशो देहि कवित्वं देहि देवि मे।
मूकत्वं हर मे देवि त्राहि मां शरणागतम्।।७।।
इन्द्रादिदेववृन्दैर्व्वन्दिते करुणामयि।
तारातारधिनाथास्ये त्राहि मां शरणागतम् ।।८।।

फलश्रुतिः

अष्टम्याञ्च चतुर्दश्यां नवम्यां यः पठेन्नरः ।
षण्मासैः सिद्धिमाप्नोति नात्र कार्या विचारणा ।।९।।
मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकाम् ।।१०।।

इदं स्तोत्रं पठेद्यस्तु त्रिसन्ध्यं सततं नरः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा च जायते ।।११।।
पीडायां वापि संग्रामे जपे दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः ।।१२।।

।।इति श्रीतारासारनिगमे एकजटास्तोत्रं समाप्तम्।।



त्रैलोक्यमोहनंश्रीताराकवचम्

।।श्रीदेव्युवाच।।

तारापूजा श्रुता नाथ भावाश्च विविधाः प्रभो ।
इदानीं श्रोतुमिच्छामि कवचं मन्त्रविग्रहम् ।।१३।।
त्रैलोक्यमोहनं नाम सर्व्वापद्विनिवारकम्।
पूर्वैश्च सूचितं नाथ कृपया मे प्रकाशय।।१४।।

।।भैरव उवाच।।

देवदानवविद्याधृग्विद्वद्भिः परिपूजिते।
त्रैलोक्यमोहनं नाम कवचं श्रूयतां परम् ।।१५।।
सर्व्वविद्यामयं देवि सर्व्वमन्त्रमयं ध्रुवम् ।
सर्व्वरक्षामयं सर्वसिद्धिविद्याप्रदायकम् ।।१६।।
वेदव्यासोऽपि यद्धृत्वा सर्व्वज्ञः पठनाद्यतः ।
यद्धृत्वा पठनादीशस्त्रैलोक्यविजयी विभुः ।।१७।।
धनाधिपः कुबेरोऽपि सुरेशोऽभूच्छचीपतिः ।
पठनाद्धारणात् सत्यं यतः सर्वे दिगीश्वराः ।।१८।।
सर्व्वैश्वर्य्ययुताः सन्तः सर्वसिद्धिमवाप्नुयुः।
यस्य प्रसादादीशोऽहं भैरवानां सुरेश्वरि ।।१९।।
क्रोधाधिपेशो महाभीमो देवेषु प्रथितः प्रभुः।
न दद्यात् परशिष्येभ्यो दद्यात् शिष्येभ्य एव च ।।२०।।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्वा मृत्युमवाप्नुयात्।
त्रैलोक्यमोहनस्यास्य कवचस्य विधिः शिवः ।।२१।।

छन्दो विराड्देवता च सोग्रतारा प्रकीर्त्तिता।
चतुर्व्वर्गेषु विद्यायां विनियोगः प्रकीर्त्तितः ।।२२।।
ॐ द्रीं स्त्रीं मे शिवः पातु हुँ फट् पातु ललाटकम् ।
सार्द्धपञ्चाक्षरी तारा पायान्नेत्रयुगं मम ।।२३।।
ॐ द्रीं स्त्रीं हुं श्रुती पातु नामश्च पातु नासिकाम् ।
तारा षडक्षरी पायाद्वदनं मुण्डभूषणा ।।२४।।
द्रीं स्त्रीं हुँ च फट् वदनं जिह्वां पायान्महेश्वरी ।
द्रीं स्त्रीं हूँ मे गणं पातु सापि नीलसरस्वती ।।२५।।
स्त्रीं स्कन्धौ पातु नियतं तारैकाक्षररूपिणी।
हुं घंटां मे सदा पातु विद्यैकाक्षररूपिणी ।।२६।।
ऐँ द्रीं स्त्रीँ हूँ च फट् पायाद्वाक्तारा मे भुजद्वयम्।
द्रीँ द्र्रीँ स्त्रीँ हूँ च फट् पायात् श्रीतारा मे स्तनद्वयम्।।२७।।
द्र्रीँ द्र्रीँ स्त्रीं हूँ च फट् पायान्मायातारा हृदयं मम।
हुं द्र्रीँ स्त्रीँ हूँ च फट् बीजं तारा सदाऽवतु।।२८।।
क्लीं ह्रीं स्त्रीँ हूँ च फट् पायात् पाशौ कामस्वरूपिणी।
ॐ द्र्रीँ श्रीं द्र्रीँ हूँ नमः पायात् कुक्षौ षडक्षरी स्वाहा।।२९।।
ऐँ सौः ॐ ऐँ क्लीं फट् स्वाहा कटिदेशं सदाऽवतु ।
अष्टाक्षरी महाविद्या साक्षाद् ब्रह्मस्वरूपिणी ।।३०।।
ख्यौं हूँ हौँ ॐ ऐं श्रीं द्रीँ गुह्यदेशं सदाऽवतु ।
सप्ताक्षरी चोग्रतारा मूलविद्यास्वरूपिणी ।।३१।।
ॐ द्र्रीँ ह्राँ हूँ नमस्तारायै सकलनखपदन्ततः।
दुस्तरं तारयपदं तारय प्रणवद्वयम् ।।३२।।
स्वाहेति च महाविद्या जानुनी सर्व्वदाऽवतु ।
ऐँ सौः ॐ ऐँ क्लीँ फट् स्वाहा जंघे पातु परात्मिका।।३३।।
ॐ द्रीँ श्रीँ हुँ च फट् ताराहं साद्यन्ता नवाक्षरी।
महोग्रतारा पादौ मे नित्यं पातु महेश्वरी ।।३४।।
ऐँ द्रीँ श्रीँ ह्सौः वद वद वाग्वादिनीति च ।
कामबीजत्रयं नीलसरस्वतीस्वरूपकम् ।।३५।।

ऐँ ऐँ ऐँ काहि काहि कलरी पार्व्वति स्वाहेति च।
चतुस्त्रिंशल्लिपिमयी पातु ताराखिलं वपुः ।।३६।।
इन्द्रो वामाक्षियुक् पृथ्वी सरस्वत्यनरप्रिया ।
कूर्च्चाद्यन्ता पातु चोर्ध्वं मूलविद्या दशाक्षरी।।३७।।
तारं मायावधूः कूर्च्चं काली कामकला ततः।
उग्रतारे भगं कामः परालक्ष्मीः शिवाङ्कुशौ ।।३८।।
सा महाषोडशी प्रोक्ता तारादेव्या मयाधुना।
विधिवद् ग्रहणादस्या मृत्युं मृत्युपथं नयेत्।।३९।।
एषा विद्या मया गुप्ता तन्त्रादियामलेषु च।
साम्प्रतं कथितं तुभ्यं कवचं हि तथा प्रिये ।।४०।।
इति ते कथितं देवि गुह्याद् गुह्यतरं परम्।
त्रैलोक्यमोहनं नाम कवचं मन्त्रविग्रहम् ।।४१।।
ब्रह्मविद्या मया भद्रे केवलं मन्त्रविग्रहम्।
मन्त्रविद्यामयञ्चैकं कवचं मन्मुखोदितम् ।।४२।।
गुरुमुखाच्च विधिवत् कवचं प्रपठेद्यदि ।
त्रिः सकृद्यथाज्ञानं भैरवस्तत्क्षणाद् भवेत् ।।४३।।
सर्व्वपापविनिर्मुक्तः कुलकोटि समुद्धरेत्।
गुरुः स्यात् सर्व्वविद्यासु अधिकारी जपादिषु ।।४४।।
शतमष्टोत्तरञ्चास्य पुरश्चर्य्याविधिः स्मृतः।
शतमष्टोत्तरं जप्त्वा भवेद् भूमिपुरन्दरः ।।४५।।
त्रैलोक्यं विचरेद्धीमान् गणनाथो गुहः प्रभुः।
गद्यपद्यमयी वाणी भावगङ्गाप्रवाहवत् ।।४६।।
पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत् सकृत्।
पञ्चवर्षसहस्राणां पूजायाः फलमाप्नुयात् ।।४७।।
भूमौ विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि ।
पुरुषो दक्षिणे बाहौ योषिद्वामभुजे तथा ।।४८।।
बहुपुत्रवती नारी पुरुषो बहुपुत्रवान्।
सर्व्वसिद्धियुतो भूत्वा विचरेद् भैरवोयथा।।४९।।

तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि भैरवि।
माल्यानि कुसुमान्येव भवन्ति सुखदानि च।।५०।।
तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे वसेद् ध्रुवम्।
इदं कवचमज्ञात्वा तारां यो भजतेऽधमः।।
अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः।।५१।।

इति श्रीभैरवतन्त्रे भैरवभैरवीसंवादे त्रैलोक्यमोहनं नाम श्रीमदेकजटा ताराकवचं समाप्तम्।।

◆◆◆

तारास्तोत्रम्

ॐ तारां सारतरां वन्दे सर्व्वसौख्यप्रदायिनीम्।
सर्व्वसिद्धिप्रदे देवि त्राहि मां भवसागरात्।।५२।।
महाकालेन च समं सारेशे शिवरूपिणि।
तारे मोक्षप्रदे देवि त्राहि मां भवसागरात्।।५३।।
घोरहास्ये घोररूपे घोरपापविनाशिनि।
घोरदुःखहरे देवि त्राहि मां भवसागरात्।।५४।।
प्रत्यालीढपदे देवि सर्व्वदे शुभदायिनि।
सर्व्वज्ञानकरे देवि त्राहि मां भवसागरात्।।५५।।
कीलरूपधरे देवि कौलदेहनिवासिनि।
कुलशक्तिज्ञानरूपे त्राहि मां भवसागरात्।।५६।।
कुलदे कुलरूपे हि कुलशास्त्रार्थवादिनि।
कुलनिन्दकनाशार्थं त्राहि मां भवसागरात्।।५७।।
महामाये महोत्साहे महाभयविनाशिनि।
महामोहहरे देवि त्राहि मां भवसागरात्।।५८।।
खड्गकर्तृधरे देवि कलाकालप्रकाशिनि।
कपालेन्दीवरधरे त्राहि मां भवसागरात्।।५९।।
यः पठेत् प्रातरुत्थाय देव्याः सन्निहितोऽपि वा।
सर्व्वार्थसौख्यं लभते मन्त्रसिद्धिञ्च विन्दति।।
बृहस्पति समः शास्त्रे कुलाचारे सदाशिवः।।६०।।

सिद्धौ श्रीकालिकातुल्यः सर्व्वार्थे विष्णुरेव च ।
एतत् स्तोत्रस्य कवचं पठितव्यं समाहितैः ।।
तदा सिद्धिमवाप्नोति नान्यथा सिद्धिभाग्भवेत् ।।६१।।
।।इति श्रीतारानन्ददायके कालिकोक्तं तारास्तोत्रं समाप्तम्।।



श्रीत्रैलोक्यविजय तारा कवचम्

।।श्री देव्युवाच।।

यदुक्तं तारकायोनौ तारानाथ जगत्पते ।
लोकानां मन्त्रसिध्यर्थं विघ्नानां नाशनाय च ।।६२।।
अभिचारनिषेधाय देवतानाञ्च सिद्धये ।
येन जायेत मे सिद्धिः सर्व्वं वद सदाशिव ।।६३।।

।।श्रीशिव उवाच।।

लक्षवारं वारितासि स्त्रीस्वभावाद्धिपृच्छसि।
शृणु देवि वरारोहे चन्द्रखण्डविभूषिते ।।६४।।
त्रैलोक्यविजयं नाम संक्षेपात् कवचं शृणु ।
न च नाम्ना सहस्रेण न च नाम्ना शतेन च ।।६५।।
शवादिसाधनं देवि विना सिद्धिर्यतो भवेत् ।
त्रैलोक्यविजयस्यास्य कवचस्य सदाशिवः ।।६६।।
ऋद्धिः स्यात्तारका देवी देवता भोगमोक्षदा ।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।।६७।।
द्रीं मे पातु शिवः साक्षात् कामाख्या भुवनेश्वरी।
लज्जाबीजं महामन्त्रं कपोलं परिरक्षतु ।।६८।।
स्त्रीं मे कण्ठं सदा पातु वधू दुर्गाविमोहिनी।
ज्ञानसिद्धिप्रदं बीजं वधूरिव यशःप्रदम् ।।६९।।
कूर्च्चं मे हृदयं पातु छिन्नमस्ताऽनलप्रभा ।
महाबीजं शक्तिरूपं महामोक्षप्रदायकम् ।।७०।।
अस्त्रबीजं सदा पातु कङ्कालं सर्व्वदा मम ।
महाबीजं मोक्षदं स्यात् सदा प्रत्यङ्गिरात्मकम् ।।७१।।

पादौ पातु महामाया कामाख्या तारका स्मृता।
कुल्लुकाख्या महाविद्या साक्षान्नीलसरस्वती ।।७२।।
सर्व्वाङ्गं मे सदा पातु त्रिपुरा परमेश्वरी।
य इदं कवचं देवि प्रपठेत् साधकोत्तमः ।।७३।।
पुण्यात्मा स भवेल्लोके सर्व्वलोकैश्च पूजितः।
पूजाकाले च सन्ध्यायां जपे दाने तथा भये।।७४।।
यः पठेत् कवचञ्चैतत् तस्य सिद्धिः सदैव हि।
कुलाचारं पठेद्यस्तु स भवेत् सर्व्वसिद्धिभाक् ।।७५।।
सङ्गमे प्रपठेद्यस्तु योषावक्त्रं विलोकयन्।
सत्पुत्रो लभ्यते देवि वाग्मी च चिरजीवकः ।।७६।।
जपकाले पठेद्यस्तु तस्य सिद्धिरनुत्तमा ।
होमकाले पठेद्यस्तु स स्यात् सर्व्वाङ्गभाजनः ।।७७।।
भयकाले पठेद्यस्तु भीतिस्तस्य न विद्यते।
दस्यूनां पुरतः पाठात् तन्निवृत्तिः प्रजायते ।।७८।।
इदं कवचमज्ञात्वा तारां यो भजतेऽधमः।
पात्यते नरके घोरे न सिद्धिं लभते ध्रुवम् ।।७९।।
भूमौ विलिख्य गुलिकां धारयेद् दक्षिणे भुजे ।
तथा योषा वामबाहौ कण्ठे वापि विधारयेत् ।।८०।।
बहुपुत्रवती नारी पुरुषो बहुपुत्रवान्।
अवैधव्या पुत्रवती सौभाग्याढ्या भवेद् ध्रुवम् ।।८१।।

।।इति तारानन्ददायके त्रैलोक्यविजयं नाम ताराकवचं समाप्तम्।।



श्री शम्भुपत्नी तारास्तोत्रम्

महामायां महेशानीं तारां मोक्षविधायिनीम्।
गुरुरूपां प्रवन्धेऽहं शम्भुपत्नीं नमाम्यहम् ।।८२।।
प्रत्यालीढपदां देवीं मुण्डमालाविभूषिताम् ।
क्षमदां सक्षमां क्षामां शम्भुपत्नीं नमाम्यहम् ।।८३।।
कपालकर्तृकाहस्तां कामाख्यां कुलसुन्दरीम्।
कामिनीं कमलेशानीं शम्भुपत्नीं नमाम्यहम्।।८४।।

जटाजूटसमायुक्तां जगन्मातां महेश्वरीम्।
जगदानन्ददां जायां शम्भुपत्नीं नमाम्यहम् ।।८५।।
फणिमस्तकपादाभ्यां महासिद्धिकरीं पराम्।
महेश्वासां मन्त्रमयीं शम्भुपत्नीं नमाम्यहम् ।।८६।।
शम्भुवक्षःस्थलस्थांतां शम्भुपत्नीं महेश्वरीम् ।
शम्भुदेवपूजिताञ्च शम्भुपत्नीं नमाम्यहम्।।८७।।
य इदं परया भक्त्या पठेद् देवीं विभावयन्।
त्रिसन्ध्यमेकसन्ध्यं वा स्वेच्छासिद्धिमवाप्नुयात् ।।८८।।
।।इति श्रीमदेकजटाकल्पे शम्भुपत्नी-तारास्तोत्रं समाप्तम्।।

◆◆◆

श्रीशम्भुपत्नीताराकवचं

।।श्रीदेव्युवाच।।

लोकेश परमेशान भवानीप्राणवल्लभे ।
प्रसीद देवदेवेश गुणत्रयविभागतः ।।८९।।
कवचं वद देवेश सिद्धिदं त्रिगुणात्मकम् ।।९०।।

।।श्रीईश्वर उवाच।।

तव पादप्रसादेन तत्त्वज्ञोऽहं सुरेश्वरि।
तव वाक्याज्जगन्मातः कृतार्थोऽहं महेश्वरि ।।९१।।

अस्य श्रीशम्भुपत्नीताराकवचस्य सदाशिव-ऋषिः श्रीशम्भुपत्नी देवता चतुर्वर्गसिद्ध्यर्थे विनियोगः।

तारा मे पुरतः पातु परतश्च करालिनी ।
दक्षिणे तारिणी पातु ॐ तु वेद्याऽवतारिणी ।।९२।।
ऐशान्यां कमला पातु आग्नेय्याञ्च सरस्वती।
नैऋत्याञ्च रतिः पातु वायव्यां प्रीतिरेव च ।।९३।।
ऊर्ध्वं कीर्तिः सदा पातु अधस्तात् शान्तिरेव च।
तुष्टिर्म्मे पातु सर्व्वाङ्गं पुष्टिः पातु जले स्थले ।।९४।।
इति ते कथितं देवि कवचं परमाद्भुतम्।
अस्यापि पठनात् सद्यः कुबेरोऽपि धनेश्वरः ।।९५।।

वाचाञ्च वाक्पतिर्ज्ञेयः सर्व्वधर्मपरायणः ।
धनं पुत्रञ्च योषां ग्रामं भूमिं विशेषतः ।।९६।।
स लभेत् साधकःश्रेष्ठो वाचां सिद्धिर्भवेद् ध्रुवम् ।
ज्ञानसिद्धिर्मोक्षसिद्धिर्नानासिद्धिर्विशेषतः ।
पठनाद् धारणात् सद्यः सर्व्वसिद्धीश्वरो भवेत् ।।९७।।

।।इति श्रीमदेकजटाकल्पे शम्भुपत्नीकवचं समाप्तम्।।

।।इत्येकजटा-आद्यताराप्रकरणम्।।

श्रीमदुग्रतारास्तोत्रम्

वन्देऽहं तारिणीं चोग्रां भोगमोक्षप्रदायिनीम् ।
उग्रापत्तारिणीं देवीं ध्यायेऽहं कुलसुन्दरीम् ।।९८।।
अम्बिकाञ्च शिवां श्यामां करालास्यां त्रिलोचनीम् ।
वाचां सिद्धिप्रदां वन्दे पुत्राय च धनाय च ।।९९।।
प्रसादाच्चरणस्यापि धाता सृष्टिं तनोति च ।
त्वत्पादयोः सेवनाच्च विष्णुः पातिजगत्त्रयम् ।।१००।।
त्वत्पादस्य प्रसादेन जगत्संहारकः शिवः ।
इन्द्रश्चन्द्रश्च वायुश्च कुबेरश्च गृहेश्वरः ।।१०१।।
तारादेव्याः प्रसादेन त्वत्प्रभुत्वंपरायणः।
नीलेन्दीवरयुक्ता च नीलेशी नीलरूपधृक् ।।१०२।।
प्रत्यालीढपदां देवीं वन्दे जनितपालिनीम् ।
कपालकर्तृकाहस्तां विश्वरूपां विनोदिनीम् ।।१०३।।
बिल्वपत्रप्रियां देवीं तां वन्दे जगदीश्वरीम् ।
सर्व्वस्वरूपे सर्वेशे सर्व्वदेवक्रियान्तरे ।।१०४।।
शिवप्रिये गिरिसुते प्रसीद चन्द्रभूषिते ।
दिवारात्रौ च सन्ध्यायां दीक्षायां श्राद्धकर्मणि ।।१०५।।
नायिकासाधने दुर्गे धनकर्म्मणि दुर्ग्रहे ।
शत्रुग्रस्ते विवादे च योषायोगे शुचिस्थले ।
पठित्वा च इदं स्तोत्रं वसुसिद्धिमवाप्नुयात् ।।१०६।।

।।इति तारातन्त्रे विश्वरूपवर्णने योगशास्त्रे श्रीमदुग्रतारास्तोत्रं समाप्तम्।।

◆◆◆

अथ श्रीमदुग्रतारा कवचम्

।।देव्युवाच।।

सेवका बहवो नाथ सर्व्वधर्म्मपरायणाः।
तेषां राज्ञां हि सिद्ध्यर्थं स्वरक्षार्थं विशेषतः ।।१०७।।
निगदस्व महादेव कवचं परमाद्भुतम्।
यज्ञदानतपःसिद्धिर्ज्ञानभोगविभेदतः ।
सूचितं यन्मया पूर्व्वं कवचं कामदं शिवम् ।।१०८।।

।।श्रीशिव उवाच।।

शृणु देवि जगद्धात्रि विश्वस्य हितकारिणि ।
यस्य विज्ञानमात्रेण अष्टसिद्धीश्वरो भवेत् ।।१०९।।
अस्य कामकवचस्य सदाशिव ऋषिः सम्राट् छन्दः।
श्रीमदुग्रतारा देवता चतुर्व्वर्गसिद्ध्यर्थं जपे विनियोगः।
मायाबीजं सदा पातु मस्तके भुवनेश्वरी ।
कामबीजं सदा कण्ठं नीलकण्ठप्रियं शुभम् ।।११०।।
वधूबीजं पातु वक्षस्तारा सर्व्वार्थसाधिनी ।
सर्व्वज्ञानप्रदं बीजं महाबीजं प्रकीर्त्तितम् ।।
जङ्घे पातु सिद्धविद्यां श्यामारूपं कूर्च्चधृक् ।।१११।।
कमलिनी कामबीजं पादौ पातु महेश्वरी।
पार्श्वयोः पार्व्वती पातु हस्तयोस्तारिणी परा ।।११२।।
वैरोचनः पातु दक्षे नैर्ऋत्यां शङ्खपाण्डुरः।
पश्चिमायां पद्मनाभः वायव्यामसिताङ्गकः ।।११३।।
नीलकश्चोत्तरे पातु ऐशान्यां नामकः स्मृतः।
पाण्डुरः पातु पूर्व्वस्यामाग्नेय्यां तारकः सदा ।।११४।।
पुरः पद्मान्तकः पातु पश्चादपि यमान्तकः ।
विघ्नान्तकः पातु चोर्ध्वे अधश्चापि नरान्तकः ।।११५।।
इदन्तु कवचं देवि कथितं सुरसुन्दरी ।
यः पठेत्प्रयतो भूत्वा दत्वा पुष्पाञ्जलींस्तथा ।।११६।।
वाणी वक्त्रे भवेत्तस्य गद्यपद्यमयी शुभा ।
शारदा कमला गेहे धनपुत्रप्रदायिनी ।।११७।।

त्रिसन्ध्यं यः पठेन्नित्यं तस्य हस्ते सदा जयः ।
भूमौ विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि ॥११८॥
शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद्यदि ।
वामहस्ते सदा योषा धारयेत् कुलमण्डले ॥११९॥
धनं धान्यं सुतं जायां लभते च विनिश्चितम्[1] ।
दिवारात्रौ जलेऽरण्ये सङ्गमे जपकर्म्मणि ॥
तीक्ष्णरोषे गुरोर्व्वापि शत्रूणाञ्च समागमे ॥१२०॥
त्रिपुरापूजने चापि कालीताराप्रपूजने ।
पठित्वा धारयित्वा तु इच्छासिद्धिमवाप्नुयात् ॥१२१॥
इदं कवचमज्ञात्वा यो जपेदुग्रतारकाम् ।
अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः ॥१२२॥

॥इति श्रीतारातन्त्रे विश्वरूपवर्णने योगशास्त्रे श्रीमदुग्रताराकवचं समाप्तम्॥



अथ तारा एकपञ्चाशतनाम स्तोत्रम्

ॐ ताराया एकपञ्चाशत्नामस्तोत्रस्य अक्षोभ्य ऋषिर्बृहती-छन्दःश्रीकामतारा देवता चतुर्व्वर्गसिद्ध्यर्थं विद्यायाञ्च विनियोगः।

अम्बिका तारका देवी आद्या तारा ईडा तथा ।
ईश्वरी तारका उग्रा उग्रा विस्वस्वरूपिणी ॥१२३॥
ईकारा तृस्वरूपा च तृकारस्वरंरूपिणी ।
एकारा चैव ऐकारात्तकारस्वरधारिणी ॥१२४॥
औकारा चैव अङ्कारा अःकारा कःस्वरूपिणी।
खकारा च गकारा च घकारा ङःस्वरूपिणी ॥१२५॥
चकारा च छकारा च जकारा झःस्वरूपिणी ।
ञकारा च टकारा च ठकारा डढकारिणी ॥१२६॥
णतरूपा थकारा च दकारा धस्वरुपिणी ।
नकारा च पकारा च फकारा बस्वरूपिणी ॥१२७॥
भकारा च मकारा च यकारा रेफसम्भवा।
लकारा वस्वरूपा च शषरूपा सकारिणी ॥१२८॥

---

१. 'तम्' इति मूलमातृकायां नास्ति।

हकाराख्या लकारा च क्षकारा वर्ण्णरूपिणी।
इति ते कथितं दिव्यं वर्णरूपं स्तवं शुभम्।।१२९।।
यः पठेत् प्रातरुत्थाय देव्याः पूजनतत्परः।
जये दाने तथाऽरण्ये यः पठेत् साधकोत्तमः।।
सर्व्वसिद्धिमवाप्नोति नानाकार्य्यं लभेद् ध्रुवम्।।१३०।।

।।इति शक्तिसंग्रहे एकपञ्चाशतनामतारास्तोत्रं समाप्तम्।।



अथ त्रैलोक्यविग्रहं कवचम्

ॐ अस्य तारादिमूलत्रैलोक्यविग्रहकवचस्य महाकाल ऋषिः पङ्क्तिच्छन्दः कामतारा देवता धर्मार्थकाममोक्षार्थे विनियोगः।

ककारो मे शिरः पातु आकारः पातु कण्ठकम्।
मकारः पातु हृदयं जङ्घे पातु चकारकः।।१३१।।
आकारः पादयोः पातु सर्व्वकामार्थसिद्धिदः।
रेफः पातु सदा पृष्ठे आकारः सर्व्वतोऽवतु।।१३२।।
इति ते कथितं देवि कवचं परमाद्भुतम्।
श्रीताराकवचं दिव्यं सर्वकामार्थसिद्धिदम्।।१३३।।
कामतारेति वै नाम्ना कवचं देवदुर्लभम्।
सर्व्वकामार्थदं देवि सर्व्वसिद्धिप्रदायकम्।।१३४।।
भूमौ[१] विलिख्य गुलिकां काञ्चनस्थां विधारयेत्।
पुरुषो दक्षिणे बाहौ योषिद् वामभुजे तथा।।१३५।।
शतपुत्रवती योषा यदि भक्तिपरायणा।
पुमानपि तथा ज्ञेयः सर्व्वसिद्धीश्वरो भवेत्।।१३६।।
इदं कवचमज्ञात्वा तारां यो भजतेऽधमः।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते।।१३७।।
अल्पायुश्च निर्धनश्च जायते नात्र संशयः।
अपुत्रो जायते देवि सत्यं सत्यं वरानने।।१३८।।

।।इति शक्तिसंग्रहे हरपार्वतीसंवादे त्रैलोक्यविग्रहंनाम कवचं समाप्तम्।।

१. भूर्जे इति अनुमीयते।

।।अथ महाकालप्रियास्तोत्रम्।।

ॐ वन्दे कालविनाशाञ्च महाकालप्रियां तथा।
करालास्यां जगद्धात्रीं जगज्जीवां नमाम्यहम्।।१३९।।
शिवरूपां शक्तिरूपां शिवाढ्यां शिवमोहिनीम्।
क्रियाज्ञानप्रियां मोहां तारिणीं प्रणमाम्यहम् ।।१४०।।
विष्णुपत्नीं वेदगर्भां वेदिकां वेदसुन्दरीम् ।
कामिनीं कालिकां काम्यां कामसिद्धिं नमाम्यहम् ।।१४१।।
माहेश्वरीं मोक्षदात्रीं महामोहाङ्गनाशिनीम्।
रक्तधारान्वितां देवीं महार्हकङ्कणान्विताम्।।१४२।।
महाहिवृतसर्व्वज्ञां सर्व्वधात्रीं नमाम्यहम्।।१४३।।
नीलपद्मधृतां देवीं नीलपद्मकृताश्रयाम्।
नीलपद्मैर्भूषिताङ्गां श्यामलां प्रणमाम्यहम्।।१४४।।
महाहिवलयां देवीं महातारां नमाम्यहम्।
सदाशिवहृदि स्थात्रीं सदाशिवपरायणम्।।१४५।।
सदाशिवप्रियां दुर्गां शिवरूपां नमाम्यहम् ।
मुण्डमालावलीरम्यां रक्तधाराविभूषिताम् ।।१४६।।
सदा रक्तप्रियकरां तां वन्दे जगदीश्वरीम्।
अष्टम्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः ।।
षण्मासैः सिद्धिमाप्नोति मन्त्राणामेव निश्चितम् ।।१४७।।

।।इति महाकालखण्डे महाकालप्रियातारास्तोत्रं समाप्तम्।।

◆◆◆

श्रीमहाकाल प्रियातारा कवचम्

अस्य कवचस्य महादेव ऋषिरनुष्टुप्छन्दः श्रीमहाकालप्रिया तारादेवी देवता सकलविजयं नाम कवचपाठे विनियोगः।

पूर्वतः कालिका पातु तारिणी दक्षिणेऽवतु ।
पश्चिमे षोडशी विद्या सर्व्वत्र जयदायिनी ।।१४८।।
उदीच्यां पातु देवेशी सर्व्वाद्या भुवनेश्वरी।
अग्निकोणे सदा पातु भैरवी भैरवप्रिया ।।१४९।।

नैऋत्यां सततं पातु छिन्नमस्ताननप्रिया।
वायव्यां पातु सा देवी मातङ्गी सिद्धिदायिनी ॥१५०॥
ऐशान्यां सततं पातु कमला धनदायिनी।
धूमावती सदा रक्षेत् स्वर्गे च रसातले[1] ॥१५१॥
सर्व्वत्र सततं चापि स्वर्गे मर्त्ये रसातले।
तत्त्वस्य करणे चापि पुनाति किल सुन्दरी ॥१५२॥
महाकालप्रिया तारा भोगमोक्षप्रदायिनी।
इति ते कवचं देवि कथितं ब्रह्मरूपिणम् ॥१५३॥
पठित्वा धारयित्वा च नरो मुच्येत सङ्कटात्।
त्रिसन्ध्यं प्रपठेद्यस्तु तस्य सिद्धिः करस्थिता ॥१५४॥
पठित्वा धारयित्वा च सर्व्वसिद्धिमवाप्नुयात्।
पुत्रार्थी लभते पुत्रं धनार्थी धनमाप्नुयात् ॥
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥१५५॥

॥इति श्रीमहाकालखण्डे महाकालप्रियाताराकवचं समाप्तम्॥

◆◆◆

अथ ताराष्टकम्

ॐ मातर्नीलसरस्वती प्रणमतां सौभाग्यसम्पत्प्रदे
प्रत्यालीढपदस्थिते शवहृदि स्मेराननाम्भोरुहे ॥
फुल्लेन्दीवरलोचनत्रययुते कर्त्रीं कपालोत्पले।
खड्गञ्च दधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥१५६॥
वाचामीश्वरि भक्तकल्पलतिके सर्व्वार्थसिद्धिश्वरि।
गद्यप्राकृतवाक्यवचने सर्व्वज्ञसिद्धिप्रदे ॥१५७॥
नीलेन्दीवरलोचनत्रययुते कारुण्यवारांनिधे।
सौभाग्यामृतवर्षणेन कृपया सिञ्च त्वमस्मादृशः ॥१५८॥
खर्व्वे गर्वसमूह पूरिततनौ सर्वाङ्गवेशोज्वले।
व्याघ्रत्वक्परिपूरितसुन्दरकटीव्याधूतघण्टाङ्किते ॥१५९॥
सद्यः क्रतुगणद्रुजपरिमिलन्मुण्डद्वयी मूर्धजा।

---

१. 'बगलातले' इति पाठः प्रतीयते।

ग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयं नाशय ।।१६०।।
मायालिङ्गविकाररूपललनाबिन्द्वर्धचन्द्रात्मिके ।
हूँ-फट्कारमयी त्वमेव शरणं मन्त्रात्मिके मादृशः ।।१६१।।
मूर्त्तिस्ते जननी त्रिधामघटिता स्थूलातिसूक्ष्मा परा ।
वेदानां नहि गोचरा कथमपि प्राप्तां न तामाश्रये।।१६२।।
तत्त्वत्पादाम्बुजसेवया सुकृतिनोगच्छन्ति सायुज्यताम्।
तस्य श्रीपरमेश्वरस्य हरिहरब्रह्मादिस्वाम्यात्मनः ।१६३।।
संसाराम्बुधिमज्जने पटुतनुं देवेन्द्रमुख्यान्सुरान्।
मातस्त्वत्पदसेवने न विमुखान् किं मन्दधीः सेवते ।१६४।।
मातस्त्वत्पदपङ्कजद्वयरजो मुद्राङ्ककोटीरिणः ।
ते देवा जयशङ्करे विजयिनो निःशङ्कमङ्के स्थिताः ।।१६५।।
देवोऽहं भुवने न मे सम इति स्पर्धां वहन्तः परे।
तत्तुल्यां नियतं यथा शुचिःश्रीनाथं व्रजन्ति स्वयम् ।।१६६।।
त्वन्नामस्मरणात् परायणपरा द्रष्टुञ्च शक्त्या न ते।
भूत-प्रेत-पिशाच-राक्षसगणा यक्षाश्च नागाधिपाः ।।१६७।।
दैत्या दानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो।
डाकिन्यः कुपितान्तकश्च मनुजं मातः क्षणं भूतले ।।१६८।।
लक्ष्मीः सिद्धगणाश्च पादुकामुखा वायोस्तथा वारिणाम्।
स्तम्भश्चापि वराङ्गने गजघटा स्तम्भस्तथा मोहनम् ।।१६९।।
मातस्त्वत्पदसेवया खलु नृणां सिद्ध्यन्ति के ते गुणाः।
क्लान्तिः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः ।।१७०।।
ताराष्टकमिदं स्तोत्रं भक्तिमान् यः पठेन्नरः ।
प्रातर्मध्याह्नकाले वा सायाह्ने नियतः शुचिः ।।१७१।।
लभते कवितां दिव्यां सर्व्वशास्त्रार्थविद्भवेत् ।
लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान्।।१७२।।
कीर्तिः कान्तिश्च नैरुज्यं सर्व्वेषां प्रियतां व्रजेत् ।
विख्यातिश्चापि लोकेषु प्राप्यन्ते मोक्षमाप्नुयात् ।।१७३।।

।।इति श्रीनीलतन्त्रे श्रीनीलसरस्वतीस्तोत्रं समाप्तम्।।

अथ नीलसरस्वती स्तोत्रम्

।।तत्र भैरव्युवाच।।

मन्त्रं नीलसरस्वत्याश्चन्द्रमौले प्रकाशितम् ।
तस्या मन्त्रस्य श्रीनाथ कवचं वद साम्प्रतम् ।।१७४।।
यस्य विज्ञानमात्रेण क्षोभहीनश्च साधकः ।
तद्वदस्व महादेव चन्द्रखण्डविभूषण ।।१७५।।

।।श्रीशिव उवाच।।

निवारितं मया देवि सर्व्वतन्त्रेषु पार्व्वति ।
तद्वक्तव्यं भगवति गोपनीयं स्वयोनिवत् ।।१७६।।
श्रीविश्वविजयस्यापि कवचस्य सुरार्च्चितः ।
शङ्करोऽस्य ऋषिः प्रोक्तः देवता परमेश्वरी ।।१७७।।
भोगार्थमोक्षदा देवी श्रीमन्नीलसरस्वती ।
विख्यातं पँक्तिश्छन्दश्च कवचे सर्व्वसाधने ।।१७८।।
विनियोगः प्रसङ्गश्च सर्व्वसाधकसत्तमः ।
ॐ रजोदके ह्रुँ फट् स्वाहा शिवः पातु सदा मम ।।१७९।।
ॐ मणिधरिणि वज्रिणि सर्व्ववशङ्करि स्वाहा ।
कण्ठं पातु सदावतु रक्षं रक्ष माँ हूँ फट् स्वाहा रक्षः पातु सदावतु ।।१८०।।
पवित्रवज्रभूमे हूँ फट् स्वाहा कङ्कालं पातु मे सदा ।
हूँ फट् मणिधरिणि वज्रमहाप्रतिसरे रक्ष रक्ष माम् ।
हूँ फट् स्वाहा पादौ मे परिरक्षतु ।।१८१।।
अँ आँ हूँ फट् स्वाहा सर्व्वाङ्गम्मे सदावतु ।
इति ते कथितं देवि कवचं मन्मुखोदितम् ।।१८२।।
यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः ।
पठनाद्धारणान्मर्त्यः सर्व्वसिद्धिंलभेद् ध्रुवम् ।।१८३।।
भूमौ विलिख्य गुलिकां धारयेद्यदि मूर्द्धनि ।
स लभेत् सकलं पुण्यं देवीदर्शनमाप्नुयात् ।।१८४।।
इदं कवचमज्ञात्वा तारां यो भजतेऽधमः ।
अल्पायुनिर्धनो मूर्खो भवत्येव न संशयः ।।१८५।।

।।इति श्रीसिद्धियामले श्रीनीलसरस्वतीस्तोत्रं समाप्तम्।।

तारास्तोत्रम्

प्रत्यालीढपदे देवि सर्व्वशत्रु विनाशिनि।
भक्तेभ्यो वरदे देवि प्रसीद भक्तवत्सले ।।१८६।।
खड्गकर्तृधरे देवि महाघोरे भये सदा।
प्रसीद देवदेवेशि प्रसीद भक्तवत्सले।।१८७।।
गुणत्रयधरे देवि गुणराशिविभूषिते।
भक्तानां वरदे देवि प्रसीद भक्तवत्सले।।१८८।।
इन्दीवरधरे देवि इन्दीवरविभूषिते।
तारे तारप्रिये देवि प्रसीद भक्तवत्सले ।।१८९।।
मुण्डमालावलीरम्ये रक्तधाराविभूषिते।
शिववक्षस्थलस्थे च प्रसीद भक्तवत्सले।।१९०।।
करालवदने घोरे सर्व्वसिद्धिप्रदे शुभे।
सर्व्वार्थसाधिके देवि प्रसीद भक्तवत्सले ।।१९१।।
घोररूपे घोररावे घोरे घोरतरालये।
घोरार्थे घोरनिलये प्रसीद भक्तवत्सले ।।१९२।।
सर्व्वरूपे सर्व्वमयि सर्व्वाद्ये सर्व्वरूपिणि।
सर्व्वेषां प्राणदे देवि प्रसीद भक्तवत्सले।।१९३।।
इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयान्वितः।
महासिद्धिर्भवेत्तस्य देवीं पश्यति चक्षुषा ।।१९४।।

।।इति श्रीतारानिगमे तारास्तोत्रं समाप्तम्।।



अथ श्री नीलसरस्वती सस्त्रनाम स्तोत्रम्

अस्य श्रीमहानीलतन्त्रोक्तश्रीनीलसरस्वतीसहस्रनामस्तोत्रस्य गिरीशः ऋषिर्बृहती छन्दः कुलेश्वरी नीलसरस्वती श्रीमन्नीलसरस्वती महानीलसरस्वती देवता हूँ बीजं फट्शक्तिः श्रीतारा एकाक्षरी महाबीजं बीजं कीलकं तकारः शक्तिः कीलकं हकारः कूर्च्चं कीलकं लकारः स्वरकीलकं एकारः कामकीलकं ऐकारो वाणीकीलकं ईकारो नेत्रकीलकं धर्म्मार्थमोक्षकामेषु विनियोगः।

ॐ तारका तारिणी तीव्रा तीक्ष्णाऽतिक्रान्तमातुला।
तपी तापी च तपनी तुलसी तुङ्गरूपिणी।।१९५।।

त्रपात्रयी तृप्तिसिद्धा त्रिपुरा तारिणी तृषा।
तृष्णा त्रिलोका तीर्थ्या च तामसी तप्तकाञ्चना ।।१९६।।
तालुमूला त्रिलोकस्था तरणी तारणी स्त्रिणा ।
त्रिनेत्रा त्रिपुटा चैव त्रिकूटा तृप्तिदायिनी।।१९७।।
तारा ताली तालमूला तैष्या तौली च तूलदा ।
तृणपा त्रिफला ताम्रा त्रिशिवा त्रिकदात्रिका ।।१९८।।
तारकाख्या तारकाढ्या तारकानामधारिणी ।
तारकामन्त्ररूपा च तारकामन्त्रसिद्धिदा ।।१९९।।
तारकासिद्धितारस्था तारकाज्ञानशालिनी ।
तारकाज्ञानसिद्धा च तारकानामगुप्तिका।।२००।।
तारकाभावभावस्था तारकाभावभाविनी।
तारकानामयोगा च तारकानामयोगिनी ।।२०१।।
तारकानामतोषा च तारकानामतोषदा ।
तारकानामविज्ञाना तारकानामसंकुला ।।२०२।।
तारकानाममन्त्रा च तारकानाममन्त्रिणी ।
तारकानामदेहस्था तारकानामप्रेषिता।।२०३।।
तारकानामगोप्ता च तारकागोपिनीपरा ।
तारकाजपसन्तुष्टा तारकाजपमोक्षदा ।।२०४।।
तारकाभावदा तारा तारकाबीजशालिनी ।
तारकामन्त्रसंसिद्धा तारकामन्त्रसिद्धिदा ।।२०५।।
तारकाकुलकौला च तारकारसमञ्जरी।
तारकायन्त्रमोक्षा च तारकायन्त्रपुण्यदा ।।२०६।।
तारकायजनारक्ता तारकायजनप्रिया ।
तारिणीनामसन्तुष्टा तारिणीनामतत्परा ।।२०७।।
तारिणीप्रीतिदात्री च तारिणीजपतत्परा ।
तारिणीप्रीतिदा प्रीता तारिणीभोगसम्पदा।।२०८।।
तारिणीभोगभोगाढ्या तारिणीजपदायिका।
तारिणीप्राणदा प्राणा तारिणीप्रीतिसाधिनी ।।२०९।।

तारिणीहोमसंग्राह्या तारिणीनामसंश्रया ।
तारिणीकुलसर्व्वस्वा तारिणीकुलमोक्षदा ।।२१०।।
तारिणीज्ञानदात्री च तारिणीमोक्षदायिनी ।
तारिणीकरुणाधारा तारिणीकरुणात्मिका ।।२११।।
तारिणीयोनिमध्यस्था तारिणीयोनिमध्यगा ।
तारिणीकलहप्रीता तारिणीकलहात्मिका ।।२१२।।
तारिणीमोक्षदात्री च तारिणीमोक्षसिद्धिदा ।
तारिणीकृपणाशक्ता तारिणीव्रतवादिनी ।।२१३।।
तारिणीशब्दरूपा च तारिणीशब्दरूपिणी ।
तारिणीवर्णसन्तोषा तारिणीव्रतधारिणी ।।२१४।।
तारिणीपूजकप्राणा तारिणीकुलतोषिका ।
तारिणीमन्त्रसन्तुष्टा तारिणीयन्त्रधारिणी ।।२१५।।
तारिणीप्रीतियुक्तात्मा तारिणीकीर्त्तिरूपिणी ।
तारिणीकर्म्मसम्भोगा तारिणीकर्मसौख्यदा ।।२१६।।
तीव्ररूपा तीव्रमयी तीव्रव्रतपरायणा ।
तीव्रात्मिका तीव्रतेजा तीव्रतेजस्विनी परा ।।२१७।।
तीव्रवेगा तीव्रघृणा तीव्रात्मा तीव्रसेविणी ।
तीव्रज्ञानहरा देवी तीव्रमोक्षप्रदायिनी ।।२१८।।
तीव्रक्रिया तीव्रकरी तीव्रव्रणातितीव्रगा ।
तीव्रस्नाता तीव्रसहा तीव्राद्या तीव्रयोगिनी ।।२१९।।
तीव्रं प्रियङ्करी तीव्रभीषणा तीव्रसुन्दरी ।
तीव्रव्रता तीव्रमयी तीव्रसारा च तीव्रिका ।।२२०।।
तीव्रगा तीव्रपा तीव्रमेधिनी तीव्रसङ्कुला ।
तीव्रब्रह्ममयी तीव्रज्ञानमत्ता च तीव्रकृत् ।।२२१।।
तीव्रमयीभवा तीव्रमाना वृत्तिमनोहरा ।
द्रीं द्रां मन्त्रजपाशक्ता तीव्रमन्त्रजपप्रिया ।।२२२।।
तीव्रप्रयोगनिरता तीव्रयन्त्रवितारिणी ।
त्रिनेत्रा व्रणरूपा च तीव्रनेत्रा महोदरी ।।२२३।।

तीव्रस्तोत्रपरा नित्या तीव्रज्ञानमनोरथा।
तीव्रप्रश्ना तीव्रशवा तीव्ररूपा धरा शुभा ।।२२४।।
तीक्ष्णरूपा तीक्ष्णमयी तीक्ष्णज्ञा तीक्ष्णरूपिणी।
तीक्ष्णाधरा तीक्ष्णकरा तीक्ष्णप्रेममयी परा ।।२२५।।
तीक्ष्णानन्दा तीक्ष्णहरा तीक्ष्णज्ञानविरोधिनी।
तीक्ष्णेशी तीक्ष्णसन्तोषा तीक्ष्णदारा च तीक्ष्णुका ।।२२६।।
तीक्ष्णमती तीक्ष्णसती तीक्ष्णमानसकारिणी।
तीक्ष्णप्रकारविनता तीक्ष्णप्राकारवेष्टिका ।।२२७।।
तीक्ष्णरोगविनाशा च तीक्ष्णनामविनोदिनी।
तीक्ष्णपातकनाशा च तीक्ष्णपारकरूपिणी ।।२२८।।
तीक्ष्णब्रह्ममयीमाला तीक्ष्णब्रह्मपरायणा।
तीक्ष्णजिह्वाधरादेवी तीक्ष्णनाराच तीक्ष्णगदा ।।२२९।।
तीक्ष्णप्रज्ञा तीक्ष्णमाना तीक्ष्णप्राणा च तीक्षिणी।
तीक्ष्णलोचनसन्तुष्टा तीक्ष्णलोचनमोददा।।२३०।।
तीक्ष्णास्त्रधारिणीदेवी तीक्ष्णास्त्रपरिवेदिनी।
तीक्ष्णवेदप्रभावाचः तीक्ष्णवेदपरायणा ।।२३१।।
तीक्ष्णमोहविनाशा च तीक्ष्णमोहविमोहिनी।
तीक्ष्णमैथुनसंहृष्टा तीक्ष्णमैथुनशोभित्ता।।२३२।।
तीक्ष्णनिर्व्वाणकरिणी तीक्ष्णनिर्व्वाणदायिनी।
तिक्तासया तिक्तरूपा तिक्ताढ्या तिक्तरूपिणी।।२३३।।
तिक्तप्राणा तिक्तमयी तिक्तप्रेमविनाशिनी।
तिक्तास्या तिक्तयुक्तास्या तिक्तज्ञा तिक्ततिक्तिनी।।२३४।।
तिक्तमोहप्रिया देवी तिक्तमोहविनोदिनी।
तिक्तानामसदानन्दा तिक्तनामपरायणा ।।२३५।।
तिक्तप्राणप्रिया तिक्ती तिक्तकाननसंस्थिता।
तिक्ताभवनसन्तोषा तिक्तद्रव्यसदावतिः ।।२३६।।
तिक्तप्रियातितुष्टात्मा तिक्तद्रव्यविभोजिनी।
तिक्तप्रीतिकरी देवी तिक्ताननविधारिणी।।२३७।।

तिक्तासवसमायुक्ता तिक्तासवगुणाश्रया।
तिक्तशुद्धिप्रिया देवी तिक्तशुद्धिविनोदिनी।।२३८।।
तिक्तद्रव्यतृप्तिकरी तिक्तद्रव्यमनोहरा।
तिक्तगेहा तिक्तदेहा तिक्तमानसपूरणी ।।२३९।।
तिक्तपत्रविनोदी च तिक्तपत्रमहोदरी।
तिक्तपत्रविनाशा च तिक्तपत्रविनाशिनी।।२४०।।
तलस्था तलरूपा च तलस्थाननिवासिनी।
तलस्थदेवपूज्या च तलस्था गृहमध्यगा ।।२४१।।
तलदा तलहा ताला तलानन्दप्रवर्धिनी।
तलरूपा तलान्तस्था तलज्ञा तलपाणिनी।।२४२।।
तलप्रीता तलगतिस्तलप्रीतिप्रदायिनी।
तलनामसदानन्दा तलनामविभूतिदा ।।२४३।।
तलसाधनसन्तुष्टा तलाख्या तलपाणिनी।
तलस्नेहा तलस्निग्धा तलनामसुखप्रदा ।।२४४।।
तलनामगुहाशय्या तलनामप्रियम्वदा।
तलनामसमाधारा तलनामसदाकृतिः।।२४५।।
तलनामकृपाकारी तलनामकृपालया।
तलनामसदावासा तलस्थाननिवासिनी ।।२४६।।
तलनामप्रियङ्कारी तलनामगृहेश्वरी।
तलनामकुलाचारा तलनामाङ्गनेश्वरी ।।२४७।।
तलनामकलान्तस्था तलनामकलाङ्गना।
तलनामभवा शक्ता तलनामभवाकुला ।।२४८।।
तलातलगृहप्राणा तलातलविनोदिनी।
तलातलमनोहारी तलातलमनोमयी ।।२४९।।
तुलाधरा तुलारूपा तुलाप्राणा च तोलिनी।
तुलाधारा तुलासारा तुलाहारा तुलातुरा ।।२५०।।
तुलाङ्गा च तुलासङ्गा तुलासिद्धिप्रदायिनी।
तुलानामा तुलाधामा तुला मङ्गलदायिनी।।२५१।।

तुलाक्रीता तुलाप्रीता तुलानामविलज्जिनी।
तुलानामप्रकाशात्मा तुलानामप्रकाशिनी।।२५२।।
तुला नाम सदानन्दा तुलानामपरायणा।
तुला नाम सदाज्ञाना तुला नाम कुलाकुला।।२५३।।
तुला नाम गृहेशाना तुला नाम विनोदिनी।
तुलाढ्या च तुलाख्या च तुलाद्या च तुलाऽतुला।।२५४।।
तुलाऋद्धिस्तुलासिद्धिस्तुलामन्त्रसुसिद्धिदा।
तुलाधारी तुलाकारी तुलानाम्नी तुलाशया।।२५५।।
तुलास्नायी तुलाशायी तुलागेहनिवासिनी।
तुलाकुलारविन्दा च तुलाकुलविशोभिनी।।२५६।।
तुलाङ्गणविशोभा च तुलाकुलजयन्तिका।
तुलाङ्गणजयाख्या च तुलाङ्गनजयप्रदा।।२५७।।
तुलाकुलजगन्माता तुलाकुलस्वहायिनी।
तुलाकुलकुलाचारा तुलाकुचन्दनार्च्चिता।।२५८।।
तपीध्यानविवृद्धा च तपीज्ञानविवृद्धिदा।
तपीज्ञानसमाकीर्ण्णा तपीज्ञानसमाधुना।।२५९।।
तपीज्ञानसमाख्याना तपीज्ञानजगन्मयी।
तपीनामसदानन्दा तपीनामविनोदिनी।।२६०।।
तपीनामब्रह्ममयी तपीनामविमोक्षदा।
तपीनामसहस्राख्या तपीनामकुलाकुला।।२६१।।
तपीनामानन्दपरा तपीनामपरात्मिका।
तपीनामग्रन्थिधरा तपीनामसुग्रन्थिनी।।२६२।।
तपीनामकुलाचारा तपीनामकुलार्च्चिता।
तपीनामकण्ठभूषा तपीनामविहारिणी।।२६३।।
तपीनामकृपाशक्ता तपीनामगुणालया।
तपीरूपधरासाक्षात् तपीरूपातपीप्रिया।।२६४।।
तपीज्ञानक्रियान्तस्था तपीज्ञानस्वरूपिणी।
तपीऋद्धा तपीसिद्धा तपीक्रुद्धा तपीस्थिरा।।२६५।।

तपीपादस्पृहाढ्या तपीमैथुनकारिणी ।
तपीकुलाशक्तमना तपीज्ञानान्तकात्मिका ।।२६६।।
तपीकौचविमर्द्दा च तपीदामोदरप्रिया ।
तपीसिद्धान्तकरिणी तपीसिद्धान्तमालिनी ।।२६७।।
तपीनाथ प्रियानन्दा तापीनामसमाकुला ।
तापीनाथ प्रियादेवी तापीनाथकुलेश्वरी ।।२६८।।
तापीनाथपराढ्या च तापीनाथविनोदिनी ।
तापीनाथगुणाशक्ता तापीनाथकुलप्रिया ।।२६९।।
तापीनाथक्रियाशक्ता तापीनाथगुणात्मिका ।
तापीनाथसदानन्दा तापीनाथक्रियान्तका ।।२७०।।
तापीनाथविमोक्षा च तापीतापविमोचिनी ।
तापीतापविनाशा च तापीतापविनाशिका ।।२७१।।
तापीतापसमाकीर्णा तापीतापविमोचिनी ।
तापीतापकुलाक्रान्ता तापीतापविमोहिनी ।।२७२।।
तापीतापपरोक्षा च तापीतापविमोहिका ।
तापीतापविनोदा च तापीतापविनोदिनी ।।२७३।।
तापीतापग्रहाशक्ता तापीतापसमायुता ।
तापीतापसमानाख्या तापीतापगृहेष्टदा ।।२७४।।
तापीतापरमारम्या तापीतापरमेष्टदा ।
तापीतापगुणाशक्ता साध्या तापसुतापिनी ।।२७५।।
तपिनीकुलसिद्धा च तपिनीज्ञानसिद्धिदा ।
तपिनीतापिनी ताप्या तापपापविमोहिनी ।।२७६।।
तपिनीकुलसेव्या च तपिनीकुलरक्षिता ।
तपिनीज्ञानगम्या च तपिनीज्ञानसिद्धिदा ।।२७७।।
तपिनीकुलमाल्या च तपिनीकुलसागरा ।
तपिनीकुलसिद्धिदा तपिनीकुलदायिका ।।२७८।।
तपिनीदेहसंस्था च तपिनीदेहवासिनी ।
तपिनीनामसंस्था तपिनीनामवासिनी ।।२७९।।

तपिनीजयदा चैव तपिनीजयदायिनी ।
तपिनीकुलभोग्या च तपिनीभोगकारिणी ।।२८०।।
तपिनी कर्म्मनाशा च तपिनीमोक्षदायिनी।
तपिनीतापभङ्गा च तपिनीतापतापिनी ।।२८१।।
तपिनीसूर्यसङ्काशा तपिनीभोगकान्तिदा।
तपिनीसिद्धिसंहन्त्री तपिमीसिद्धिहारिणी ।।२८२।।
तपिनीकुलसम्पन्ना तपिनीपावकप्रिया ।
तपिनीतापसंकाशा तपिनीतनयप्रिया ।।२८३।।
तुलसीपत्रमध्यस्था तुलसीपत्रमध्यगा।
तुलसीतनयानङ्गा तुलसीकाननान्तका।।२८४।।
तुलसीकाननप्राणा तुलसीकाननान्तगा ।
तुलसीवृक्षमध्यस्था तुलसीतर्पणोद्यता ।।२८५।।
तुलसीपत्रसन्तोषा तुलसीपत्रतर्पणा ।
तुलसीपत्रसंग्राह्या तुलसीपत्रसारदा ।।२८६।।
तुलसीपत्रसारा च तुलसीपत्रसिद्धिदा ।
तुलसीप्राणदा प्राणा तुलसीसाधनप्रिया।।२८७।।
तुलसीपत्रसिद्धाढ्या तुलसीपत्रमण्डिता ।
तुलसीपत्रनासा च तुलसीपत्रनासिका ।।२८८।।
तुलसीपत्रपादा च तुलसीपत्रभक्षिका ।
तुलसीपत्रसंकाशा तुलसीपत्रपापदा ।।२८९।।
तुलसीपत्रदुर्बोधा तुलसीपत्रनैष्ठिका ।
तुलसीपत्रसंख्याता तुलसीपत्रसंस्पृहा ।।२९०।।
तुलसीपत्रसंनष्टा तुलसीपत्रसंगुह्या।
तुलसीकाष्ठसंभूता तुलसीकाष्ठसंगता ।।२९१।।
तुलसीपत्रसंवृन्ता च तुलसीस्पृष्टनासिका ।
तुङ्गदा तुङ्गहा तुङ्गा तुङ्गसारार्थदायिका ।।२९२।।
तुङ्गस्तनी तुङ्गमध्या तुङ्गप्राणा च तुङ्गका।
तुङ्गाङ्गी तुङ्गदेहा च तुङ्गनामप्रसारिणी ।।२९३।।

तुङ्गगाता तुङ्गमाता तुङ्गाख्या तुङ्गतुङ्गिनी ।
तुङ्गोष्ठा तुङ्गदन्ता च तुङ्गप्राणापहारिणी ।।२९४।।
तुङ्गदैत्यविनाशा च तुङ्गदैत्यवनस्थला ।
तुङ्गदैत्यप्राणहरा तुङ्गदैत्यविनोदिनी ।।२९५।।
तुङ्गज्ञानकरीदेवी तुङ्गज्ञानपरायणा ।
तुङ्गज्ञानक्रमाशक्ता तुङ्गज्ञानविधारिणी ।।२९६।।
तुङ्गस्नेहधरामाता तुङ्गज्ञानकुलेक्षणा ।
तुङ्गज्ञानविहारा च तुङ्गज्ञाना च कौशला ।।२९७।।
तुङ्गज्ञानब्रह्ममयी तुङ्गज्ञानविशारदा ।
तुङ्गप्राणकरी तौङ्गी तुङ्गारण्यविहारिणी ।।२९८।।
तुङ्गनीला तुङ्गशीला तुङ्गप्रेमपरायणा ।
तुङ्गमानससंकाशा तुङ्गमानसकल्पिनी ।।२९९।।
तुङ्गमानसमोक्षा च तुङ्गमानसपूरिणी ।
तुङ्गमानसकामार्ता त्रपारूपा त्रपेश्वरी ।।३००।।
त्रपामयी त्रपाप्रीता त्रपाप्राप्ता त्रपात्मिका ।
त्रपाकारा त्रपासारा त्रपाधारा त्रपालया ।।३०१।।
त्रपारूपधरा देवी त्रपारूपपरायणा ।
त्रपामध्यगता शान्ता त्रपाकान्ता त्रपात्मिका ।।३०२।।
त्रपानामप्रपूर्या च त्रपानामविनोदिनी ।
त्रपानामगृहीता च त्रपाकाननमध्यगा ।।३०३।।
त्रपाकाननतोष्या च त्रपाकाननदेशिका ।
त्रपाकारणसन्तोषा त्रपामध्यनिवासिनी ।।३०४।।
त्रपामन्त्रस्वरूपा च त्रपाबीजस्वरूपिणी ।
त्रपाबीजप्रमाणा च त्रपाबीजानुसारिणी ।।३०५।।
त्रपामध्यगता बीजा त्रपामध्यसुसिद्धिदा ।
त्रपाबीजसमप्राणा त्रपाबीजविधारिणी ।।३०६।।
त्रपाबीजजपाशक्ता त्रपाबीजपरायणा ।
त्रपाबीजग्रन्थियुता त्रपाबीजसुमध्यगा ।।३०७।।

त्रपाबीजात्मिकासाध्या त्रपागेहनिवासिनी ।
त्रपाप्राणपहारी च त्रपाप्राणविहारिणी ।।३०८।।
त्रपामध्यविहाराद्या त्रपाशान्तिप्रदायिनी ।
त्रपानाथमहानाथा त्रपाकरणतत्परा ।।३०९।।
त्रयीपरा त्रयीधारा त्रयीकारा त्रय्यात्मिका ।
त्रयीमूर्त्तित्रयीविद्या त्रयीविद्याप्रकाशिनी ।।३१०।।
त्रयीविद्यामयीविद्या त्रयीमूर्त्तिविधारिणी ।
त्रयीनेत्रा त्रयीगात्रा त्रयीभोगविभोगिनी ।।३११।।
त्रयीगुणसमाक्रान्ता त्रयीगुणविधारिणी ।
त्रयीगुणविधेयात्मा त्रयीगुणपरायणा ।।३१२।।
त्रयीगुणसमाक्रान्ता त्रयीगुणगुणोत्तरा ।
त्रयीसाधनसन्तुष्टा त्रयीसाधनत्परा ।।३१३।।
त्रयीब्रह्ममयी माता त्रयीब्रह्मसुभाषिणी ।
त्रयीनाथपरा त्रेर्य्या त्रयीगुणगुणोद्भवा ।।३१४।।
त्रयीगुणविधेयात्मा त्रयीगुणपरस्परा ।
त्रयीगुणसमाक्रान्ता त्रयीगुणगुणोत्तरा ।।३१५।।
त्रयीगुणप्रियापारा त्रयीगुणगुणोद्भवा ।
त्रयीगुणनिवासा च त्रयीगुणसमीहिता ।।३१६।।
त्रयीगुणगुणाढ्या च त्रयीगुणकुलोत्तरा ।
त्रयीगुणसमालास्या त्रयीगुणसुसिद्धिदा ।।३१७।।
त्रयीगुणकरातोषा त्रयीगुणकुलक्रिया ।
त्रयीनामसमुत्पन्ना त्रयीनामसुसंयुता ।।३१८।।
त्रयीनामसमाकीर्णा त्रयीनामकुलासिता ।
त्रयीब्रह्मब्रह्मविद्या त्रयीब्रह्मविनोदिनी ।।३१९।।
त्रयीकला त्रयीकाला त्रयीक्लेशा त्रयात्मिका ।
तृप्तिरूपा तृप्तिमयी तृप्तिमूर्त्तिविधारिणी ।।३२०।।
तृप्तिस्नेहा तृप्तिकारी तृप्तिरूपविनोदिनी ।
तृप्तिज्ञाना तृप्तिधरा तृप्ता तृप्तिविहारिणी ।।३२१।।

तृप्तिचित्तसिद्धिकरी तृप्तिचित्तविनोदिनी।
तृप्तिशक्तिसिद्धिकरी तृप्तिशक्तिविशारदा॥३२२॥
तृप्तिशक्तिमनोज्ञा च तृप्तिशक्तिविहारिणी।
तृप्तिमोहविनाशा च तृप्तिदेहप्रपूरिणी॥३२३॥
तृप्तिदेहविभागा च तृप्तिश्रेणिव्यवस्थिता।
तृप्तिसिद्धिप्रसन्नास्या तृप्तिसिद्धिकुलोद्भवा॥३२४॥
तृप्तिसिद्धिपराविद्या तृप्तिसिद्धेश्वरान्विता।
तृप्तिसिद्धिनिशाचरा तृप्तिसिद्धिमनोमयी॥३२५॥
तृप्तिसिद्धामहाविद्या तृप्तिसिद्धाकरस्थिता।
तृप्तिमोक्षा तृप्तिभोग्या तृप्तिका तृप्तिनाशिनी॥३२६॥
तृप्तिज्ञाना महाज्ञाना तृप्तिज्ञानसुसिद्धिदा।
तृप्तिपारा तृप्तिदेश्या तृप्तिद्वेषविनाशिनी॥३२७॥
तृप्तिक्लेशविनाशा च तृप्तिसौभाग्यदायिनी।
तृप्तिसौभाग्यनिरता तृप्तिब्रह्मपरायणा॥३२८॥
त्रिपुरारूपविभवा त्रिपुराभोगमोक्षदा।
त्रिपुरामन्त्ररूपा च त्रिपुरानन्ददायिनी॥३२९॥
त्रिपुरानन्दसुखिनी त्रिपुरानन्दतारिणी।
त्रिपुरानन्दतोषा च त्रिपुरापुरवासिनी॥३३०॥
त्रिपुरानन्दसिद्धास्या त्रिपुरानन्दतोषिता।
त्रिपुरागमनाशक्ता त्रिपुरापुरभैरवी॥३३१॥
त्रिपुराभजनाशक्ता त्रिपुराभजनप्रिया।
त्रिपुराजनसाध्या च त्रिपुराजनसम्भवा॥३३२॥
त्रिपुरात्रिपुराकान्ता त्रिपुरागुरुसेविता।
त्रिपुराज्ञानसम्पूर्णा त्रिपुराबालभैरवी॥३३३॥
त्रिपुराबालरूपा च त्रिपुरास्निग्धकारिणी।
त्रिपुरायोनिसंस्थाना त्रिपुराकुलपालिनी॥३३४॥
त्रिपुराकुलशाम्या च त्रिपुरात्रिपुरात्मिका।
त्रिपुरापुरमध्या च त्रिपुरापुरगामिनी॥३३५॥

त्रिपुराकुलसिद्धा च त्रिपुराकुलगौरिका ।
त्रिपुरात्रिगुणप्राप्ता त्रिपुरागोपनात्मिका ॥३३६॥
त्रिपुराकर्म्मतारा च त्रिपुराखण्डनेश्वरी ।
तृष्णाविनाशा तृष्णा च तृष्णाढ्या तृष्णिका तथा ॥३३७॥
तृष्णेशी तृष्णरूपा च तृष्णावनसमुद्भवा ।
तृष्णास्थितामहातृष्णा तृष्णाकारी तृषा तथा ॥३३८॥
तृष्णानाशकरी चैव तृष्णानामवितोषिणी ।
तृष्णागुह्यपरा चैव तृष्णानामपरायणा ॥३३९॥
तृष्णानामग्रहान्तःस्था तृष्णानामसुखावहा ।
तृष्णानामकुलाचारा तृष्णानामप्रभेदिका ॥३४०॥
तृष्णानाममनोज्ञा च तृष्णानामसुखस्तथा ।
तृष्णनाममनोवृत्तिस्तृष्णानामगृहेष्टदा ॥३४१॥
तृष्णाख्या युवतीसङ्गा तृष्णाख्या कुचमर्दना ।
तृष्णाख्या तृष्णासाराख्या तृष्णाभावनभाविता ॥३४२॥
तृष्णाकुलमोक्षनाशा तृष्णागहनवासिनी ।
तृष्णाकुलसमूहा च तृष्णाकुलसमीहिका ॥३४३॥
तृष्णानाशकरूपा च तृष्णानाशविधायिनी ।
तृष्णानाशकरा पुण्या तृष्णाब्रह्मण्यदायिनी ॥३४४॥
तृष्णाब्रह्मण्यरूपा च तृष्णाब्रह्मण्यसाधिका ।
तृष्णागहनमत्ता च तृष्णागहनसेविता ॥३४५॥
तृष्णातृप्तिः तार्ष्णिकीका तार्ष्णिका तृप्तितीर्थहा ।
त्रिलोकवासिनी चैव त्रिलोकजयदायिनी ॥३४६॥
त्रिलोकनाशिनी वापि त्रिलोकजनपुण्यदा ।
त्रिलोकसुखदासत्या त्रिलोकज्ञानवासिनी ॥३४७॥
त्रिलोकज्ञानहारी च त्रिलोकज्ञानिनी तथा ।
त्रिलोकनाशकर्त्री च त्रिलोकसुखदा मता ॥३४८॥
त्रिलोकभक्तिसुखिनी त्रिलोकमध्यवासिनी ।
त्रिलोकज्ञानकाव्या च त्रिलोकालङ्कृता परा ॥३४९॥

त्रिलोकभुवना चैव त्रिलोकप्रियकारिणी ।
त्रिलोकस्थानसंस्था च त्रिलोकानन्तविग्रहा ।।३५०।।
त्रिलोकालोकभाव्या च त्रिलोकालोकमोक्षदा ।
त्रिलोकालोकशयनी त्रिलोकालोकसंकरा ।।३५१।।
त्रिलोकलोकदेहस्था त्रिलोकालोकपारगा ।
त्रिलोकालोकत्रयाख्या च त्रिलोकालोकगोपिता ।।३५२।।
त्रिलोकालोकविरमा त्रिलोकालोकसाधिनी।
त्रिलोकालोकत्रिगुणा त्रिलोकालोकलिङ्गिनी।।३५३।।
त्रिलोकधिषणाशक्ता त्रिलोकालोकचापिनी।
त्रिलोकालोकशुभदा त्रिलोकालोकपान्थगा।।३५४।।
त्रिलोकालोकभयदा त्रिलोकालोकभाविता ।
तिग्मरूपा तिग्ममयी तिग्मेशी तिग्मकारिणी।।३५५।।
तिग्मप्राणप्रिया देवी तिग्मप्राणप्रयोजिनी ।
तिग्मप्राणतितिक्षा च तिग्मप्राणविनोदिनी ।।३५६।।
तिग्मप्राणमनोभावा तिग्मप्राणसुखावहा ।
तिग्मप्राणगतिस्तिग्मतोषिका तिग्मविग्रहा ।।३५७।।
तिग्मनामसदानन्दा तिग्मनामविनोदिनी ।
तिग्ममानाकण्ठभूषा तिग्ममानाविभूषणा।।३५८।।
तिग्मगा तिग्मभावा च तिग्मप्रीता तु तिग्मिका ।
तिग्मभावसमुत्पन्ना तिग्मग्रामनिवासिनी।।३५९।।
तिग्मस्थाननिवासा च तिग्मस्थानानुवासिनी।
तिग्मप्राणप्रिया देवी तिग्माख्या तिग्मशालिनी ।।३६०।।
तिग्मसाम्या तिग्मगम्या तिग्मसौख्यविनाशिनी ।
तिग्मश्रेष्ठा तिग्मदेष्टा तिग्मद्वेषविनाशिनी।।३६१।।
तिग्मनाम्नीमोक्षकरा तिग्मनामपरासुखा ।
तिग्मनाममहामाया तिग्मनामकुलेश्वरी ।।३६२।।
तिग्मनामविनाशा च तिग्मनामविनाशिनी ।
तिग्मनामसदाप्राणा तिग्मनामगतिःसदा ।।३६३।।

तामसीतामसानन्दा तामसीतामसीक्रिया।
तामसीप्राणदाप्राणा तामसीनष्टविग्रहा ।।३६४।।
तामसीकृपणात्का च तामसीकुलघातिनी।
तामसीशिष्यहृदया तामसी तामसालया ।।३६५।।
तामसीनामसन्तुष्टा तामसीनामकामिनी ।
तामसीनामसाध्या च तामसीनामगामिनी।।३६६।।
तामसीकृपणाशक्ता तामसीकृपणाकुला।
तामसीभजनाशक्ता तामसीतृपणाकुला।।३६७।।
तामसीभावनाग्राह्या तामसीभावनाकुला।
तामसीभावनाग्राही तामसीभावदायिनी।।३६८।।
तामसीकामुकोन्मत्ता तामसीकामुकोत्सुका।
तामसीकुशलतास्या तामसीतामसप्रिया ।।३६९।।
तामसीतामसीसौधा तामसीत्रिगुणालया।
तामसीगणनाशक्ता तामसीगणनात्मिका ।।३७०।।
तामसीगणसिद्धा च तामसीगणमोहदा ।
तामसीकुलसिद्धा च तामसीकुलनायिका ।।
तामसीकुलगोपाला तामसीकुलगोपिता ।।३७१।।

यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा।
तारावाक्यमनुस्मरन् प्रियतमं चोमावचः कारणम्।।
ब्रह्मानन्दकृतौ सुसाधनविधौ ताररहस्ये शुभे।
तारास्तुतिपरो सप्तम् पटलो पूर्णातांगतः।।३७२।।

।।इति ताराहस्यतन्त्रे सप्तमपटलः समाप्ततामगमत्।।७।।



अथ तारारहस्यवृत्तिः

।।अथ प्रथमपटलः।।

नित्यपूजानिर्णयः

।।श्रीनाथाय नमः।।

उर्ज्जितानन्दगहनां सर्व्वदेवस्वरूपिणीम् ।
परां वाग्रूपिणीं वन्दे महानीलसरस्वतीम् ।।
सुप्रकाशविमर्शाख्यबीजाद्यङ्कुररूपिकाम् ।
पूर्णाहन्तामयीं वन्दे महानीलसरस्वतीम् ।।
नीलतन्त्रं समाज्ञाय सिद्धसारस्वतं परम् ।
नीलतन्त्रं मत्स्यसूक्तं गान्धर्वं फेरवीं तथा ।।
गुरूणाञ्च मतं ज्ञात्त्वा गुरुभिः सिद्धभूमिकाम्।
कृता श्रीशङ्करेणैषा तारारहस्यवृत्तिका।।
नित्यपूजाप्रमाणंन्तु पटले प्रथमे तथा ।
दीक्षाविधिर्द्वितीये स्यात्पुरश्चर्या तृतीयके ।।
नैमित्तिकं चतुर्थे तु पञ्चमे काम्यनिर्णयः ।
रहस्यनिर्णयः षष्ठे कुमारी सप्तमे तथा ।।
अष्टमे तु पुरश्चर्यारहस्याः परिकीर्त्तिताः ।
नवमे पटले देव्या निर्णयो मन्त्रविद्ययोः ।।
दशमे पटले स्तोत्रं माहात्म्यमेकादशे तथा ।
द्वादशे पटले सम्यग् भावानां परिनिर्णयः ।।
नित्यपूजाप्रयोगस्तु पटले च त्रयोदशे ।
सम्यग्विधानं होमश्च तारायास्तु चतुर्दशे ।।

अथ नित्यपूजाप्रमाणं यथा–

ननु ब्रह्मवादिमतं विहाय कथं शक्तौ यत्नः क्रियते। तैरेव भुक्तिमुक्ती भवतः किमनेनेति। तथा च श्रुतिः–योऽविद्यामुपासते सोऽन्धन्ततमः प्रविशतीति'। नैवं वक्तव्यं, संसारनियतिरूपा विद्येति सुरेश्वराचार्य्याः।

तथा च शाम्भव सूत्रे–

ममेदं खलु कर्त्तव्यं अकर्त्तव्यमिदं मम।
इत्थं नियमनस्यास्य हेतुर्नियतिरुच्यते।।

तेन त्वाद्या विद्यापरेयं श्रुतिः। अत्र तु ह्येवमपश्रुतिरपि–जीवाश्रया ब्रह्मपदात्म–विद्या तत्त्वविन्मता। इति जीवाश्रयेति जीवानां मोक्षदशायां ब्रह्मपदा ब्रह्मस्वरूपेति यावत्। प्रामाणिकवचनमपि–

यत्रास्ति भोगो न च तत्र मोक्षो,
यत्रास्ति मोक्षो न च तत्र भोगः।
शिवापदाम्भोजयुगार्च्चकस्य
भोगश्च योगश्च करस्थ एव।।

एवमन्येभ्यो दर्शनेभ्यो भोगमोक्षयोरचिरकालाभ्यासेन कदाचिदपि सालोक्यादिरूपो भवति न वेति।

तथा चोर्ध्वाम्नायें–

योऽन्येभ्यो दर्शनेभ्यो भुक्तिं मुक्तिं च कांक्षति।
स्वप्नलब्धधनेनैव धनवान्स भवेद्यदि।।
शुक्तौ रजतविभ्रान्तिर्यथा जायेत पार्वति।

रुद्रयामलेऽपि–

वामदक्षिणसिद्धान्ते शीघ्रं याति पदादिषु।
सालोक्याद्यं भवेत्तस्य सायुज्यमकुलागमे।।

न चैवं निःसंदिग्धोऽस्मि तथापि पूज्यैः शक्त्या परापरा मुक्तिः किं वा साक्षात्तत्रापि–

ऊर्ध्वा सा भवता सच्चित् तत्त्वमसीति वाक्यविदितैर्ब्रह्मात्मविद्या शिवा।
आत्माद्यैरतुलप्रभावसहितैस्कच्चैस्त्रिभिः सद्गुरोः।
त्वद्रूपस्य मुखारविन्दविवरात्सम्प्राप्य दीक्षामतो।
यस्त्वां विन्दति तत्त्वतस्तदहमित्यार्य्ये स मुक्तो भवेत्।।

एवं शुद्धसाधनशीलात्मक्रमज्ञानां मुखाद्विद्याप्राप्तो मुक्तो भवति।

ऊर्ध्वाम्नाये–

धान्यैर्[1]र्महेश्वरैर्दिव्यैः[2] प्रत्यभिज्ञानशालिभिः[3]।
स्वरूपविज्ञानमात्रेण जीवन्मुक्ता भवन्ति हि।।

इदानीं मन्त्राणां विद्यानां स्वकुलादिविचारो नास्तीति केषाञ्चिन्मतं सिद्धमन्त्रत्वात् मायातन्त्रेऽपि नाश्रयदतिमन्त्रञ्च मित्रमन्त्रं समाश्रयेदिति वचनान्निवारो युक्तः यथा काली तथा नीला इति वचनात् अरिमित्रादिदूषणं नात्र मन्तव्यं तथा हि विशेषो यथा वाराहीतन्त्रे-

नक्षत्रशुद्धिस्तारिण्या नान्यच्चक्रं विचारयेत्।। इति।
प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम्।
अन्तःपदव्यामनुसरन्ती, मणिन्धरूपां यमलां प्रपद्ये ।।
तत उत्थाय आवश्यकं कुर्य्यात्।

तदुक्तं मत्स्यसूक्ते-

उत्थाय चोत्तरेयामे कुण्डं तडिदाकृतिम्।
ध्यात्वा सिद्धीश्वरो भूत्वा मुक्तिभागी भवेन्नरः ।।

इति नीलतन्त्रेऽपि-

उत्थाय चोत्तरे यामे चिन्तयेदुग्रतारिणीम्।
मूलादिब्रह्मरन्ध्रान्तं विषतन्तुतनीयसीम् ।।
मूलमन्त्रमयीं साक्षादमृतानन्दरूपिणीम् ।
सूर्य्यकोटिप्रतीकाशां चन्द्रकोटिसुशीतलाम्।।
तडित्कोटिसमप्रख्यां कामानलशिखोपरि।
तत्प्रभापटलव्याप्तं पटलीकृतदेहवान्।।
सूर्य्यमण्डलमध्यस्थां देवीं ध्यात्वा विचक्षणः।।

इति प्रातःकृत्यं ततः बहिर्निसृत्यावश्यकं विधाय सर्व्वमंगलसंपन्नः स्नानकर्म समाचरेत्।

इन्द्रियाणि दशैकं च महाभूतानि तद्गुणा ।
बुध्यहंकारचित्तानि तत्त्वानि प्रहरते वपुः ।।

---

१. धन्यै ख.पु.पा.
२. दिव्यै. ख.पु.पा.
३. श्चिदर्थ प्राणलात्मभिः। ख.पु.पां.

।।इति प्रातःकृत्यम्।।

ततो बहिर्निः सृत्यावश्यकं विधाय सर्वमङ्गलसम्पन्न स्नानकर्म्मसमाचरेत्।

गात्रेमृदा समालिप्य गत्वाजनान्तिकं ततः
मलापकर्षणं कृत्वा मन्त्रस्नानं समाचरेत्।

वीरतन्त्रे–

विद्यया त्रिर्निमक्षैव आचमेत् पाथसान्ततः।
मूलान्ते प्रणवं दत्त्वा स्वाहा वै आचमनं मतम्।।
एवंविधं स्नानकर्म्मं कृत्वा पापक्षयो भवेत्।।

ततः स्नानकाले यथाविधि स्नात्वा सन्ध्यातर्पणंकृत्वा,

मूलमन्त्रान्ते श्रीनीलसरस्वतीमुग्रतारामेकजटां तर्पयामि स्वाहा। इति त्रिः सन्तर्पयेत्। तदुक्तं नीलतन्त्रे–

पुनर्निमज्य पयसि संकल्पञ्च समाचरेत्।
इष्टदेव्याः पूजनार्थं कुर्य्यात् स्नानं जलाशये।।
बिल्वाक्षतमोड्रूपुष्पं कुलपुष्पं कुलाञ्जनम्।
प्रस्थग्राहिताम्रपात्रे कृत्वा चार्घ्यं निवेदयेत्।।

मूलान्ते चोद्यदित्यवर्तिन्यै शिवचैतन्यमय्यै स्वाहेति तन्मनुः स्मृतः। नील-सरस्वतीपक्षे स्नानमिदम्। अथवा गायत्र्याद्यनुष्ठानानुक्तत्वात्। मायातन्त्रोक्त-एकजटादिविद्यायाः स्नानविधिर्लिख्यते।

ब्राह्मे मुहूर्त्ते उत्थाय शिवः पद्मे गुरुं स्मरन्।
मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत्।।
उद्यत्सूर्य्यप्रतीकाशां कुण्डलीं परदेवताम्।
यातायातक्रमेणैव अमृतीकृतविग्रहाम्।।
मूलविद्यां जपेत्ध्यात्वा अष्टोत्तरशतं क्रमात्।
मृत्कुशानपि संगृह्य गत्वा नद्यान्तिके सुधीः।।
मृत्तिकां मूलमन्त्रेण संगृह्य च करद्वये।
सूर्य्याय दर्शयेत् पश्चाद्विलेपन तच्च संस्मृतम्।।
गोकरीषं नासिकायां वं मन्त्रेण पुटद्वये।
जलाञ्जलित्रयं दद्यात् मूर्ध्नि हृन्नाभिकेषु च।।

तत आचमनं कुर्य्यात् त्रिकोणं दक्षिणेन तु।
गृहीतपाणिना देवि शङ्खावर्त्तक्रमेण तु।।
विलोड्य तत्र निर्म्मज्जेदघमर्षणकं त्रिधा ।।

कूर्च्चबीजेन दक्षिणहस्ते त्रिकोणं कृत्वा तत्र जलमादाय तत्र कूर्च्चबीजं त्रिधा जप्त्वा। तज्जलं शुक्लवर्णमिडयाकृष्यान्तर्गतमलं प्रक्षाल्य कज्जलाभं तज्जलं दक्षिणनासापुटेन निःसार्य्य दक्षिणे निःक्षिपेत्। एतदेवाघमर्षणम्।

दद्याज्जलाञ्जलित्रीणि वरुणाय ततः परम्।
सोमाय भावेन पश्चाज्जदुत्थाय वाससी ।।
परिधाय ततो मन्त्री यथाविधि समाचरेत्।
तिलकं रक्तगन्धेन गोपीनां चन्दनेन् च ।।
दिव्यास्त्रं विलिखेद्भाले लिखेद्बीजं ततो हृदि ।
शक्तिं मध्यगतां कुर्य्यात् प्राणायामं समाचरेत्।।
आचम्य प्राङ्मुखो भूत्वा उपविश्य च मन्त्रवित् ।।
प्रसङ्गात् शाक्ताचमनं लिख्यते।

मालिनीतन्त्रे-

आचमेदात्मतत्त्वाद्यैः प्रणवाद्यैः स्वमन्त्रतः ।
मन्त्रैस्त्रिधा तथा वक्त्रं नासाक्षिश्रोत्रनाभिकृत् ।।
मस्तकाग्रान् स्पृशेन्मन्त्री कुर्य्यात् श्रोत्राभिवन्दनम् ।
आत्मविद्या शिवास्तत्त्वाः प्रणवं वा गुरुं शिवम् ।।
अघमर्षणमन्त्रस्तु कूर्च्चबीजं जपोमतः ।।

आचमानपि ताराबीजं संयोज्य ताराप्रणवत्वात्।

त्रिकोणं मूलबीजेन सवित्रे हंसकं जपन् ।
उपस्थाप्य जपेद्देवीं गायत्रीं शृणु सुन्दरि ।।
तारायै धीमहि प्रोक्त्वा महोग्रायै च विद्महे ।
तन्नो देवीतिशब्दान्ते धियो योनः प्रचोदयात् ।
गायत्र्येषा समाख्याता सर्व्वपापनिकृन्तनी।
वामपादं ततः कुर्य्यात् पादे च परमेश्वरि ।।
उपस्थाय पुनर्हंसमूर्ध्वबाहुस्त्रिधा जपेत् ।।

तत्र हंसऋक् यथा -

ॐ हंसः शुचिषद्वसुरन्तरीक्षं सद्धोता रेदिषदतिथिद्धवोनसन्भृसदुरसदृतसन्ध्ये भेदब्जा गोजा ऋतजा अद्रिजा ऋतं वृहदिति।

तीर्थोदकं तिलकल्कं क्षीराक्षतसमन्वितम्।
उत्तराशामुखो भूत्वा देवीमात्रं प्रतर्पयेत्।।
मूलान्ते तारिणी प्रोक्ता तर्पयाम्यग्निवल्लभा।
स्वर्णपात्रेण रौप्येण ताम्रपात्रेण वा पुनः।।
ऋजुकुशत्रयेणैव संतर्प्य भक्ति सुधीः।
दक्षिणाशामुखो भूत्वा संगृह्य मोटकं ततः।।
तृप्यन्तु पितरः प्रोक्त्वा एतत् तर्पणमादिशेत्।
सूर्य्यस्यवन्दनञ्चैवमभेदञ्च तथोरपि।।
गायत्रीं प्रजपेद्धीमानघमर्षणमेव च।
एतत् सन्ध्यात्रयेणैव अर्द्धरात्रौ च वन्दना।।
महारात्रावपि तथा कार्य्या देशिकसत्तमैः।।इति।

तत्रैव-

अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमेव च।
सा महारात्रिरुद्दिष्टा तत्र कृत्वाक्षयं भवेत्।।
ततो विद्यां हृदि ध्यात्वा अष्टोत्तरशतं जपेत्।
अबहिर्मानसो योगी यागभूमिमथाविशेत्।।

इत्थं हृदि ध्यात्वाष्टोत्तरशतं जप्त्वा यागस्थान यायात्।

तदुक्तंफेरवीये -

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम्।।

तत्रैव-

पञ्चक्रोशान्तरे यत्र लिङ्गान्तरं न वीक्ष्यते।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा।।
उज्जटे पर्व्वते वापि निर्जने वा चतुष्पथे।
देवागारे च शून्ये च निर्जनैकान्तवेश्मनि।।

इति। वीरतन्त्रेऽपि-

शून्यागारे श्मशाने यदिजपति कलि तडागे
गङ्गागर्भे वा शुचिरमलमतिः सर्वदा भक्तियुक्तः।
विद्यां श्रीनीलवाण्या भुवनजनपतिः सर्व्वशास्त्रार्थवेत्ता
देहान्ते योगिमुख्यः परमसुखपदं ब्रह्मनिर्वाणमेति ।।

एवं यथास्थानमाश्रित्य तत्र पीठं विचिन्तयेत्।

तदुक्तम्-

खे श्मशानं तत्र संचिन्त्य तत्र कल्पद्रुमं स्मरेत् ।
तन्मूले मणिपीठञ्च नानामणिविभूषितम् ।।
नानालङ्कारभूषाढ्यं मुनिदेवैश्च भूषितम् ।
शिवाभिर्बहुमांसास्थिमोदमानाभिरन्ततः ।
चतुर्दिक्षु शवा मुंडा विताङ्गारास्थिताः।
तन्मध्ये भावयेद्देवीं यथोक्तध्यानयोगतः ।।

इति ध्यात्वा ॐ वज्रोदके हुं फट् स्वाहा इति जलमधिष्ठाय। ॐ द्रीं स्वाहेति पादौ प्रक्षाल्य ॐ द्रीं सुविशुद्धधर्म्मगायत्री सर्व्वपापानि शमयाशेषविकल्प-मपनय हूँ फट् स्वाहेति हस्तपादौ प्रक्षाल्य ॐ द्रीं हूँ फट् स्वाहेति।

जलेनाचम्य ॐ मणिधरिणि वज्रिणि सर्ववशङ्करि हूँ फट् स्वाहेति शिखां बध्वा ॐ रक्ष रक्ष हूँ फट् स्वाहेति जलाभिकाम्भूमिं शोधयेत्। ततो मन्त्र-

शुद्धेन जलेन यागस्थानं सम्प्रोक्ष्य चतुद्वरि
गणेशं वटुकं चैव क्षेत्रेशं योगिनीं तथा।
पूजयेद् द्वारदेशे तु प्रतिद्वारमिति क्रमात्।।

ॐ सर्व्वविघ्नानुत्सारय हूँ फट् स्वाहेत्यनेन मन्त्रेण नाराचमुद्रया अक्षत-प्रक्षेपात् त्रिविधविघ्नानुत्सारयेत्।

ॐ पवित्रवज्रभूमे हूँ फट् स्वाहेत्यनेन मन्त्रेण भूमिमभिमन्त्र्य विष्टराद्या-सनमास्तीर्य्य तत्र रक्तचन्दनेन मण्डलं कृत्वा प्रेतबीजं विभाव्य ॐ आः सुरेखे वज्ररेखे हूँ फट् स्वाहेति रक्तचन्दनपुष्पाभ्यां तदभ्यर्च्य स्वस्तिकादिक्रमेण तत्रोपविशेत्।

तदुक्तं मत्स्यसूक्ते-

मृदुकम्बलमासीनोऽथान्येषु कोमलेषु वा।
विष्टरे वा समासीनः साधयेत् सिद्धिमुत्तमाम्।।
संग्रामे पतितं वापि व्यापादितमचूडकम्।
षण्मासनिःसृतं प्राप्य चितायां वा तदन्तिके।।

अस्यायमर्थः-दशमासादर्व्वाक् षण्मासगर्भच्युतो वालको मृदुः। अचूडकोऽकृत चूडाकरणः। जननात् पञ्चवर्षाभ्यन्तरेऽचूडक इति कश्चित्। उपनयनसमयादर्व्वाक् चूडाकरणात् पश्चात्कोमलाभिधानम्, एषामभावे विष्टरेषु कुशवटुकेषु।

तदुक्तं श्रीक्रमे-

वीरासनमभावे तु मृतासनं शृणु प्रिये।
पञ्चवर्षाभ्यन्तरं यावत् मृतबालमचूडकम्।।
षण्मासाभ्यन्तरं यावद् दशमासाच्च पूर्वकम्।
गर्भच्युतं मृतबालं गर्भाष्टमात् पुरःसरम्।
एतत् कोमलमित्याहुर्विष्टरेषु कुशेषु वा।।

तदुक्तं मत्स्यसूक्ते-

कृष्णासारं द्वीपिचर्म्मं अचूडं कोमलं तथा।
पीतञ्च श्वेतवर्णं वा आसनाय प्रकल्पयेत्।।
प्रेतन्तु विष्टरं वाथ अथवा कुण्डलीकृतम्।इति।।

कुशविष्टरस्यायमर्थः-

कुशपत्रशतेन वटुकं निर्म्माय शवप्राणप्रतिष्ठां कुर्य्यात्। कोमलादेरभावे तच्चर्म्ममात्रं ग्राह्यमित्याराध्यपादाः। एतेषामासनानां यथाप्राप्ताभिधानं चतुरस्रं हस्तप्रमाणम्। तत्र चन्दनादिना मध्येमण्डलं कृत्वा शवबीजं लिखेत्। एवमासनरहस्यमाराध्यपादमुखादवगन्तव्यम्।

ॐ मणिधरिणि वज्रिणि महाप्रतिशरे रक्ष रक्ष मां हूँ फट् स्वाहेति वस्त्रान्तिके रक्षा ग्रन्थिं बध्नीयात्।

ॐ आः हूँ फट्स्वाहेति व्यापकतया कायवाक्चित्तशोधनम्। ॐ नमः पुष्पके तु राजार्हते शताय सम्यक् सम्बन्धाय (ॐ)। ॐ पुष्पे पुष्पे महापुष्पे

सुपुष्पे पुष्पभूषिते। पुष्पोपचयावकीर्णे हूँ फट् स्वाहेति पुष्पादि मन्त्रयेत्।

ततोऽर्घ्यशोधनं कृत्वा यन्त्रमुल्लिखेत् यथा–स्ववामाग्रे मूलास्त्रेण त्रिकोणवृत्त, चतुरस्रमण्डलं कृत्वा तेनैव पुष्पेनाभ्यर्च्य तत्र साधारं विहितपात्रं संस्थाप्य तथा एकवीराकल्पे कपोलं स्फुटमन्त्रसिद्धिजनकमिति ततो मूलेन जलमापूर्य्य जलाधिष्ठानमन्त्रेण जलमधिष्ठाय तत्तत् षडाङ्गेनाभ्यर्च्य स्पृष्ट्वा मूलमन्त्रमष्टधा जप्त्वा अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुयोनी प्रदर्श्य। तद्दक्षिणे पात्रान्तरं निधाय जलेनापूर्य्य तदार्घ्यविप्रषं निःक्षिप्यात्मानं पूजोपकरणञ्चाभ्युक्षेत्। ततः सुवर्णादिपात्रस्थरक्तचन्दनगोरोचनाकुङ्कुमादिलिप्ते ॐ आः सुरेखे वज्ररेखे हूँ फट् नय इति मन्त्रेण अधोमुखत्रिकोणगर्भितमष्टदलपद्मं चतुरस्रं चतुर्द्वारात्मकं यन्त्रमुद्धरेत्।

तदुक्तं तन्त्रचूडामणौ–

ततः कुलरसेनैव पीठं निर्म्माय यत्नतः।
आः सुरेखे वज्ररेखे हूँ फट् हृदयं ततः॥
मन्त्रेणानेन संलिख्य वसुयन्त्रं मनोहरम्॥

ततस्त्रिकोणे तत्पद्मस्य पूर्वदले द्रीं लिखेत् याम्ये स्त्रीं लिखेत् उत्तरे फं लिखेत् पश्चिमे टं लिखेत् त्रिकोणमध्ये द्रं लिखेत्। तदुक्तं फेरवीये–

सयोनिं चन्दनेनाष्टपत्रमब्जं लिखेत्ततः।
मृदुमासनमासाद्य मायां पूर्व्वदले लिखेत्॥
याम्ये बीजं द्वितीयन्तु फोत्तरे पश्चिमे तटम्।
मध्ये बीजं लिखेत्तारं भूतशुद्धिमथाचरेत्॥

तारं द्रांकारं द्रूंकारस्य ताराप्रणवत्वेन प्रसिद्धत्वात्। अथवा षडर्णाया नीलसरस्वत्या विधाने मध्ये तारस्य लिखनमिति केचित्। तदुक्तं गान्धर्वाख्ये–

षट्कोणान्तर्गतं पद्मं भूबिम्बद्वितयं पुनः।
चतुरस्रं चतुर्द्वारमेवं वा यन्त्रमुल्लिखेत्॥
तन्मध्ये पूजयेद्देव्या वाहनं शवमेव च॥ इति।

अत्र बीजलिखनन्तु पूर्व्वत्। सारस्वतार्थिनां तु विशेषयन्त्रान्तरमुक्तम् यदुक्तं नीलतन्त्रे–

व्योमेन्द्वौरसनार्णकर्णिकमहाद्वन्द्वैः स्फुरत् केशवम्।
वर्गोन्धासिवसुमतीगेहेन संवेष्टितम् ।।
ताराधीश्वरवारिवर्णविलसत् दिक्कोणसंशोभितम् ।।
यन्त्रं नीलतनोः परं निगदितं सर्व्वार्थसिद्धिप्रदम् ।।

एवमेतेषामन्यतमं विरच्य पुरतो गम्भार्यादिपीठे निधाय पीठमर्च्चयेत्।

गान्धर्व्वोक्तप्रकारेण चैतानि पूजयेत्ततः ।
योनिमुद्रां ततो बध्वा चक्रमध्ये प्रपूजयेत् ।।
पूर्व्वे गणपतिं वेष्ट्वा दक्षिणे वटुभैरवम् ।
पश्चिमे क्षेत्रपालाय योगिनीमुत्तरे यजेत् ।।
ते सर्वे ध्रुवदीर्घाख्याश्च शक्तिबीजपुरःसराः ।।

इति वचनात् एतेषां बीजमिच्छन्ति यथा ॐ द्रीं गाँ गणपतये नमः, ॐ द्रीं वाँ वटुकाय नमः। क्षौं क्षौं क्षेत्रपालाय नमः। याँ योगिनीभ्यो नमः। पीठपूजायथा।

श्मशानाय नमः कल्पवृक्षाय नमः तन्मूले मणिपीठाय नानामणिभ्यो नानालङ्कारेभ्यो मुनिभ्यो देवेभ्यो बहुमांसास्थिमोदमानशिवाभ्यः शव-मुण्डचिताङ्गारास्थिभ्यो नमः।

ततोऽष्टदले ॐ लक्ष्म्यै नमः ॐ सरस्वत्यै ॐ रत्यै ॐ प्रीत्यै ॐ कीर्त्यै ॐ शान्त्यै ॐ पुष्ट्यै ॐ तुष्ट्यै नमः। एवमुत्तरोत्तरमभ्यर्च्य हसौः महाप्रेतासनाय नम इत्यभ्यर्च्य तदुपरि मूलेन मूर्तिं परिकल्पयेत्।

तदुक्तं सिद्धसारस्वते-

लक्ष्मीः सरस्वती चैव रतिः प्रीतिस्तथैव च ।
कीर्त्तिः शान्तिश्च पुष्टिश्च तुष्टिरित्यष्टशक्तयः ।।
देव्या नीलसरस्वत्याः पीठशक्तय ईरिताः ।।

तथा वीरतन्त्रे-

तन्मध्ये पूजयेद्देव्या वाहनं शवमेव च। इति ।।

अथ भूतशुद्धिं कुर्य्यात् यथा प्राणायामक्रमेण अङ्के उत्तानहस्ते कुम्भकेन हंस इति मन्त्रेण कुण्डलिनीं जीवात्मानं वैलोम्येन पंचविंशतितत्वानिषु सुषुम्नावर्त्मना परतेजसि संयोज्य कुम्भकेन द्रींकारं रक्तवर्णं नाभौ ध्यात्वा तदुद्धृताग्निना स्वदेहं दग्धं विचिन्त्य त्रीमितिबीजं पीतवर्णं हृदि विचिन्त्य

तदुद्धृतेन वायुना तद्भस्मप्रोत्सारयेत् ततो हूँकारं श्वेतवर्णं शिरसि विचिन्त्य तद्धृत ताम्बूलात्तधस्थिप्लावितं कृत्वा समस्तमपगतव्यथं जगच्छरीरमाप्लावयेत्। तथा च श्रुतिः। षट्त्रिंशत् त्वानि विश्वं शरीरमिति तत आत्मानमपगतव्यथं निर्मलं देवताभेदेन ध्यायेत्। तस्मिन् विश्वव्यापके वारिणि आःकाराद्रक्तपङ्कजं ध्यात्वा तदुपरि टाङ्कारात् शुक्लं पद्मं विचिन्त्य तदुपरि नीलसन्निभं हूँकारं ध्यात्वा हुँकारबीजभूषितां कर्तृकां ध्यायेत् कर्त्र्युपरिगतां स्वात्माभेदेन देवतां आँ द्रीं क्रौं स्वाहेत्येकादशवारं जपन् प्राणान् प्रतिष्ठाप्य ध्यायेत्। तदुक्तं फेत्कारीये-

मायां नाभौ रक्तवर्णां ध्यात्वा तज्जातवह्निना।
शुष्कं पापात्मकं देहं दग्धं सञ्चिन्तयेत् क्रमात् ।।
त्रींकारं हृदि पीताभं तदुद्भूतेन वायुना ।
तद्भस्मोत्सारितं कृत्वा ललाटे चिन्तयेत्ततः ।।
कूर्च्चं तुषारवर्णाभं तदुद्भूतामृतेन तु ।
तदस्थि प्लावितं कृत्वा तदात्मानं विचिन्तयेत्।।
सर्व्वव्यथाविनिर्मुक्तं निर्मलं देवतालकम् ।।

विश्वव्यापकतोयान्ते-श्वेतावज्रोत्तरकर्णिकम्, तदुपरि नीलसन्निभं हुङ्कारं ध्यात्वा हूँङ्कारबीजभूषितां कर्तृकां ध्यायेत् तदुपरि खर्वामभिनवजलधरनीलां लम्बोदरीं व्याघ्रचर्म्मांकृतकीटं पीनोन्नतपयोधरां रक्तवर्त्तुलत्रिनेत्रां ललज्जिह्वां दंष्ट्राकराल-वदनां पिङ्गोग्रैकजटाजूटां तदुपात्तरि पार्श्वद्वये लम्बमाननीलोत्पलमालां अतिनीलनागबद्धजटाजूटांललाटे श्वेतास्थियादिकायुक्तकपालपञ्चत्रयां जवाकुसुमसङ्काशतक्षकनागकृतकर्णकुण्डलां अतिशुभ्रनागकृतहाराम्।

दूर्वादलश्यामलनागकृतयज्ञोपवीतां चतुर्भुजां तदुपरि दक्षिणे सरक्तमांसखण्ड-मन्त्रेतमुष्टिनिविष्टजटाजूटसंलग्नाग्रखड्गभूषितकरां वामोर्ध्वे रक्तमालकिञ्चिद्विक-स्वरनीलोत्पलकराम्। अधस्ताद्दक्षिणेबीजभूषितवृत्तकर्तृकाभूषितकरावामे त्रिजगज्जाड्यसमेतशुभ्रकपालमंडितकरां (कपालमन्त्रेतकरां) भुजचतुष्टये धूम्राभनागकृतकेयूरां कनकाभ्रनागकृतकङ्कणाम्।

शवारूढां निर्भरयन्त्रणाभिप्रायेण शवहृदयसङ्कुचिताङ्गुष्ठदक्षिणचरणां शवपादद्वयस्थितप्रसारितवामचरणां कुन्दाभनागकृतकटिसूत्रां ईषद्रक्तनागकृत-नूपुरां सद्यःकृत्तगलद्रक्तधाराकेशग्रथितपादपद्मप्रालम्बितपञ्चाशन्मुण्डमालां

ज्वलदनलवचितामध्यस्थितां द्वीपिचर्मकृतोपरिवस्त्रां योषिदशेषालङ्कारालङ्कृतां मौलावक्षोभ्यशोभितां सावेशस्मेरवदनाम्। एवंभूतमात्मानं ध्यात्वा भूतशुद्धिः तदुक्तं रुद्रयामले–

तस्या रूपं गुणं यद्यत् स्वकीयमपि भावयेत्।

नीलतन्त्रेऽपि–

भूतशुद्धिं विधायाथ शून्यं विश्वं विचिन्तयेत्।
निर्लेपं निगुणं शुद्धं स्वात्मानं तारिणीमयम्।।

अन्तरिक्षे ततो ध्यायेदाकारभूमस्तस्योपरिध्यायेत् हूङ्कारं नीलसन्निभम्।

ततो हूँकारबीजात्तु कर्तृकां बीजभूषिताम्।
तत् कर्णिकोपरिगतं ध्यायेदात्मानं तारिणीमयम्।
प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्।
खर्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ।।
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्।।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्।।
खड्कर्तृसमायुक्तसव्येतरभुजद्वयाम्।
कपालोत्पलसंयुक्तं सव्यपाणियुगान्विताम्।।
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्।।

पञ्चमुद्राविभूषितामिति अर्द्धरजनीनाथस्तवे चक्रीकुण्डलकर्णिकां शववरां काञ्चीञ्चपञ्चेत्यमूर्मुद्राः कागदुघावरास्थिघटिता वन्दे विशुद्धक्रमात्। ताक्षोभ्यो भवतीति विन्दुपतिताद्विद्युत् सरेखां परै रेखारत्नपतिस्तद्विदर्द्धरजनीनाथस्तवैरोचनः। ललाटे श्वेतास्थिपट्टिकाचतुष्टयान्वितकपालपञ्चतयान्वितामिति मन्त्र साधनान्तर्गत–शिवदीक्षाटीकायाम्।

तेन सुमुखमित्यादिनमस्कृतामित्यर्थपाठः। कुत्राप्यदृष्टत्वाद् गुह्यमुद्रायाः सर्वत्र प्रयोगलिखनात्। मुद्रापञ्चविभूषितामिति पाठ इति शङ्कराचार्यः।

विचित्रास्थिमालां कपालकरालं ललाटे च पञ्चोचितं धारयन्तीमिति। मौलावक्षोभ्यभूषितामिति मस्तकेऽविनाशिचन्द्रकला इति शिवदीक्षाटीकाकारः। तन्त्र चन्द्रावतंसा इति सर्व्वध्यानेऽनुक्तत्वात्। वस्तुतस्तु देवीसंप्रदाये गुरुवक्षोभ्यो

वासुकिनागरूपः वटुवक्षोभ्य इत्यादि मस्त्यसूक्तोक्तत्वात्। अत एवास्मिन्नामये अक्षोभ्य ऋषिरुक्तः, भावचूणामण्णौ तु अक्षोभ्यो देवि मूर्धन्यस्त्रिमूर्त्तनागरूपधृक् इति।

अत एव मूर्ध्नि गुरुर्ध्येयः अहो परदेवताया वेदमय्या वेदप्रामाण्याभ्युपगन्तृता मया शिष्यशिक्षार्थमयमपि मूर्ध्नि गुरुर्वृतः तथा च भगवद्वाक्यम्–आचार्यः शिरसि स्थित इति।

अथ ध्यानानन्तरं शङ्कराचार्यभगवत्पादै स्तोत्रोपदेशेनोक्तं यथा जलज्वाल पावकेत्यादि सर्व्वार्थसिद्धौ ध्यायेत् ध्यानानुकूला श्रुतिः यथा प्रविश्य शून्यालयमथोपविश्य अच्युतादौ शवविष्टरादिषु। उत्सार्य्य विघ्नानथ सुस्थमानसो विचिन्तयेद्विश्वमथो चिदात्मकम्। विचिन्त्यवीजै रथभूतशुद्धिं विधाय तत्रै वनाथागते च उदग्रहूँकारणकर्टकेण स्मरेत् स्वमात्मानमपि तारिणीमयम्।

अनेकमाहत्य शवोपरि स्थितां।
शवोर्ध्वमालाचितपादपङ्कजाम्।
विशीर्णवर्णात्मशिवः स्रजोद्भटां
त्रयीविवृत्तारुणलोचनत्रयम् ।
अभेदपिङ्गैकजटां विराजितां
विभूषणाच्चित्रसितास्थिभूषणाम् ॥
महाष्टसिद्धिप्रकटाहिभूषणा–
मट्टाट्टहासैर्जगतामभीष्टदाम् ।
जटास्वनन्तः श्रवणयोश्च तक्षको
महाम्बुजेथो हृदि हारभूषणः ॥
तथैवकर्कोटहृतोपरीतिकां
स्वमेखलायामथ देवि वासुकिः।
सशङ्खपालः किल कङ्कणं गतः
करेषु पद्मः पदनूपुरश्रियम् ॥
भुजेषु नागः कुलिशोऽङ्कदो मतो
भुजोर्ध्वमाला मनुजास्थितिस्थिताः।
सितश्च वक्त्रोधवलश्च मेचक–
स्तथैव पीतोऽप्यसितश्च पाण्डुरः ॥

भुजङ्गमालामिव बद्धजातयो
भवन्ति सर्व्वे मणिभिर्ज्वलन्तिताः ।
कपालकर्त्तृग्रथितोग्रमूर्द्धजां
सनालकेन्दीवरकान्तमालिकाम् ।।
विकोषखड्गं सततञ्च दक्षिणे
स्वपौरुषेयैर्दधर्ती भुजैः सदा ।
पदार्थदंष्ट्राद्वयपञ्चमुद्रया
विराजमानामसितोत्पलस्रजा ।
विचिन्तयेत्ताञ्च कवित्वकारिणीं
मनोगतार्थां प्रजपेच्च तारिणीम् ।।
एवम्भूतमात्मानं ध्यायेदिति भूतशुद्धिः।

अथ स्ववामे त्रिकोणचतुरस्रं मण्डलं कृत्वा तत्र साधारं कपालादिकं पात्रं निधाय तदुक्तं कापालं स्फुटमन्त्रसिद्धिजनकम्।

अथ मूलमन्त्रेण विमलजलमापूर्य्यबिल्वपत्ररक्तचन्दनवज्रपुष्पादिनि:क्षिप्य अर्घ्यस्याग्रांशासुरवायुष्वमध्ये दिक्षु च षडङ्गानि मन्त्र तत्र दशधा मूलविद्यां जप्त्वा तज्जलेन सर्व्वं विद्यामयं कुर्य्यात्, इत्यर्घ्यं निधाय प्राणायामादिकं कुर्य्यात्। तदुक्तं फेत्कारिण्याम्-

भूतशुद्धिं विधायेत्थमर्घ्यादिपात्रं विन्यसेत् ।
न्यासौ कराङ्गकौ कृत्वा आत्मानं तारिणीं स्मरेत् ।।

ततो वामनासापुटे मूलविद्यायाे चतुर्द्धा जपेन वायुमापूर्य्य तस्यैव षोडशवारजपेन मध्यमानाड्यां कुम्भयित्वा एकवारजपेन वामनासापुटेनरेचयेत्। एवं क्रमोत्क्रमाभ्यां प्राणायामं कृत्वा शिरसि अक्षोभ्यऋषये नमः मुखे वृहतीच्छन्दसे नमः, हृदि एकजटादिदेवताभ्यो नमः। पुनस्तथैव मम द्रुतकवित्व पाण्डित्यसिद्ध्यर्थे विनियोगः।

तदुक्तं नीलतन्त्रे-

अक्षोभ्य ऋषिरेतस्या बृहतीच्छन्द ईरितम् ।
नीलसरस्वतीदेवी त्रिपुलोकेषु गोपिता ।।
हूँ बीजं मन्त्रशक्तिः स्याच्चतुर्व्वर्गफलप्रदः ।।

तथा एकवीराकल्पे-

अङ्गन्यासकरन्यासौ कुर्य्यादत्रैव केवलम् ।
अत्रोक्तमाचरेदत्र नान्यत् संचारयेत् सुधीः ।।

इति वचनात् न्यासान्तराभावः। मातृकायाम् आवश्यकत्वात् कालिकातन्त्रोक्त मातृकान्यासोऽत्र लिखितः।

तदुक्तं नीलतन्त्रे-

यथा नीला तथा काली तत्क्रमान्मातृका न्यसेत् ।

तद्यथा-अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं इति हृदय स्पृशेत्। एं ऐं ओं औं अं अः कं खं गं घं दक्षिण भुजम्। ङं चं छं जं झं ञं टं ठं डं ढं इति वामभुजम्। णं तं थं दं धं नं पं फं बं भं इति दक्षिणजङ्घाम्। मं यं रं लं वं शं षं सं हं लं क्षं इति वामजङ्घाम्। ततः कराङ्गन्यासौ कुर्य्यात् यथा-

ॐ द्रां अखिलवाग्रूपिण्यै नमः अङ्गुष्ठयोः। ॐ द्रीं अखण्डवाग्रूपिण्यै नमस्तर्जन्योः। ॐ द्रूं ब्रह्मवाग्रूपिण्यै नमः मध्यमयोः। ॐ द्रैं विष्णुवाग्रूपिण्यै नमः अनामिकयोः। ॐ द्रौं रुद्रवाग्रूपिण्यै नमः कनिष्ठयोः। ॐ द्रः सर्व्ववाग्रूपिण्यै नमः करतलकरपृष्ठयोः। इति करन्यासं विधाय पुनः ॐ द्रां अखिलवाग्रूपिण्यै हृदयाय नमः इति तर्जनीमध्यमानामिकाभिर्हृदये। ॐ द्रीं अखण्डवाग्रूपिण्यै शिरसे स्वाहा इति तर्जनीमध्यमाभ्यां शिरसि। ॐ द्रूं ब्रह्मवाग्रूपिण्यै शिखायै वषट् इत्यधोमुष्ट्या शिखायाम्। ॐ द्रैं विष्णुवाग्रूपिण्यै कवचाय हूं इतिव्यस्तहस्ताभ्यां शिर-आदिपादपर्य्यन्तम्। ॐ द्रौं रुद्रवाग्रूपिण्यै नेत्रत्रयाय वौषट् इति तर्ज्जनीमध्यमानामिकाभिर्नेत्रत्रये। ॐ द्रौं सर्व्ववाग्रूपिण्यै अस्त्राय फडिति तर्ज्जनीमध्यमाभ्यामूर्ध्वोर्ध्वतालत्रयछोटिकाभिर्दशदिग्बन्धनं कुर्य्यात्।

ततस्तारा षोढां कुर्य्यात् तदुक्तं नीलतन्त्रे-

विद्यया पुटितां कृत्वा षोढाञ्च मातृकां न्यसेत् ।
क्रमोत्क्रमाद्वरारोहे ताराषोढाः प्रकीर्त्तिता ।।
यस्त्वेवं कुरुते मन्त्री स तु तारा न संशयः ।
तस्यालोके गुरुर्नास्ति स गुरुसर्व्वयोगिनाम् ।।

सृष्टिरकारादिक्षकारान्ता स्थितिस्तु छादिक्षान्ता तदनु आदिठान्ता संहृतिस्तुक्षादि श्रीकण्ठा षड्धा षोढा भवति। सांप्रदायिकास्तु बीजपुटितां पञ्चधा मातृकां

समस्त विद्यमात्रैकधान्यसेत्। इति षोढैकजटापक्षे नीलसरस्वतीपक्षे तु षड्बीजेन पुटितां कृत्वा न्यसेत्। अयं न्यासस्तु काम्यः विशेषाकाङ्क्षिभिश्च करणीयः।

तदुक्तं सिद्धान्तसारस्वते–

अखिलवाग्रूपिणीं प्रोच्य हृदयाय नमो भवेत्।
अखण्डवाग्रूपिणीं प्रोच्य शिरसिवह्नि वल्लभा ।।
ब्रह्मवाग्रूपिणीमुक्तवा शिखायै वषडित्यपि।
विष्णुवाग्रूपिणीमुक्तवा कवचाय हूमुच्चरेत् ।।
रुद्रवाग्रूपिणीनेत्रत्रयाय वषडित्यपि ।
सर्व्ववाग्रूपिणीमुक्तवा अस्त्राय फडिति स्मरेत् ।।
षड्दीर्घमाया यया च बीजास्त्रेणाभियोजयेत्।।

एतत्तु नीलसरस्वतीपक्षे।

अत्र चूड़ामणौ तु

बीजान्ते एकजटायै हृदयं परिकीर्त्तितम्।
तारिण्यै शिरसे न्यस्येद्वज्रोदके शिखा तथा।।
उग्रजटे च कवचं महाप्रतिशरे तथा ।
पिङ्गोग्रैकजटे तद्वत् नेत्राभ्यां विनियोज्यते।।

उभाभ्यां महोग्रतारापक्षे एवं पीठन्यासौ लिखितौ, अत्रानुपयोगात्। तदुक्तं फेरवीये–

अङ्गन्यासकरन्यासौ कुर्य्यादत्रैव केवलम् ।
अत्रोक्तमाचाराद्वास्मिन्नान्यत्सञ्चारयेद्बुधः ।।

ओमुच्चार्य्य शिर आदिपादान्तं पादादिशिरोऽन्तं हृदयादिमुखरान्तमिति व्यापकत्रयं न्यसेत्। ततः पूर्वोक्तक्रमेण ध्यात्वा करकलितदूर्व्वाक्षतरक्तचन्दन–वज्रपुष्पादिमिलितदिनकरकिरणारुणकुसुमाकपौलौ मातृकायन्त्रं ध्यात्वा हृदयात् मूलमन्त्रतेजोमयीं शुद्धज्ञानचैतन्यरूपां तां षट्चक्रभेदक्रमेण पिहितसहस्रदल–कमलकर्णिकान्तर्गतपरमशम्भुं प्राप्य क्रियासमभिहारेण तदमृतामृतामनलीभूता आनन्दमयी वहन्नासापुटादानीय कल्पितमूर्त्तावावाहयेत् –

देवेशि भक्तिसुलभे परिवारसमन्विते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं स्थितिमावह ।।

श्रीमदमुके इहावह इह सन्निहिता भव इत्यधोमुखम् इत्यङ्गुष्ठमुष्टिभ्यां इह सन्निरुध्य स्व इति सैवाङ्गाङ्गुष्ठमुष्टिभ्याम्। तत आत्मवद्देव्यङ्गे षडङ्ग न्यस्य आँ ह्रीं क्रौं स्वाहा इति प्राणप्रतिष्ठां कृत्वा मूलमुच्चार्य्य यथाशक्तयुपचारैः पूजयेत्।। हूँ फट् स्वाहेत्यनेन पाद्यादिभिः षोडशोपचारैरर्च्चयेत्। तदुक्तं फेत्कारिण्याम्-

आवाह्य स्थापयित्वा तु ध्यात्वा वै पूजयेत्ततः।
श्रीमदेकजटे वज्रपुष्पं प्रतीच्छेत्यभिधाय च ।।
मूलेनाग्निकोणे च सतारेण यजेत् पुनः ।
सर्व्वं मन्त्रमयं कृत्वा देवतायै निवेदयेत्।।
अभवोद्वज्रपुष्पस्य स्मरणात् फलभाग् भवेत्।

षोडशोपचारो यथा तदुक्तं मन्त्रलीलावत्याम् -

पाद्यार्घ्याचमनस्नानं वसनाभरणानि च ।
गन्धपुष्पधूपदीपनैवेद्याचमनं ततः ।।
ताम्बूलमर्च्चनास्तोत्रं तर्पणञ्च नमस्क्रिया।
प्रयोजयेदर्च्चनायामुपचारांस्तु षोडश ।।

अथवा

गन्धादयो निवेद्यान्ता पूजा पञ्चोपचारिका।। इति।

तत्र पुष्पनियमो यथा तदुक्तं मत्स्यसूक्ते-

पुष्पश्रेष्ठं रक्ताकाकं बन्धूकं शतपत्रकम् ।
वर्व्वराद्वितयञ्चैव कर्णिकारद्वयं तथा ।।
वकमन्दारवज्राणि करवीरञ्च शस्यते ।
मल्लिकात्रितयं जाती क्षौमपुष्पं जयन्तिका।।
बिल्वपुष्पं कुरुवकं मुनिपुष्पञ्च केशरम् ।
वासन्तीद्वितयञ्चैव काशपुष्पं मरुवकम् ।।
कदम्बं वकुलञ्चैव आसनञ्च लवङ्गकम् ।
यूथी शेफलिका स्वच्छपुष्पं जातीञ्च सम्भवैः ।।
सुगन्धिश्वेतलौहित्यकुसुमैरर्च्चयेद्दलैः ।
बिल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ।।
पुड्रापुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम्।

सर्व्वं पुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा ।।

अथवा तदुक्तं मन्त्रचूडामणौ-

अर्घ्यं दत्वा जवापुष्पं दापयेन्मन्त्रमुच्चरन् ।
पद्मपुष्पं प्रतीच्छेति पद्मे धनपदान्वितम् ।।

नैवेद्यञ्च यथा मत्स्यसूक्ते-

पायसं कृसरं दद्यात् शर्करागुडसंयुतम् ।
गव्यं दधिमधुन्मिश्रंपानीयञ्च निवेदयेत् ।।
शालमत्स्यञ्च पाठीनं गोधिकानां समुत्तमम् ।
अन्नञ्च मधुना युक्तं यत्नाद्दद्याच्च मन्त्रवित् ।।

ततो योनिमुद्रां प्रदर्श्य आद्यां प्रार्थ्य परिवारमर्च्चयेत् -

यथा केशरेषु अग्नीशासुरवायुषु मध्ये दिक्षु च। देव्यास्तत्तदङ्गे वा षडङ्ग मर्च्चयेत्। पूर्व्वादिदिङ्निर्णयस्तु-

पूज्यपूजकयोर्मध्यं बुधैः प्राचीति कीर्त्यते ।
तद्दक्षिणं दक्षिणं स्यादुत्तरं चोत्तरं मतम् ।।
पृष्ठञ्च पश्चिमं ज्ञेयं सर्व्वत्रैवं प्रपूजयेत्।।

इति मानसोल्लासे यथा द्राँ अखिलवाग्रूपिण्यै नमः। एकजटायै हृदयाय नमः इत्यादिक्रमेण वा। तदुक्तमेकवीराकल्पेमे-

षडङ्गमर्च्चयेद्देव्या देहे वा केशवेषु वा।। इति।

अस्मिन्नेव समये देव्या वायव्यादीशानान्तं गुरुपङ्क्तिमर्च्चयेत्। एतदशक्तौ गुरुत्रयं ऋषिमात्रं वा तदुक्तं भावचूडामणौ-

।। ईश्वर उवाच।।

मातर्द्देवि महामाये बन्धमोक्षप्रवर्त्तिनि ।
इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ।।

देव्युवाच

गुरुक्रमस्तु बहुधा मन्त्रविस्तरगौरवात् ।
कालानामप्यनादित्वात् कथं तत् कथयामि ते ।।
न च गुरुक्रमं ज्ञात्वा नष्टमार्गो भविष्यति।
नष्टमार्गे मन्त्रविद्ये न तादृक् सिद्धिगोचरे।।

गुरूणां शिष्यभूतानां नास्ति चेत् सन्ततिक्रमः।
तन्त्रमन्त्राश्च विद्याश्च निष्फला नात्र संशयः॥
विंशतिं पुरुषान् वाथ नवसप्तत्रयोपिच।
न ज्ञात्वा गुरुवंश्यानां शिष्यश्च नष्टसन्ततिः॥
स्ववंशादधिकं ज्ञेयं गुरुवंश शुभाशुभम्।
जनकादधिकं ज्ञेयं मन्त्रदश्च महेश्वर॥
तस्माद्यत्नेन देवेशि संक्षेपात् शृणु तान् गुरून्।
अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्॥
ऊर्ध्वकेशो व्योमकेशो नीलकण्ठोवृषध्वजः।
दिव्यौघा गुरुवः प्रोक्ताः सिद्धौघान् शृणु तत्त्वतः॥
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः।
हरिनाथो मानवौघा शृणु वक्ष्यामि तद्गुरून्॥
तारावती भानुमती जयाविद्या महोदरी।
सुखानन्दः परानन्दः विरूपाक्षः फेरवी च॥

कथितं तारिणीकुलम्।

सिद्धौघे मानवौघे दिव्यौघे परमेश्वरि।
अक्षोभ्यः सर्व्वमूर्द्धन्यास्त्रिमूर्त्तिनागरूपधृक्॥
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः।
स्त्रियोऽपि गुरुरूपाश्चेदम्बान्ताः परिकीर्त्तिताः॥

तेषु गुरवः पूर्वसूचिताः कुलचूडामणौ-

शृणु देवि गुरून् वक्ष्ये गुरुदेवान्महेश्वर।
येषु येषु च मन्त्रेषु ये ये ऋषिगणाः स्मृताः॥
ते ते पूज्याः सपर्य्यादौ संक्षेपाद्गदितं मया।
अशक्तानान्तु संक्षेपात् गुर्व्वर्चनं यथा भवेत्॥

तथा कुलचूडामणौ-

अज्ञान् गुरुनाम्नां वै गुरुत्रितयमर्चयेत्।
चतुष्टयं वासंकोचं नच कार्य्यस्ततः परम्॥

अथवा प्रकारान्तरम्। यथातदप्युक्तं भावनिर्णये। परमादिगुरूणां निर्णयो यथा–

आदौ सर्व्वत्र देवेश मन्त्रदः परमो गुरुः।
परात्परगुरुस्त्वं हि परमेष्ठिरहं मतः ।।
सर्व्वमन्त्रेषु विद्यासु येयं प्रकृतिरूपिणं।
गुरुं परमगुरुञ्चैव परापरगुरुं ततः ।।
परमेष्ठिगुरुञ्चैव कथिता गुरवस्तव ।।

।। इति गुरुनिर्णयः।।

ततः अक्षोभ्यवज्रपुष्पं प्रतीच्छ द्रँ फट् स्वाहा इति देवीमौलौ। अक्षोभ्यं पूजयेत्। ततः पूर्व्वाद्यष्टदलेषु ॐ वैरोचनवज्रपुष्पं प्रतीच्छ द्रँ फट् स्वाहा तदुक्तं फेत्कारीये।

वज्रपुष्पं प्रतीच्छेति द्रँ फट् स्वाहेति मन्त्रतः।
एतन्मन्त्रैर्नायमात्रभिन्नञ्चैव न संशयः ।।
अनेन मनुना सर्वान् परिवारानथार्चयेत् ।।

ॐ शङ्खपाण्डुरवज्रपुष्पं प्रतीच्छ हुँ फट् स्वाहा ॐ पद्मनाभवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा ॐ असितनाथवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा। ॐ नामकवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा। ॐ मामकवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा। ॐ पांपाण्डरायवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा। ॐ तां तारकाय वज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा।

ततः पूर्वादिद्वारचतुष्टये वामावर्तेन ॐ पां पक्षान्तकवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा। ॐ याँ यानान्तकवज्रपुष्पं प्रतीच्छ हूँ फट् स्वाहा दक्षिणदले।

नामकं मामकञ्चैव पाण्डवं तारया सह।
वह्न्यादिषु चतुष्कोणे मन्त्रैः स्वैः स्वैः क्रमाद्यजेत् ।।
द्वारेपूर्वादितः पद्मान्तकं चापि यमान्तकम्।
वाजप्तः सिद्ध्यते मन्त्री नाहुतश्च फलप्रदः।।
नानिष्ठो यच्छते कामाँस्तस्मात्त्रितयमाचरेत्।
पूजया फलमाप्नोति जपात् सिद्धिर्न संशयः ।।
विभूतिश्चाग्निकार्य्येण सर्व्वसिद्धिश्च विन्दति ।।

वीरतन्त्रे-

नित्यहोमं प्रवक्ष्यामि सर्वार्थं येन विन्दते।
सपर्य्यां सम्यगापूज्य बलिपूर्व्वं चरेद्विधिम्।।
ततो जपं तर्पणञ्च चरेत् साधकसत्तमः।
बलिवश्यादिकञ्चैव ब्राह्मणश्च समाचरेत्।।
विधिवदग्निमानीय क्रव्यादेभ्यो नमो नमः।।
मूलमन्त्रं समुच्चार्य्य कुण्डे वा स्थण्डिलेऽपि वा।
भूमौ वा संस्तरेद्वर्हिं व्याहृतित्रितयेन तु।
स्वाहान्ते तु त्रिधाक्षिप्य षडङ्गाहरणं ततः।।
ततो देवीं समावाह्य मूले षोडश चाहुतीः।
हुत्वा दत्वा नमस्कृत्य विसृजेदिन्दुमण्डले।

स्ववामे त्रिकोणवृत्तचतुस्रमण्डलं कृत्वा पुष्पैस्तमभ्यर्च्य तत्र विहितवलिद्रव्यं निधाय अङ्गुष्ठानामिकाभ्यां स्पृष्ट्वा ॐ द्रीं एकजटे महायक्षाधिपायै मयोपनीतं बलिं गृह्ण गृह्ण गृह्णापय गृह्णपय मम सर्व्वशान्तिं कुरु कुरु परविद्यामाकृष्य त्रुट् त्रुट् छिन्धि छिन्धि द्रीं स्वाहा इति त्रिः पठित्वा बलिं दत्त्वा तालत्रयं दत्त्वा संहारमुद्रां प्रदर्श्य रहस्यमालया यथाशक्ति निगदेन उपांशुनामानसेन वा सहस्रादिकं जपेत्।

तदुक्तम्-

सहस्रं प्रजपेन्मन्त्रं शतं तद्दिनजन्तुना।
विंशत्या वा जपेन्मन्त्रं ततो न्यूनं न कारयेत्।।

अस्य रहस्यं यथा गान्धर्वे-

विना दीपकमन्त्रेण अग्नशून्यं न चार्चयेत्।
विनानलनया देवि विनारुधिरवेदनैः।।
त्रिवर्णमस्या दीपन्या मित्रिणी सा च कथ्यते।।

अत्र जपरहस्यं यथा कृतपद्ममध्ये तरुणरविनिभां विद्यास्वरूपां कुण्डलिनीं ध्यायेत् हृदयाज्जिह्वापर्यन्तमुच्चरेत्।

तदुक्तं नीलतन्त्रे-

हृदो सरस्वतीं यावद्विद्या या व्यतिरुच्यते।

सिद्धये क्रूँ कृतिबीजं स्वाहान्ते त्रिमिति हमुत्क्रमतश्चान्ते फट्कारं हृदि कृत्वा ध्येया। पञ्चत्र्यक्षरमन्त्रविधया। तथा चोक्तं रुद्रयामले–

स्थानस्था वरदा मन्त्रा मध्यस्थाश्च फलप्रदाः।
स्थानध्यानपरिभ्रष्टाः सुसिद्धा अपि वैरिणः।।

जपलक्षणं विमलातन्त्रे यथा

मनः संहरणं शौचं मौनं मन्त्रार्थचिन्तनम्।
अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः ।।
जपः स्यादक्षरावृत्तिर्निगदोपांशुमानसैः ।
मन्त्रमुच्चारयेद्वाचा निगदः स जपः स्मृतः ।।
शनैरुच्चारयेन्मन्त्रं सर्वदोष्ठं प्रचालयेत्।
किञ्चित् श्रवणयोग्यं स्यादुपांशुः स जपः स्मृतः ।।
धिया यदक्षरश्रेणीं वर्णस्वरूपदात्मिकाम् ।
उच्चरेदर्थं संस्मृत्य मानसः स जपः स्मृतः ।।
उपांशु स्यात् शतगुणः सहस्रं मानसो जपः।
उपांशु पुष्टिकामानां मानसः सिद्धिमिच्छताम्।।
निगदो मारणे शस्तं त्रिविधो जप ईरित्तः ।।

अत्र जपरहस्यं यथा। मूलधारस्वाधिष्ठानमणिपूरकेसु तडित्कोटिकतारां ताराबीजव्याप्तिं विभाव्य तथैव फट्कारं वेदहृदये धियम्। तदुक्तं ताराषटपद्यां फट्कारं वै मध्ये ध्येयम्।

तदुक्तं नीलतन्त्रे–

मन्त्रध्यानं प्रवक्ष्यामिजपात् सर्वस्वदायकम्।
मन्त्रध्यानान्महेशानि सिद्धियते ब्रह्महायनः ।।
मूलचक्रे च हल्लेखां सूर्य्यकोटि समप्रभाम् ।
स्वाधिष्ठाने पीतवर्णं द्वितीयन्तु विभावयेत् ।।
नाभौ जीमूतसङ्काशां कूर्च्चबीजं महाप्रभम् ।
अस्त्रबीजं हृदि ध्यायेत् कालानलसमप्रभम् ।।
मूलादिब्रह्मरन्ध्रे तु सर्व्वां विद्यां विभावयेत् ।
सूर्यकोटिप्रतीकाशां योगिभिर्दृष्टपूर्व्विकाम्।।

अथवा सर्व्वविद्यां जिह्वायां दीपरूपिणीम्।।

विभाव्य तत् प्रभाव्य तत् प्रभापटलैर्जिह्वामपि दीपरूपां विभाव्य जपेत्। तदुक्तं फेत्कारीये-

जिह्वायां न्यसनादेव मूकोऽपि सुकविर्भवेत्।
अथवा मुखे करं दत्वा जपेदित्याराध्यपादाः।।

ततः-

गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वमयिस्थिता।।

इत्यर्घ्योदककुसुमैर्देव्या वामहस्ते तेजोमयं जपं समर्पयेत्। इति विशेष-फलाकाङ्क्षिभिरयं क्रमो निशायामघमर्षणीयः।

तदुक्तं फेरवीये-

बलिपूजादिकं यद्यन्निशायां क्रियते सदा।
तत्तदक्षयतां याति ताराविद्याप्रसादतः।।

तदुक्तं मायातन्त्रे-

अर्घरात्रात् परं यच्च मुहूर्त्तद्वयमेव च।
सा महारात्रिरुद्दिष्टा निशा सापि प्रकीर्त्तिता।।

कुलचूडामणौ तु-

रात्रौ पर्य्यटनञ्चैव रात्रौ वा शक्तिपूजनम्।
न करोति कथं देव साधकः कौलिको भवेत्।।

कुलमात्मानमेयं मतो जीवः प्रमाणं ज्ञानमिति यावत्। ज्ञेयं घटपटादिरूपं विश्वमिति यावत् शक्तिरिति सङ्कलितार्थः ततः प्रदक्षिणीकृत्य स्तुत्वा साष्टाङ्ग पातं प्रणमेत्।

स्तुतिर्यथा-

घोररूपे महारावे सर्व्वशत्रुभयङ्करि।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम्।।
सुरासुरार्चिते देवि सिद्धगन्धर्वसेविते।
जाड्यपापहरे देवि त्राहीत्यादि ।।
जटाजूटसमायुक्तलोलजिह्वानुकारिणि ।

द्रुतबुद्धिकरे देवि त्राहीत्यादि ।।
सौम्यरूपे चण्डरूपे घोररूपे नमोऽस्तुते।
सृष्टिरूपे नमस्तुभ्यं त्राहीति ।।
जडानां जडतां हंसि भक्तानां भक्तवत्सले।
मूढतां हर मे देवि त्राहीति ।।
हूँ हुँकारमये देवि वलिहोमप्रिये नमः।
उग्रतारे नमो नित्यं त्राहीति ।।
बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे ।
मूढत्वं हर मे देवि त्राहीति ।।
इन्द्रादिदिविषदवृन्दवन्दिते करुणामयि।
तारे ताराधिनाथास्ये त्राहीति ।।
अष्टम्याञ्च चतुर्दश्यां नवम्यां यः पठेन्नरः ।
षण्मासैः सिद्धिमाप्नोति नात्र कार्य्याविचारणा।।
मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकीम्।।
इदं स्तोत्रं पठेद्यस्तु सततं लभते नरः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा च जायते।।
पीडायां वापि संग्रामे जपे दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः ।।

।। इति श्रीमदुग्रतारास्तवः समाप्तः।।

एवं स्तुत्वा प्रणम्य योनिमुद्रां प्रदर्शयेत्। अष्टाङ्गप्रणतिर्यथा प्रपञ्चसारे-

पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ।।

विशेषनमस्कारः सङ्केततन्त्रे-

नतिस्तु त्रिकोणाकारा तारायाः परिकीर्त्तिता ।

अन्यत्र-

त्रिकोणाकारा सर्व्वत्र नतिः सद्भिरुदीरिता।
अर्द्धचन्द्रं महेशस्य पृष्ठतो नतिरीरिता ।।

वेदविद्भ्यो धरां दत्वा सम्यक् यल्लभते फलम्।
तत्फलं समावाप्नोति सकृत् कृत्वा प्रदक्षिणम्।।

तत आवृतिदेवता देव्या अङ्गे निक्षिप्यात्मसमर्पणं कृत्वा क्षमस्वेति तेन सुषुम्नामार्गेण स्वहृदि समानीय पुनः प्राणायामं कृत्वा तन्मयमात्मानं विभाव्य ऐशान्यां हूँ निर्माल्यवासिन्यै नम इति निर्माल्यवासिनीमभ्यर्च्य लेह्यचोष्यान्नपानादि ताम्बूलं स्रग्विलेपनम्।

निर्म्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया इति ।
शेषनिर्म्माल्यं शिरसे धृत्वा नैवेद्यजातं शिष्येभ्यः ।।
स्त्रीभ्यो वा दत्वा स्वयं किञ्चित् स्वीकृत्य ।
सिद्धसंकल्पः सुखी यथासुखं विहरेदिति ।।

तदुक्तं संकेततन्त्रे-

नैवेद्यजातं यत् किञ्चित् कौलिकाय निवेदयेत्।
देवतानाञ्च नैवेद्यं स्त्रीभ्यो दद्यान्न कुत्रचित्।।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ नित्यपूजानिर्णयः प्रथमः पटलः।।



।।अथ द्वितीय पटलः।।

अथ दीक्षाविधिर्लिख्यते

दीक्षया विना सर्व्वमन्त्रानधिकारित्वात् चतुर्व्वाश्रमेषु दीक्षाया आवश्यकत्त्वं तदुक्तं वाराहीतन्त्रे-

।।श्रीभगवानुवाच।।

दीक्षामूलं जगत् सर्वं दीक्षा हि परमं तपः।
दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन्।।
अदीक्षितोऽपि मरणे रौरवान्न निवर्त्तते।
तस्माद्दीक्षा प्रकुर्व्वीत प्रोक्तमाश्रित्य तान्त्रिकात्।।

एवं सद्गुरोराहितदीक्षा च सर्व्वं साधयेत् तदुक्तं महोग्रताराकल्पे-

कल्पे दृष्ट्वा तु तारां वै यो गृह्णाति नराधमः।
मन्वन्तरसहस्रैस्तु निष्कृतिर्नाभिधीयते।।
गुरोर्मुखात् महाविद्यां गृह्णीयात् पापनाशिनीम्।।

अत्र गुरुलक्षणं यथा कुलचूडामणौ-

कुलनाथं परित्यज्य ये शाक्ताः परसेविनः।
तेषां दीक्षा च यागश्चाप्यभिचाराय कल्पते।।
तस्मात् सर्व्वप्रयत्नेन कुलीनं गुरुमाश्रयेत्।
कुलीनः सर्व्वविद्यानामधिकारीति गीयते।।
दीक्षागुरुः स एवात्मा सर्वमन्त्रस्य नापरः।।

भावचूडामणौ-

विष्णुर्विष्णुमतस्थाये विष्णुदीक्षाप्रवर्त्तकाः।
गणेशो गाणपत्याये गणदीक्षा प्रवर्त्तकाः।।
शैवा शाक्ताश्च सर्व्वत्र सर्वदीक्षाप्रवर्त्तकाः।

गुरुभक्तिर्यथा-

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः विदा।
तस्मात्त्वमभिमानय पितुरप्यधिकं गुरुम् ॥

तथा च ऊर्ध्वाम्नाये-

धर्म्ममूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः क्रिया।
मन्त्रमूलं गुरोर्वाक्यं तस्मादादौ गुरुं यजेत् ॥

अथ शिष्ययोग्यता यथाश्रुतिः-

विद्या ब्राह्मणमित्याह सेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मा दास्तथान्यां वीर्य्यवत्तयाम् ॥
मानवन्त्वशुचिं विद्यान्नियतं ब्रह्मवादिनम्।
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिनी ॥

तथा च-

एकद्वित्रिचतुःपञ्चकर्माण्यालोक्य योग्यताम्।
योग्यं परे ग्रहेच्छिष्यं अन्यथा दुःखमाप्नुयात् ॥
वृद्धिश्राद्धं तथा कुर्य्याद्ब्राह्मणान् परितोष्यत ॥

दीक्षाकालनियमो यथा रुद्रयामले-

असिद्धिर्भूमिसम्पत्तिर्मरणं बन्धनाशनम्।
आयुर्बुद्धिप्रजानाशः सम्पत्ती रत्नसञ्चयः ॥
पूर्णफलं शत्रुवृद्धिर्मेधाकामप्रपूर्णता।
चैत्रादीनां फलं ज्ञेयं मलमासं विवर्जयेत् ॥
पञ्चाङ्गशुद्धिदिवसे शोभने शशितारयोः।
गुरुशुक्रदिने चैव शस्यते मन्त्रसंस्क्रिया ॥

दीक्षास्थाननियमो यथा मत्स्यसूक्ते -

गोष्ठे शिवालये शून्ये श्मशाने च नदीतटे।
गिरौ च ग्रहणं कृत्वा पूजयेत् सिद्धिमीप्सुभिः ॥
एवं सिद्धिं लभेन्मन्त्री नान्यथा फलमाप्नुयात्।
कृष्णपक्षस्य चाष्टम्यां शुभे लग्ने शुभे दिने ॥
पूर्व्वभाद्रपदे युक्ते जानीयाच्छोभनं कालम्।

मन्त्रस्य ग्रहणं प्रति। नक्षत्रनियमो नीलतन्त्रे-

रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम्।
पुष्यः शतभिषा चैव दीक्षानक्षत्रमुच्यते।।
क्रमं प्रपद्य विधिवत् पूजाहोमं विधाय च।
विद्यां तां कथयेत् सम्यग् जीवकर्णे च तत्त्ववित्।।

तत्रावश्यकत्वादादौ कुल्लुकामुपदिश्य पश्चादिष्टमन्त्रं वदेत्। तदुक्तं मत्स्यसूक्ते-

अज्ञात्वा कुल्लुकां देवीमनिच्छा गुरुपादुकाम्।
अदत्वा दक्षिणां सम्यगकृत्वा क्रमपूजनम्।।
योऽस्मिंस्तन्त्रे प्रवर्त्तेत तत्वं पीडयसे ध्रुवम्।।

अत्रत्यहोमस्तु होमप्रकरणे ज्ञेयः।

इषे चैव विशेषेण कार्त्तिके च विशेषतः।
महाष्टम्यां विशेषेण धर्म्मकामार्थसिद्धये।।
नात्र कालविचारादि न च नक्षत्रशोधनम्।
अष्टोत्तरशतं होमं बिल्वपत्रेण कारयेत्।।
अथवाष्टादशं कुर्य्यादष्टाविंशतिमेव वा।
पायसं कृषरं दद्यान्मोदकं खण्डशर्कराम्।।
बलिं दद्याच्च युगलं गोधामांसमनुत्तमम्।
रम्भापुष्पं शालमत्स्यं जुहुयाच्च प्रयत्नतः।।
यवक्षीरं ततो दद्याच्छाल्यन्नं मधुनायुतम्।
नारिकेलजलं दद्यात् षड्रसं तदनन्तरम्।।
शर्करासंयुतं दद्यात् स्वर्णाद्याभरणं तथा।
गोभूहिरण्यवस्त्राद्यैस्तोषयेद्गुरुमात्मनः।।
सर्व्वस्वं दक्षिणां दद्यात् गाश्च दद्यात् पयस्विनीः।
भूमिं वृत्तिकरीं दद्यात् सुवर्णं वसनान्वितम्।।
गुरुसन्तोषमात्रेण सिद्धिर्भवति शाश्वती।
अन्यथा नैव सिद्धिः स्यादभिचराय कल्पते।।
विप्रेभ्यो भोजनं दद्याद्बहुमानपुरःसरः।।

इति विशेषः। अत्रापि विविधसामान्यमपि कर्त्तव्यमिति। तथा स्वतन्त्रतन्त्रे-

तस्य छायानुसारी स्यात् निकटे त्रिदिनं वसेत्।
न चेत् सञ्चारिणीशक्तिर्गुरुमेति न संशयः।।

।।इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ दीक्षाविधिः द्वितीयपटलः।।



।।अथ तृतीयः पटलः।।

पुरश्चरण निर्णय

एवं दीक्षितः स्वसिद्धये[1] पुरश्चरणमारभेत

तथा[2] नीलतन्त्रे–

जीवहीनो यथा देही[3] सर्व्वकर्म्मसुलक्षण।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः।।
जपो होमौस्तर्पणञ्च मे को ब्राह्मणभोजनम्।
अभीषुपञ्च स्वाङ्गेषु जपस्यैव हि मुख्यता।।

अन्यच्चतुष्टयं तदङ्गत्वेन ज्ञेयं तैर्विनापि केवलमन्त्रजपात्तदङ्गसिद्धेति।

तथा गौतमीये–

यद्यदङ्गं विहीयेत् तत् संख्याद्विगुणो जपः।

अन्यत्रापि–

सन्ध्यालोपो यदि भवेद्गायत्रीं दशधा जपेत्।

तन्निष्पाद्य तदङ्गत्वोकृत्वात्। तदुक्तं गन्धर्व्वतन्त्रे–

एवं कृत्वा हविष्यासी जपेल्लक्षमनन्यधीः।
ततः प्रयोगं सर्व्वेषां वक्ष्याम्यत्र[4] विशेषतः।।

वीरतन्त्रे–

स्वेच्छाचारपरो मन्त्री पुरश्चरणसिद्धये।
रहस्यमालामादाय लक्षमेकं सदा जपेत्।।

---

१. एवं सद्गुरोराहितदीक्षः मंत्र सिद्धये पुरश्चरणत्रयमारभेत् ख.पु.पा.।

२. यथा। ख.पु.पा.।

३. देवी। ख.पु.पा.।

४. वश्यादीनां चकारयेत्। ख.पु.पा.।
पंच कृत्वोहिलोकेस्मिन्पुरश्चरणोच्यते। अत्र पंचाङ्ग जपस्यमुख्यतान्यत्तचतुष्टयं तदंगत्वेज्ञेयं तान्निष्पाद्य तदंगत्वात् गन्धर्वे। ख.पु.भि.पा.।

फेत्कारीयेऽपि-

जडोऽपि यदि शुद्धः स्यात् भावनावसतत्परः ।
लभता[१] श्रीमत्ताराणां मन्त्रस्य लक्षजापतः ।।

श्रीमतां व्यासवशिष्ठानां[२]। कांचिकां विद्यां प्राप्य कवयोर्भरतादीन्प्रचक्रिरे। इत्युक्तत्वात् । केचित्तु भावनां शक्तानां तत्रदाचारवह्निताना चतुर्गुणजपं मन्यन्ते।

तदुक्तमेकवीराकल्पे-

भावनारहितानाञ्चक्षुद्राणां क्षुद्रचेतसाम् ।
चतुर्गुणो जपः प्रोक्तः सिद्धये नान्यथा भवेत्।।

एवं महाचीनक्रमाशक्तानां ब्राह्मणादीनामपि चतुर्गुणविधानेन जपः कार्य्यः।

जपोऽपि यदि शुद्धः[३] स्याद् भावनारसतत्परः।

इति श्रवणात्।

अन्यत्रापि-

रहस्यमार्गनिरताः सर्व्वे वर्णा द्विजातयः।
तदनुष्ठाननिरताः[४] सर्व्वे वर्णाः पृथक् पृथक्।।

इति। अत्र यदोक्ता[५]चारात्। सिद्धविद्यायाश्चतुर्गुणसेवापरिश्रमो नास्ति तदुक्तं फेत्कारीये-

विशेषतः कलियुगे मत्प्रसादाद् भविष्यति।

मन्त्रचूड़ामणौ-

सिद्धमन्त्रप्रदाने तु युगसेवापरिश्रमः ।।

इति पुरश्चरणकाले तदाचरणमाह।

नक्तं भोजीहविष्यान्नं जपेद्विद्यां दिवा शुचिः ।
तत् कृत्वा सिद्धिमाप्नोति जपेच्च मनसा स्थिरम्।।

---

१. लभते श्रीमतांवाणीं। ख.पु.पा.
२. व्यासादिना च। ख.पु.पा.
३. मूकः।
४. धृत। ख.पु.पा.
५. यथोक्ता। ख.पु.पा.

तथा च गूढपादाचार्य्यः–

भूमौ शय्या वयसि नियमः कामिनीभ्यो निवृत्तिः
प्रातर्जातीविटपिसमिधा दन्तजित्वा विशुद्धिः।
पत्रावल्यां[२] मधुरमशनं[३] ब्रह्मवृक्षस्य पुष्पैः।
पूजा होमो कुसुमवसना[४] लेपनान्युज्वलामि[५]।।

मत्स्यसूक्ते–

मन्त्रकाले च सततं भार्य्याञ्च परिवर्जयेत्।
वर्जयेद्विष्टा जल्पञ्च[६] वर्जयेत्तुलसीदलम्।।
वर्जयेन्मालतीपुष्पं वर्जयेदन्यपूजनम्।

यदि जपकाले लघ्वी गुर्व्वी पीडा भवति–

हस्तप्रक्षालनं शौचं स्वाचान्तस्तत्तदाचरेत्।
देवीनाञ्च यथापुष्पं पृथक् पात्रेषु स्थापयेत्[७]।।
एकीभावं न कर्त्तव्यं यदीच्छेत् सिद्धिमात्मनः।
नैवेद्यादि फलैस्तोयैर्जानीयादेष एकभाक्।।
हविर्नानाविधैर्गन्धैः पायसैर्मोदकादिभिः[८]।
एव क्रमे[९] निमुञ्चीयाद्दधिक्षीरं तथैव च।।

रहस्यमाला यथा[१०]–

अकस्मादीहिता सिद्धिर्महाशङ्खस्य मालया।
पञ्च शन्मणिना माला मिलिता सर्वकामदा[११]।।इति।।

महाशङ्ख इति नृललाटास्थिभिः कान्तया रचिता मालिका त्रया प्रजप्तः उग्रतारा एकजटानीलसरस्वतीमन्त्रः शीघ्रफलप्रदो भवति। नृललाटास्थ्यभावे घटना सौकर्य्यार्थं देहस्यान्तरस्याप्यस्थि ग्राह्यमिति शिवदीक्षान्तर्गतटीका।

---

१. शतजाता विसफि निकटे। ख.पु.पा.
२. रत्नवाल्यं। ख.पु.पा.
३. नशश्चनं ख.पु.पा.
४. रसना। ख.पु.पा.
५. लेपनां निजनादिनि। ख.पु.पा.
६. कत्वं। ख.पु.पा.
७. नियोजयेत्। ख.पु.पा.
८. मधुरा। ख.पु.पा.
९. यथा क्रमेण युंजीत ख.पु.पा.
१०. फेतकारिये ख.पु.पा.
११. सिद्धिदा। ख.पु.पा.

अथ मालासंस्कारो यथा

तदुक्तं नीलतन्त्रे–

एकैकं माल्यमादाय ब्रह्मग्रन्थिं विनिर्दिशेत्।
अनुलोमविलोमाभ्यां मातृकान्तरितं जपेत्।।
तेन सर्व्वगुणोपेतो जायते सर्व्वसिद्धिभाक् ।।

एकवीराकल्पे–

सूत्रैस्तु ग्रथिता वापि द्विजस्त्रीसूत्रनिर्म्मितैः[१] ।
पद्मसूत्रैः कृतामाला जगद्वस्याय कल्पते ।।
मुखं[२] मुखेन संयोज्य पुच्छं पुच्छेन योजयेत्।।
सर्पाकृतिर्यथा माला गोपुच्छाकृतिरेव वा ।
मातृकावर्ण वो ग्रन्थिं विद्ययामावथ कारयेत्[३] ।।
तत् सजातीयमेकाक्षं[४] मेरवे परिकल्पयेत् ।
एवं सा ग्रथिता माला मन्त्रसिद्धिप्रदायिनी ।।
शुभे लग्ने शुभे वारे शुभर्क्षे[५] च शुभे तिथौ।
प्रतिष्ठां कारयेन्मन्त्री स्वयं वा गुरुणापि वा।।
अश्वत्थपत्रनवकं पद्माकारेण कल्पयेत् ।
तत्र संस्थापयेन्मन्त्री मातृकामन्त्र[६]मुच्चरन् ।।
वह्निं संस्कृत्य[७] विधिवदष्टोत्तरशतं हुनेत्[८] ।
हुतशेषं प्रतिहुतौ[९] प्रदद्याद्देवताधिया।।
तत्र देवीं समभ्यर्च्य ग्रहानपि च पूजयेत् ।
अनुलोमविलोमेन मातृकार्णेन मन्त्रयेत्[१०] ।।
मेरुं प्रेतेन[११] संमन्त्र्यतां नयेद्देवतात्मिकाम् ।

---

१. निर्म्मिता। ख.पु.पा.
२. मुखे मुखस्तु पुच्छे पुच्छंतु योजयेत् । ख.पु.पा.
३. कल्पयेत्। ख.पु.पा.
४. तत् सजातीयमेकाग्रं मेरुत्त्वेन प्रकल्पयेत् ख.पु.पा.।
५. शुभक्षणे। ख.पु.पा.।
६. वर्णा। ख.पु.पा.।
७. संहूत्य। ख.पु.पा.।
८. धिया। ख.पु.पा.।
९. प्रतिहुत्यं। ख.पु.पा.
१०.कारयेत् । ख.पु.पा.
११.मेरुप्रातमसं मंत्र्य तान्येदेवतात्मकम्

एवं सर्व्वगुणोपेतो जायते सर्व्वसिद्धये[१]।।

तदुक्तं शाम्भवीये–

स्यूतसूत्रं वीतिहोत्रं आवृत्तिद्वितयं पुनः।
दिवानिशाकरौ प्रोक्तौ तस्मात्तेज[२]स्त्रयी शुभा।।
गोपनीये धमनिशं जपमालेप्सिताप्रिये।
मातृमेयप्रमामालं बिन्दुनादकलात्मकम्।।
उच्चरेदनुसंस्मृत्य कुण्डलीयोगतः प्रिये।
तेन विद्या भवेत् सिद्धा नात्र कार्य्या विचारणा।।

तथा पद्मनाभीये–

कण्ठभागे स्थिता मन्त्राः केवला मन्त्रवापिणः।
सुषुम्नाध्वन्यूच्चरिताः. पशुत्वं प्राप्नुवन्ति ते।।
ईदृशाक्षस्त्रजायस्तु कुरुते जपमुत्तमम्।
अपमृत्युकानिभ्यां समुच्यते नात्र संशयः।।

करमालानिर्णयो[३] यथा तदुक्तं हंसपारमेश्वरे–

पर्व्वद्वयमनामायाः[४] परिखात्वेन[५] वै क्रमात्।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत्।।

अत्र मेरुलङ्घने दूषणं यथा–

शक्तिमाला[६] समाख्याता सर्व्वमन्त्रप्रदीपिका।

अन्यत्राप्युक्तम् –

व्यग्रचित्तेन यज्जप्तं यज्जप्तं मेरुलङ्घनात्।
तत् फलं सर्व्वं निष्फलं यात्ति इत्याज्ञा[७] परमेश्वरी।।
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्वति।

---

१. सिद्धिदा। ख.पु.पा.।
२. तावत्तेज। ख.पु.पा.।
३. नियमो। ख.पु.पा.।
४. त्रय। ख.पु.पा.
५. परिवर्त्तेन। ख.पु.पा.।
६. माली। ख.पु.पा.।
७. इत्यज्ञा परमेश्वरी। ख.पु.पा.।

सिद्धये साधको जप्यान्यमेरुं[१] नत्वा पुनः पुनः ।।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् सोऽतिपापकृत्[२]।

तदुक्तमेकवीरातन्त्रे-

नित्यं जपं करे कुर्य्यान्न तु काम्यमबोधनात्।
कुल्लुकाञ्च ततो नत्वा मालापूजां विधाय च ।।
गृह्णीयाद्दक्षिणेनाथ[३] न च वामेन संस्पृशेत् ।
नाभितश्च शिरोदेशे कुल्लुकां परिचिन्तयेत् ।।
पट्टसूत्रे कृता[४] माला देव्याः प्रीतिकरी सदा ।।

अथवा महाशङ्खाभावेन पञ्चाशन्मणिनिर्मितया स्फाटिकया[५] मालया जपेत्-

तदुक्तं तारार्णवे-

महाशङ्खेऽप्यशक्तश्चेत् स्फाटिकया मालया जपेत्।

अथवा परमयोग्यानां रहस्यातिरहस्यमत्र लिख्यते। तदुक्तं विशुद्धेश्वरे महातन्त्रे कृपया पार्वत्यै शङ्करेण-

मालाविधानमपरं[६] शृणु पार्व्वति मद्वचः[७] ।
येन विज्ञानमात्रेण मन्त्राः सिध्यन्ति[८] तत्क्षणात् ।।
अनुलोमविलोमेन वर्णमाहुर्विभेदतः[९] ।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितं मनुम् ।।
कुर्य्या[१०]द्वर्णमयीं मालां सर्व्वमन्त्रप्रदीपनीम् ।
चरमार्णं मेरुरूपं न लङ्घयेच्च सर्व्वदा।।
मेरुः शिवश्च सर्वेषां[११] यथा देवेषश्वरो हरिः ।
तस्मात्तु सुस्थिरं[१२] काले कर्म्म कुर्य्यादहर्निशम् ।।

---

१. जपेन्मेरुं। ख.पु.पा.
२. योजपेत्सत्युपायकृत। ख.पु.पा.।
३. नार्थ। ख.पु.पा.
४. सून्न। ख.पु.पा.
५. स्फुटिकादि। ख.पु.पा.।
६. विला विला विधानं परमं। ख.पु.पा.
७. तत्वतः। ख.पु.पा.
८. सिद्धयंत। ख.पु.पा.
९. मंत्रमात। निभेदितः। ख.पु.पा.
१०. कुमार्य्यावर्ण
११. शिरश्च। ख.पु.पा.
१२. स्थिरचित्तेन। ख.पु.पा.

एतत् परमरहस्यं मयोक्तं ते[1] महेश्वरि ।
त्वया गुप्ततरं कार्य्यं नाख्येयं यस्य कस्यचित् ।।

ततः सिद्धये गुरुभक्तिमङ्गीकृत्य ऊर्ध्वामुखः शिरसिकुल्लुकां क्षिप्त्वा यथासंख्यं जपेत्।

तदुक्तंफेत्कारीये–

गुरुचरणसरोजे सर्व्वदा भक्ति भावात् ।
परिचरितविधेयो वास्य सर्व्वात्मना स्यात् ।।
अनुदिन[2]मनुमेनं मालया मानवासौ[3] ।
भवति जगति वादि द्वैतसिद्धान्तहस्तः[4] ।।

इति। यथा मत्स्यसूक्ते–

कुल्लुकाञ्च न जानामि महामन्त्रं जपेन्नरः ।
पञ्चत्वं जायते तस्य अथवा वातुलो भवेत् ।।
तारिणी चण्डिकायाश्च मन्त्रः कुल्लुकवर्जितः ।
मतिमान् यो द्विजातीनां नोपाङ्क्ते यः कदाचन ।।
कुल्लुकां च शिरे धृत्वा सर्वयज्ञफलं लभेत् ।।

मायातन्त्रेऽपि–

कुल्लुकां धारयेच्छीर्षे लिखित्वा भूर्जपत्रके[5] ।
सभायां राजद्वारे च विजयी भवति ध्रुवम् ।।
नान्यो विचारः सर्व्वत्र विरूपाक्षस्य संहतः ।
कुल्लुके वर्जिते पुंसां[6] यज्ञे लोप[7]स्थितिर्भवेत् ।।
मम पूजा सदा व्यर्था ममयज्ञस्तथैव च ।
तारा[8]मन्त्रस्य देवेश त्र्यक्षरं[9] मन्त्रमुत्तमम् ।।

---

१. हि। ख.पु.पा.
२. अत्रदिन। ख.पु.पा.
३. घासौ। ख.पु.पा.
४. वेत्ता। ख.पु.पा.
५. चैव भूर्जके। ख.पु.पा.
६. युगं। ख.पु.प्रा.
७. नोप। ख.पु.पा.
८. तास। ख.पु.पा.
९. कुल्लुकां। ख.पु.पा.

न जानाति च यो मूढः कुल्लकां तारिणीं यजेत्।
यावज्जीवन्तु जपित्वायं न सिद्ध्यति कदाचन ।।
महामन्त्रं परित्यज्य पूजयेद्यदि तारिणीम्।
पञ्चत्वं जायते तस्य अथवा आतुरो भवेत्[1] ।।
कुल्लुकानाम सा देवी अनुभावस्वरूपिणी।
शवासना कर्तृहस्ता द्वीपिचर्म्मपरिच्छदा।।
नीलोत्पलवपुः श्यामा सर्व्वालङ्कारभूषिता।
लिखेत्तु त्र्यक्षरं मन्त्रं हरिद्राचन्दनेन वा ।।
यावज्जीवितमन्त्राख्यां शिखायां धारयेत् समा।
महती विद्या प्राप्तं जपेन्मन्त्रं त्रिलक्षकम्।।

एवं पूर्वोक्तस्थानादिकमनुसन्धाय
न जप्त्वा तद्दशांशेन होमतर्पणाभिषेकब्राह्मणभोजनं कुर्य्यात् यामलोक्तम्।

लक्षमेकं जपेद्विद्यां हविष्याशी जितेन्द्रियः।
उक्तस्थानेषु च यथा तत्तदासनसं[2]स्थितः।।
पूर्वोक्तपूजनं कृत्वा विप्राराधनतत्परः[3]।
अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।।
रात्रौ बलिः समादेया[4] सर्व्वसिद्धिमभीप्सुभिः।।

तथा मायातन्त्रे–

विना दीपकमन्त्रेण अग्रञ्चान्यैर्न चार्च्चयेत्।
विललनयादेवि विना रुधिरवेदनैः ।।
त्रिवर्णमस्या दीपन्या मित्तिली सा च कथ्यते ।।

इति व्याख्यातमाराध्यपाद्यादिभिश्च।

मन्त्रार्थं मन्त्रचैतन्यं सङ्केतञ्च न वेत्ति यः।
शतकोटिजपेनापि कथं सिद्धिर्व्वरानने ।।

---

१. वातुलां। ख.पु.पा.।
२. तथा तनुन्नमासन संस्थितः। ख.पु.पा.।
३. राभन। ख.पु.पा.।
४. सदादेयः। ख.पु.पा.।

गुर्वङ्गविहितामन्त्रा न दास्यन्ति फलं प्रिये ।
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ।।
सकृदुच्चरितेऽप्येवं मन्त्रे चैतन्यसंयुते ।
दृश्यन्ते प्रत्यया यत्र पारम्पर्य्यं तदुच्यते ।।
तद्दशांशपुरश्चरणहोमस्तु नीलोत्पलबिल्वपत्रेण विधेयः ।

तदुक्तं सिद्धसारस्वते–

एवं जपं तथा कृत्वा दशांशमसितोत्पलैः ।
आत्माक्तै[१]र्जुहुयान्मन्त्री तद्दशांशेन तर्पणम् ।।
कालागुरुद्रवोपेतैर्विमलैर्गन्धवारिभिः ।
तर्पयेत्तां परां देवीं तत्प्रकारमिहोच्यते ।।
जले वावाह्यविधिवत् पाद्याद्यैरुदकात्मकैः ।
संपूज्य विधिवद्देवीं परिवारान् सकृत् सकृत् ।।
संतर्प्य विधिवद्भक्त्यादशांशं तर्पयेत्ततः ।
पुनरेकैकं सन्तर्प्य परिवारांस्तथा पुनः[२] ।।
तर्पणेऽयं विधिः प्रोक्तो मन्त्रसिद्धिकरः परः ।
अभिषेकं तथा कुर्य्यात्तत्प्रकारं शृणु प्रिये[३] ।।
देवीबुद्ध्या स्वमात्मानं संपूज्य साधकोत्तमः ।
तारिणीं सिञ्चयामीति यो मूर्ध्निविनिक्षिपेत्[४] ।।
अभिषेकोयमाख्यातः[५] सर्व्वपापनिकृन्तनः ।
अभिषेकदशांशेन साधकानाञ्च पूजनम्[६] ।।
सुरापिनीं कुमारीश्च[७] भोजयेत्तदनन्तरम् ।
क्षीरखण्डाज्यभोज्यैश्च मन्त्रसिद्धिर्भवेद् ध्रुवम् ।।
गुरवे दक्षिणां दद्याद्बहुमानपुरः[८]सरम् ।।

---

१. आज्याक्तै। ख.पु.पा.।
२. येन्ततः पुनरेकैकं तर्प्य परिवाशं तथैव च। ख.पु.पा.।
३. शृणुष्वमे। ख.पु.पा.।
४. नमोमूर्द्धिन। ख.पु.पा.।
५. मयाख्यात। ख.पु.पा.।
६. भोजनम्। ख.पु.पा.।
७. मत्स्यैर्मांसै सुरादीनां कुमारी भोजयेत्ततः। ख.पु.पा.
८. णुहुयाच्च। ख.पु.पा.

इति नीलतन्त्रे। ऊर्ध्वाम्नायेऽपि होमतर्पणयोः स्वाहान्यासपूजनयोर्नमः।

मन्त्रान्तेनाय चोच्चार्य्य तर्पयामिततः[१] परम्।
स्वाहान्ते तर्पणन्त्वेव[२]मभिषेकं शृणु प्रिये[३]॥
मन्त्रान्ते नामतोच्चार्य्य सिञ्चयाम्नि नमः[४] परम्।
तद्दशांशं ब्राह्मणानाञ्च भोजनं समुपाचरेत्॥
इत्येवं सिद्धमन्त्रः सन् सर्व्वकर्म्माणि साधयेत्॥

मत्स्यसूक्तेऽपि-

अक्षतं[५] बिल्वपत्रञ्च दशांशं जुहुयात्ततः।

इति केवलं तलज्यं वेति[६]गुरवः।

गुरवे दक्षिणां दद्यात् यथावित्तानुसारतः।
अज्ञात्वा कुल्लुकां देवीमजप्त्वा[७] गुरुपादुकाम्॥
अदत्वा दक्षिणां सम्यगकृत्वा क्रमपूजनम्।
योऽस्मिन्मन्त्रे[८] प्रवर्त्तेत तं त्वं पीडयसे ध्रुवम्॥

इत्यादिमत्स्यसूक्तश्रवणात्[९]। अत्र तु सर्व्वज्ञेश्वर[१०]वेदान्त सांख्यकारयोग-शास्त्रे सस्नेहास्थिस्पर्शे महामन्त्रप्रभावां प्रायश्चित्तप्रकाशनाप्रसङ्गात्। क्वापि शवोपरि ताम्बूलं चर्व्वयतो जपः प्रदर्शितः। वीरसाधनादौ शवोपरि प्रतिविहितः। अत्र स्नानमात्रमपि प्रायश्चित्तं न प्रकाशितमाचार्य्येण महाचीनव्यपदेशिबौद्धव्यवहारात् स्पष्टास्पष्टत्वं मन्त्रान्तरविरुद्धाचारोऽत्र मन्त्रप्रभावात्।

भ्रान्तिरत्र न कर्त्तव्या सिद्धिहानिश्च जायते।
विशुद्धचित्तोऽत्र भवेत् सिद्धिः स्यादपवर्गदा॥

इति।

---

१. तप्यमि। ख.पु.पा.
२. स्येव। ख.पु.पा.
३. शृष्वमे। ख.पु.पा.
४. ततः। ख.पु.पा.
५. अयुतं त्रयं च। ख.पु.पा.
६. मे। ख.पु.पा.
७. मयक्ष्मा। ख.पु.पा.
८. तत्रें। ख.पु.पा.।
९. वचनं ख.पु.पा.।
१०. सर्व्वेश्वर। ख.पु.पा.।

परं प्राप प्रशक्तस्य सिद्धिः सकृदुपपद्यते ।

पापमनुष्यस्य तस्यासम्भवः, अत एव पापं न भवेदित्यनेन विधिना कुत्राप्युक्त-व्यवहारदर्शनात् साधकशरीरं निष्कलुषं लक्ष्यते व्यवहारविधेरनिष्टा सूचनाच्छेंति[१]।।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ पुरश्चरणनिर्णयस्तृतीयः पटलः।।



१. सिद्ध्य यदशनात् । ख.पु.पा.।

।।अथ चतुर्थः पटलः।।

अथ नैमित्तिकानुष्ठानम्

यथा तदुक्तं स्वतन्त्रतन्त्रे-

नित्यं नैमित्तिकं काम्यं सापेक्षं पूर्व्वपूर्व्वतः।
अन्यथा चेद्भवेदित्थं कुर्य्यादापत्परस्परा[१]।।

नीलतन्त्रे-

नित्याचाररतो मन्त्री कुर्य्यान्नैमित्तिकार्चनम्।
नैमित्तिकार्च्चने सिद्धे कुर्य्यात् सम्यगखण्डितम्।।

मत्स्यसूक्ते-

अष्टम्याञ्च चतुर्दश्यां पूजयेच्च[२] प्रयत्नतः।
यद्यत् प्रार्थयते मन्त्री तत्तदाप्नोति नित्यशः।।
लभते मञ्जुलां वाणीं कृष्णाष्टम्यां सदा यजेत्[३]।।

तत्र नित्यार्च्चनान्तरं नैमित्तिकं कार्य्यं यत्र कामनियमो न दृश्यते। तत्र मासं वा मण्डलं वा व्याप्य नैमित्तिकानुष्ठानं मननीयमिति तथोक्तम्।

श्रीरुद्रयामले-

मासार्द्धमथवा मासं द्विगुणं त्रिगुणं तथा।
यावत् फलाप्तिमान् योगी तावदेवं समाचरेत्।।

अन्यत्रापि तत्रैव-

नैमित्तिके तथा काम्ये फलाप्तिमण्डित्रावधिः।
न चेत्तद्द्विगुणं कुर्य्याद्यथा स्यात् फलभाक्सुधीः।।

---

१. परम्परा। ख.पु.पा.।
२. पूजनीय। ख.पु.पा.।
३. जयेत्। ख.पु.पा.।

अष्टम्यां पूजनं देव्याः सर्व्वकामफलप्रदम्।
रम्भापुष्पं बीजपूरं सुगन्धिपरिमिश्रितम्॥
मिश्रीकृत्य बलिं दद्यात्कुर्य्यादष्टम्याञ्च विशेषतः।
स्वर्णमालां महादेव्यै दद्याद्गन्धैर्विशेषतः॥
फलं क्षीरं तथा दद्यात् अधिकं शर्करान्वितम्।
तस्मात् सर्वप्रयत्नेन सम्पत्यै पूजयेत् शिवाम्॥
दानञ्चाक्षय्यसिद्ध्यर्थं दद्याद्देव्यै प्रयत्नतः।

तथा नीलतन्त्रे–

अष्टम्याञ्च चतुर्दश्यां पूजयेच्च यथाविधि॥
आत्मसिद्धि[1]मवाप्नोति जवापुष्पञ्च वर्वरा।
चन्दनं चार्ककुसुमं तथा श्वेतापराजिताम्॥
अर्घ्यं दद्याद्विशेषेण नित्यपूजासु सर्व्वदा।
अष्टोत्तरशतं जप्यं यावज्जीवितसंख्यया॥
यस्तु संपूजयेद्दुर्गां[2] महाष्टम्यां प्रयत्नतः।
त्रिजन्मार्ज्जितं पापं तत्क्षणादेव नाशयेत्॥

दुर्गां तारिणीं प्रकरणानुकूलत्वात्।

ये जानन्ति महामायां कृत्वा तत्वेन[3] भैरवाः॥
आत्मसिद्धि[4]मवाप्यान्त्येवं यान्ति शिवालयम्।
तारिणी यत्र पीठे तु[5] शिलारूपेण तिष्ठति॥
तत्र यत्नेन गन्तव्यं फलसंख्या न विद्यते।
लक्षत्रयं जपेमन्त्री तारिणी यत्र तिष्ठति॥
निस्पृहः स्थिरचित्तेन सिद्धिर्भवति तत्क्षणात्।
संख्याकृतां मृत्तिकाञ्च अक्षतञ्च तथैव च॥

---

१. आज्ञा। ख.पु.पा.।
२. भक्तया। ख.पु.पा.।
३. ज्ञात्वाचास्मिचभैरवम्। ख.पु.पा.।
४. अज्ञा। ख.पु.पा.।
५. देशे। ख.पु.पा.।

मधुना पायसञ्चैव क्षीरमाज्यञ्च शर्कराम्।
बलिं दद्याच्च गोधां वै आसवञ्च प्रशस्यते।।

नीलतन्त्रे–

यत्रासवमवश्यन्तु ब्राह्मणस्तु विशेषतः।
तत्र गुड़ार्द्रकं दद्यात्तक्रं वा गुडमिश्रितम्।।
नारिकेलोदकं कांस्ये ताम्रे वा विसृजेन्मधु।
रम्भापुष्पं शालमत्स्यं जुहुयान्मन्त्रवित्तमः।।
सर्व्वां सिद्धिमनुक्रम्य अन्ते सिद्धिमवाप्नुयात्।
साक्षतं बिल्वपत्रञ्च जुहुयाच्च सहस्त्रकम्।।
लभते मञ्जुलां वाणीं महाष्टम्याञ्च साधकः।।

यथा मन्त्रचूड़ामणौ[१]–

कुजवारे कुजाष्टम्यां चतुर्द्दश्यां विशेषतः।
योगिनीपूजनं तत्र प्रधानं कुलपूजनम्।।
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः।
तथा कुलतिथौ शक्तिः पूजिता वरदायिनी[२]।।

तथा मत्स्यसूक्तेऽपि–

कुजवारे तथाष्टम्यां चतुर्द्दश्यां विशेषतः।
शङ्खस्थितं तोयपूर्णं जवापुष्पं च वर्वराम्।।
चन्दनं चार्ककुसुमं शुक्लाञ्चैवापराजिताम्।
अन्नदानं विशेषेण नित्यपूजाक्रमः स्मृतः।।
अष्टोत्तरशतं जप्यं यावज्जीवितसंख्यया।
सहस्त्रं वा जपेदेवं नित्यपूजाविधौ मुने।।
महोग्रायाः[३] सदापूज्या पूजने कुल्लुका परा।
स्तोत्रमन्त्रव्रतदिनामनुष्ठाने च सर्व्वदा।।
अननुष्ठानतस्तस्याः सर्व्वं तन्निष्फलं भवेत्।।

---

१. तदुक्तं। ख.पु.पा.
२. वाञ्छितप्रदः। ख.पु.पा.।
३. महामाया। ख.पु.पा.।

महाविद्याञ्च संधार्य्य वासुदेवञ्च योऽर्चयेत्।
प्राप्नोति तत् फलं सर्व्वं हरिसायुज्यतां[1] व्रजेत् ।।
वासुदेवो हरो ब्रह्मा तारिणी प्रकृतिः सदा।
एकमूर्त्ति सदा चिन्त्यं एकमूर्त्तिः सदा स्थितः ।।
स्वर्ग[2]मोक्षप्रदा देवी जयविद्या जयप्रदा।
धनविद्या यशोलक्ष्मीरायुरारोग्यवर्द्धिनी[3] ।।
तस्मात्तु पूजयेद्देवीं गन्धपुष्पैश्च धूपकैः।
नैवेद्यैर्विविधैर्भक्त्या पूजयेत्तारिणीं सदा ।।

अथ नैमित्तिके विशेषार्च्चनं मायातन्त्रे–

आषाढे शयनं कुर्य्यात् सिंहे च परिवर्त्तनम्।
आश्विने बोधयेद्देवीं पशुपायसमोदकैः[4]।।
रात्रौ प्रबोधने[5] वैरं जायते सुरसुन्दरि।
दिवा प्रबोधयेत्तथा स्वप्नेऽपि न कदाचन[6]।।
शुक्लाष्टम्यां महाष्टम्यां घटस्य[7] च।
माघमासस्य च विभो रात्रौ[8] प्रपूजयेत् सुधीः ।।

अथ पीठाटनं[9] नीलतन्त्रे।

पीठानां परमं पीठं कामरूपं महाफलम्।
तत्र या क्रियते पूजा सकृद्वापि महेश्वरि।।
विहाय सर्व्वपीठानि तस्य देहे वसाम्यहम्।
तस्माच्छतगुणं ज्ञेयं[10] कामाख्यायोनिमण्डलम्।।
तेषां फलं महादेवि बहु किं कथ्यतेऽधुना।
यत्र कोटिगुणैः सार्द्धमाद्या वसति तारिणी।।
यत् पीठं ब्रह्मणोवक्त्रं गुप्तं सर्वसुखांवहम् ।।

---

१. हरिसायुज्यमाप्नुयात्। ख.पु.पा.
२. सुख। ख.पु.पा.
३. प्रदायिणी। ख.पु.पा.
४. विस्तरैः। ख.पु.पा.
५. प्रबोधनेवरं। ख.पु.पा.
६. य जायते। ख.पु.पा.।
७. कृष्णाष्टम्यां विशेषतः। ख.पु.पा.
८. सं। ख.पु.पा.
९. पीठार्चनं। ख.पु.पा.
१०. प्रोक्तं। ख.पु.पा.

यतो[1] देवाश्च देव्यश्च मुनयश्चैव भावजाः।
सर्व्वे आविर्भवन्त्यत्र तेन जप्तं सदा कुरु॥
द्विविधञ्चैव यत्पीठं गुप्तं व्यक्तं महेश्वर।
व्यक्ताद्गुप्तं महापुण्यं दुरापं[2] साधकोत्तमैः॥

तन्त्रचूडामणौ च–

एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव।
सर्व्वत्रैवसुरा[3] पूज्याः सत्यं ब्रह्मशिवादयः॥
एका चेद्युवती तत्र पूजिता चावलोकिता।
सर्व्वा एव[4] परादेव्यः पूजिताः कुलभैरव॥
आदावन्ते च मध्ये च लक्षपूर्त्तौ[5] विशेषतः।
न पूजयति चेत् कान्तां तदा विघ्नैर्विलुप्यते[6]॥
मूर्व्वार्जितं[7] फलं नास्ति का कथा परपूजनैः[8]॥

हंसपरमेश्वरे–

नरशक्तिः पशुशक्तिः पक्षिशक्तिश्चभैरव[9]।
पूजयित्वा विगुणं कर्मसगुणं धारयेत्ततः॥
पुरश्चरणकाले तु यदि स्यात् पीठदर्शनम्।
तदा तत्र पीठपूजा मनसापि न हीयते॥
देवी कूटे महाभागामुड्डियाने च भैरवीम्।
योगनिद्रां कामरूपे महिषासुरमर्दिनीम्॥
कात्यायनीं कामभूमौ[10] कामाख्यां कामदायिनीम्[11]।
जालन्धरे च पूर्णेशीं पूर्णशैले च चण्डिकाम्॥
कामरूपे ततो देव पूज्यादिक्[12]करवासिनी॥

---

१. ततो। ख.पु.पा.।
२. दुराय। ख.पु.प.।
३. सर्व्व एव। ख.पु.पा.।
४. सर्व्वत्रैव। ख.पु.पा.।
५. पूर्ण्णौ। ख.पु.पा.।
६. वित्तै। ख.पु.पा.।
७. पूजार्जित। ख.पु.पा.।
८. जन्मनि। ख.पु.पा.।
९. पर। ख.पु.पा.।
१०. धूमौ। ख.पु.पा.।
११. रूपिणीं। ख.पु.पा.।
१२. शिखर। ख.पु.पा.।

अथवा कामरूपस्य दर्शनं यदि भाग्यतः।
तदा भगादिदेवीनां पूजा तत्र विधीयते ।।
कुजवारे कुजाष्टम्यां चतुर्दश्यां विशेषतः ।
योनिपूजनं तत्र प्रधानं कुलपूजनम् ।।
यथा विष्णुतिथौ विष्णुं पूजितो वाञ्छितप्रदः।
तथा कुलतिथौ शक्तिः पूजिता वरदायिनी।।

अत्र भगादिदेवीनां बहुवचनप्रसङ्गात्।

तदुक्तं गान्धर्वे–

यदि भाग्यवशेनैव कुलदृष्टिः[1] प्रजायते ।
तदैव मानसीं[2] पूजां तत्र तासां प्रकल्पयेत् ।।
भगिनीं भगजिह्वाञ्च भगास्यां भगमालिनीम् ।
भगवक्त्रां भगाक्षिञ्च भगकर्णां भगत्वचम्।।
भगनासां भगकुचां भगस्थां भगसापिनीम्।
संपूज्य गन्धपुष्पाद्यैर्मानसे गुरुमेव च।।
नमस्कृत्य विधानेन स्वयमक्षोभितः सुधीरिति ।।

मत्स्यसूक्ते च–

द्वादश्यां पूजयेद्विष्णुं चतुर्द्दश्यामुमापतिम्।
अष्टम्यां पूजयेच्छक्तिं सर्व्वसिद्धिमभीप्सुकः[3] ।।

कुजवारादितियमस्तु रुद्रयामले–

रविचन्द्रौ गुरुशौरीचत्वारः कुलाइमे ।
भौमशुक्रावकुलाञ्चौ बुधवारः कुलाकुलम् ।।
द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् ।
विसमश्चाङ्गनाः सर्व्वाः शेषाश्च तिथयः कुलाः ।।
वरुणार्द्राभिजिन्मूला कुलाकुलमुदाहृतम् ।
कुलानि समयुग्मानि शेषाणेवाकुलानि च ।।

१. दृष्टिस्तु। ख.पु.पा.।
२. रात्रैव। ख.पु.पा.।
३. प्रदायिकां। ख.प.पा.।

तिथिवारे च नक्षत्रे कुले च स्थानिनो जयः ।
कुलाख्यो जानीने नित्यं शाम्यञ्चैव कुलाकुले ।।
एवं कुलाचारादिकं कृत्वा साधकः कुर्य्यात् कर्म्मा ।

अथ शिवाबलिः

तन्त्रचूडामणौ-

बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः ।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ।।
कालिकालीति वक्तव्ये तत्रोमा शिवरूपिणी[1] ।
पशुरूपा समायाति परिवारगणैः सह ।।
भूक्तवारौति यदैशान्यां मुखमुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा[2] कुलभूषण ।।
अवश्यमन्त्रदाने च नियतं तोषयेच्छिवाम् ।
नित्यश्राद्धं यथा सन्ध्यावन्दनं पितृतर्पणम् ।।
तथेयं[3] कुलदेवीनां नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने ।।
शिवावारेण तस्याशु सर्व्वं नश्यति निश्चितम् ।।
जपपूजाविधानेन[4] यत् किञ्चित् सुकृतानि च ।
गृहीत्वा शापमापाद्य[5] शिवा रोदिति निर्जने ।।
एकया भूक्तते यत्र शिवया देवभैरव ।
तत्रैव सर्व्वदेवानां प्रीतिः परमदुर्लभा ।।
पशुशाक्तिर्नवशक्तिः पक्षिशक्तिश्च भैरव ।
पूजिता विगुणं कर्म्म सगुणं कारयेद्यतः ।।
तेन सर्व्वप्रयत्नेन कर्तव्यं पूजनं महत् ।
राजादिभय आसन्ने देशान्तरभयादिके ।।

१. माश्रु। ख.पु.पा.।
२. अथवा। ख.पु.पा.।
३. तथैव। कुलशोव्यानां। ख.पु.पा.।
४. विनानि। ख.पु.पा.।
५. पाप। ख.पु.पा.।

शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत्।।

अथ बलिमन्त्रः–

गृह्ण देवि महाभागे शिवे कालाग्निरूपिणी।
शुभाशुभफलं व्यक्तं ब्रूहि शीघ्रं[1] बलिं तव।।
एवमुच्चार्य दातव्यो बलिः कुलजनप्रियः।
यदि न भुज्यते वत्स तदा नैव शुभं भवेत्।।
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः।
एवं ज्ञात्वा महादेव शान्तिस्वस्त्ययनञ्चरेत्।।

।।इति शिवाबलिः।।

अथ शाक्ताचारनियमो यथा नीलतन्त्रे-

प्रातरुत्थाय मन्त्रस्तु[2] कुलवृक्षं प्रणम्य च।
शिरः[3] पद्मे गुरून्ध्यात्वा तत् सुधारलावितान् स्मरेत्।।
मानसैरुपचारैस्तानाराध्यान[4] नियस्मरेत् ताशयः।
मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत्।।
सूर्य्यकोटिप्रतीकाशां सुराप्लावित[5]विग्रहाम्।
तत्प्रभापटलव्याप्तं स्वशरीरं विचिन्तयेत्[6]।।

कुलवृक्ष[7]निर्णयस्तु[8]

पादाघातादशोको[9] वदनमदिरया केशकर्णिकार-
श्चतो वीक्षाहसाभ्यां तिलकतरुणप्रियामानश्च गोत्या।
सङ्लापात् कर्णिकारः कुरुवकृतरुरालिङ्गनाथसिन्धुवारः
कदम्बं कामिनीनां नदयति नियतं स्पर्शनाच्चम्पशाखी।।

तथा च कादम्बरीमहातन्त्रे–

श्लेष्मांतकरञ्जाख्ये निम्बाश्वत्थकदम्बकाः।
बिल्वो वटोऽप्यशोकश्च इत्यष्टौ कुलवृक्षकाः।।

---

१. गृन्ह्य। ख.पु.पा.।
२. मंत्रज्ञ। ख.पु.पा.।
३. शिरः। ख.पु.पा.।
४. मानसैरूपचारैश्चात्ममाचाराध्यनिरामय। ख.पु.पा.।
५. सुधा। ख.पु.पा.।
६. परि। ख.पु.पा.।
७. मूल.। ख.पु.पा.।
८. यथा रुद्रयामले। ख.पु.अ.पा.।
९. दशोश

सामान्या इति सर्व्वेषां चिन्ताख्यानं महागुरोः ।
तिष्ठन्ति कुलयोगिन्यः सर्व्वेष्वेतेषु सर्व्वतः ।।
न स्वपेत् कुलवृक्षाधो ना चोपद्रवमाचरेत् ।।
तथा श्रुतिः। दशकुलवृक्षानामनुपप्लवः
बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ।
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ।।
तासां प्रहरणं निन्दां कौटिल्यमप्रियं तथा।
सर्व्वथा न प्रकर्तव्य[१]मन्यथा सिद्धिबाधकृत् ।।
स्त्रियो देवाः स्त्रियः प्राणा स्त्रिय एव विभूषणम्।
स्त्रिसङ्गिनामथभाव्यमन्यथा सिद्धिहा भवेत् ।।
स्वस्त्रियामपि।
विपरीतरता सा तु भाविता हृदयोपरि ।
तद्धस्तारचितं पुष्पं तद्धास्तारचितं जलम् ।।
तद्धस्तारचितं भोज्यं देवताभ्यो निवेदयेत्।
अन्यमन्त्रपुरस्कारं निन्दाञ्चैव विवर्जयेत् ।।
एतद् ब्रह्म तदेवैतत् नाहं सोपि न वस्तुतः[२] ।
नानाभावं[३] न कर्तव्यं न चारण[४]मितस्ततः ।।
भूतहिंसा न कर्तव्या पशुहिंसा विशेषतः ।
बलिदानं विना देवि हिंसां सर्व्वत्र वर्ज्जयेत्[५]।।

अथ समयाचारः[६]-

श्रृणु पुत्र रहस्यं मे समयाचारलक्षणम्।
येन हीना न सिध्यन्ति मन्त्राः[७] कोटिसहस्रशः ।।
मनवः[८] कुलशास्त्राणां कुलाचारानुपारिणाम्।

---

१. च.। ख.पु.पा.।
२. चा ख.पु.पा.।
३. नाभावं। च वा काव्यं। ख.पु.पा.।
४. वारन। ख.पु.पा.।
५. वर्ज्जिता। ख.पु.पा.।
६. तदुक्तं मंत्रचूणामणौ। ख.पु.अ.पा.।
७. मशः कल्पशत्रैरपि। ख.पु.पा.।
८. मानवा। ख.पु.पा.।

सिद्धाःस्युर्नास्ति सन्देहो वैष्णवाचारतत्परः ।।
परनिन्दा सहिष्णु स्यादुपकाररतः सदा।
पर्व्वते विपिने वापि निर्जने शून्यमण्डले ।।
चतुष्पथे जलमध्ये यदि दैवाकृतिर्भवेत्।
क्षणं ध्यात्वा मनुर्जप्त्वा नत्वा गच्छेद्यथासुखम् ।।
गृधं दृष्ट्वा[१] महाकालीं नमस्कुर्यादलक्षितम् ।
क्षेमङ्करीं तथा वीक्ष्य जम्बुकीं चैव दूतिकाम्।।
कृषोदरिमहाचण्डे मुक्तकेशी बलिप्रिये ।
कुलाचारप्रसन्नास्ये नमस्ते शङ्करप्रिये ।।
श्मशाने च शवं दृष्ट्वा प्रदक्षिणमनुव्रजन्।
प्रणम्यानेन मन्वेण मन्त्री मन्त्रफलं लभेत् ।।
घोरदंष्ट्रे[२] कठोराक्षि कोटिशब्दप्रसाधिनि[३]।
गुरुघोररवास्फाले नमस्ते चितिवासिनि ।।
रक्तवस्त्रां रक्तपुष्पां विलोक्य त्रिपुराम्बिकाम् ।
प्रणमेद् दण्डवद्भूमौ[४] इमं मन्त्रमुदीरयन्[५] ।।
बन्धूकपुष्पसङ्काशे त्रिपुरे भयनाशिनि ।
भाग्योदये[६] समुत्पन्ने नमस्ते वरवर्णिनि ।।
कृष्णवर्णं तथा पुष्पं राजानं राजपुत्रकम् ।
हस्त्यस्वरथशास्त्राणि फलकान्[७] धीरपूरुषान् ।।
महिषं कुलनाथञ्च दृष्ट्वा महिषमर्द्दिनीम्।
प्रणम्य जयदुर्गां वा स च विघ्नैर्न लिप्यते ।।
जयदेवि जगद्धात्रि त्रिपुरेति[८] सदारते।
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते ।।

---

१. दृक्ष्मां। ख.पु.पा.।
२. करोक्षि। ख.पु.पा.।
३. प्राणादिनी। ख.पु.पा.।
४. भूम्ना। ख.पु.पा.।
५. रयति। ख.पु
६. भाग्योदयसुमुत्पन्ने। ख.पु.पा.।
७. फलकांक्षौ वीर पुरुषान् । ख.पु.पा.।
८. त्रिपुरावेति दैवते। ख.पु.पा.।

मद्यभाण्डं[१] समालोक्य मत्स्यं मांसं वरस्त्रियम्।
दृष्ट्वा च भैरवीं देवीं प्रणम्यविमृषेन्मनुम्।।
घोरविघ्नविनाशाय कुलाचारसमृद्धये।
नमामि वरदे देवि मुण्डमालाविभूषिते।।
रक्तमांससमाकीर्णे वरदे त्वां नमाम्यहम्।
एतेषां दर्शनाद्देव यदि नैवं प्रकुर्व्वते।।
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते।।

।। इति श्रीशङ्कराचार्यविरचितायां ताराहस्यवृत्तौ नैमित्तिकविधिश्चतुर्थः पटलः।।



---

१. तीर्थ। ख.पु.पा.।

।।अथ पञ्चमः पटलः।।

अथ सिद्धिविद्यानां काम्यानुष्ठानविधिर्लिख्यते

काम्यकर्म्माणि यथा। तदुक्तं नीलतन्त्रे–

सिद्धमन्त्रः प्रकुर्व्वीत काम्यकर्म्माणि नान्यथा।

सिद्धिलक्षणं यथा स्वतन्त्रतन्त्रे–

मनोरथानामक्लेशं संसिद्धिः सिद्धिरीरिता।
ख्यातिर्बाहनभूषादिलाभः सुचिरजीविता[1] ।।
आरोग्यमचिरं वाथ[2] सर्व्वकृत्यं हृतङ्गता।
प्रत्यक्षे सिद्धयः प्रोक्ता सिद्धमन्त्रस्य भाविनि[3]।।
सिद्धमन्त्रेषु[4] कर्त्तव्यः प्रयोगो नान्यथा प्रिये।
होमतर्पणपूजा च भावना जपत्रहिं ।।
मन्त्रस्य धाराणाञ्चैव मारणौत्सादने तथा ।।

एतानि काम्यकर्म्माणि प्रयोगोन्यत्समर्चनात् तदुक्तं सोमभुजगवल्याम्–

शान्तिकं[5] शिशिरे ज्ञेयं हेमन्ते पौष्टिकं तथा।
आकर्षणं वसन्ते च ग्रीष्मे विद्वेषणं तथा[6]।।
प्रावृट्सूच्चाटनं कुर्य्यात् शरत्काले च मारणम्।
एषु कालेषु चैतानि कुरुते साधकः सदा।।
अर्द्धरात्रं शरत्कालो हेमन्तश्च प्रभातकः।
पूर्व्वाह्णश्च वसन्तः स्यान्मध्याह्नो ग्रीष्म एव च।।
प्रावृटरुपाऽपराह्णश्च[7] प्रदोषः शिशिरः स्मृतम्।

---

१. सुचितरतां रता। ख.पु.पा.।
२. मचिराद्बोध। ख.पु.पा.।
३. मंत्रप्रभाविति। ख.पु.पा.।
४. प्र.। ख.पु.पा.।
५. शान्तिके शशिरं। ख.पु.पा.।
६. स्मृतम्। ख.पु.पा.।
७. रूपे परा ह्णेश्च। ख.पु.पा.।

ऊषायोगो हि हेमन्तः प्रभाते शिशिरागमे ।।
प्रहरार्द्धं वसन्ते च ग्रीष्मं मध्यदिनान्तरे ।
तुर्य्ययामे च वर्षाख्यः शारदस्तगतरवौ ।।

एतदुपलक्षणं षट्कर्म्मपरम्।

तदुक्तं भैरवश्रोतसि[१]-

शान्तिं पुष्टिं तथावश्य आकर्षणं चतुष्टयम् ।
षट्कर्म्मणि प्रयुक्तानि निग्रहो निधनं तथा।।

अथ तेषां लक्षणानि-

रोग[२]हत्याग्रहादीनां निवासन्तः शान्तिरीदिता ।
पुष्टिर्द्धनजनादीनां ज्ञानादीनाञ्च कथ्यते ।।
जनसंवादनं[३] वश्यमाकर्षमात्मसात्[४]कृतम् ।
उच्चाटनादिकरणं निग्रहः परिकीर्त्तितः ।।
जनानां प्राणहरणं मारणं परिकीर्त्तितम् ।।

अथ तेषां कालनियमः।

तदुक्तं कल्पपल्लवे-

सूर्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतवः स्युर्वसन्ताद्या अहोरात्रं दिने दिने ।।
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशिशिराः[५] ।
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि।।
शिशिरः स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः।
प्रावृडुच्चाटने[६] ज्ञेया शरत् मारणकर्म्मणि ।।
वश्ये चाकर्षणे स्तम्भे रक्तवर्णं विभावयेत्।
निर्बषी[७]करणे शान्तौ पुष्टौ चाप्यायने स्मृतम् ।।
पीतं[८] स्तम्भने कार्य्यं धूम्रमुच्चाटने स्मरेत्[९] ।

---

१. भैरवश्रोतलसि। ख.पु.पा.।
२. योगकृत्या। ख.पु.पा.।
३. जनमज्ञानम। ख.पु.पा.।
४. णचतुष्टयम् । ख.पु.पा.।
५. शान्तिके। ख.पु.पा.।
६. उच्चालने। ख.पु.पा.।
७. निर्विषी। ख.पु.पा.
८. पीतां। ख.पु.पा.।
९. तथा। ख.पु.पा.।

उन्मादे शत्रुगोपाभं कृष्णवर्णन्तु मारणे ॥
उत्थितं मारणे ध्येयं सुस्तमुच्चाटने स्मृतम् ।
उपविष्टं सुरेशानि वश्यादौ परिचिन्तयेत् ॥
आसीनं श्वेतवर्णन्तु शान्तिके न विचिन्तयेत्[1] ।
वाममार्गे[2]स्थितं कृष्णं तामसं परिकीर्त्तितम् ॥
सात्विकं मोक्षकामानां राजसं राज्यमिच्छताम् ।
तामसं शत्रुनाशार्थं सर्व्वव्याधिनिवारणम् ॥
मारणे विषसंहारे दुष्टभूतनिवारणे ।
उच्चाटने च विद्वेषे पञ्चवर्ण[3] प्रयुज्यते ॥
मन्त्रान्ते नामसंस्थानं योग इत्यभिधीयते ।
शान्तिके पौष्टिके वश्ये प्रायश्चित्ते विशोधने ॥
मोहने दीपने योगं प्रयुञ्जन्ति मनीषिणः ।
स्तम्भनोच्चाटनोच्छेदे विद्वेषे च स चोच्यते ॥
नाम्न आद्यन्तमध्ये च मन्त्रः स्यान्मुख्य[4] उच्यते ।
मन्त्राभिमुख्यकरणे सर्व्वपापनिवारणे ॥
ज्वरगृहविद्यकृत्या शान्तिके च स चोच्यते ।
सन्मीलने[5] स एवाथ मन्त्रनामाक्षराणि च ॥
एकैकमन्वितं यत्तु ग्रथनं यत् प्रकीर्त्तितम् ।
तच्छान्तिके विधातव्यं नामाद्यन्ते यदा मुहुः[6] ॥
तत् संपुटे भवेत्तत्तु कीलकं परिकीर्त्तितम् ।
स्तम्भं मृत्युञ्जये दिष्टो रक्षणादिषु संपुटः ॥
द्वे द्वे नामाक्षरं तस्य मध्ये नामाक्षरं क्रमात् ।
गण्यते[7] स विदर्भस्तु वश्याकर्षणपौष्टिके ॥
एवं योगक्रमः प्रोक्तः कर्म्मकाले मनीषिभिः ।

---

१. परिचिन्तयेत्। ख.पु.पा.।
२. मान। ख.पु.पा.।
३. पद्मवर्णं। ख.पु.पा.।
४. द्योग। ख.पु.पा.।
५. सम्मोहने। ख.पु.पा.।
६. मनुः। ख.पु.पा.।
७. कथ्यते। ख.पु.पा.।

वह्निकार्ये जपे स्वाहा नमः सर्वत्र चार्चने ।।
शान्तिपुष्टिवशे द्वेषेषूच्चाटने च मारणे।
स्वधास्वाहा वषट्[१] त्वञ्च वौषट् फट्कारकं क्रमात् ।।
पद्मासनं पौष्टिके तु शान्तिके स्वस्तिकासनम्।
आकृष्टौ याष्टिकं तद्वत् द्विषो द्वेषेऽर्द्धस्वस्तिकम्।।
उच्चाटे च तथा कुर्य्यात् मारणादौ प्रशस्यते ।
शान्तिपौष्टिकवश्ये तु[२] सुन्दरीशोभनाशया ।।
सर्व्वाभरणसंदीप्ता प्राप्ता काम[३]मनोरथा।
ध्यातव्या देवता सम्यक् प्रसन्नाननपङ्कजा[४] ।।
आकर्षणेऽपितद्वच्च मारणे च प्रशस्यते।
साध्य आकर्षणे द्वेषे मात्सर्यमानो जनैरिव ।।
अर्द्धर्यमानो महीघ्रेण[५] ग्रसितस्तक्षकेण तु ।
उलूकवायसा[६] विष्टैग्रस्त उच्चाटने रिपुः ।।
स्तम्भने शिलया क्रान्त तृणपर्णादिवत् स्मरेत् ।
व्याप्तश्च तक्षकाराति[७]पुरुषैश्च पशुर्यथा ।।
व्यालेनाप्यथ[८] सिंहेन हन्यते[९] मारणे रिपुः ।
जपेच्च शवमारुह्य सन्दष्टौष्ठपुटः क्रुधा ।।
कर्म्म कुर्य्याद्यथान्यायं मन्त्री क्रूरे तु कर्म्मणि[१०] ।
पौष्टिकादीनि कर्म्माणि यद्वारतिथियोगतः।।
प्रयोक्तव्यानि विधिना तच्च संप्रोच्यतेऽधुना ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।।
बुधेन्दुवारसंयुक्ता पूजिता शान्तिकर्म्मणि।

१. स्वाहा स्वधा वषट् वौषट् तद्वद्विद्वेषे कूर्म्म हूं तथा। ख.पु.पा.।
२. रक्षे हू। ख.पु.पा.।
३. काले। ख.पु.पा.।
४. नवास्मृतं। ख.पु.पा.।
५. अस्म मानोजने र्दण्डैर्यमितस्तुस्व केन तु। ख.पु.पा.।
६. मायसा। ख.पु.पा.।
७. व्याप्तं स्कशरानि। ख.पु.पा.।
८. व्याघ्रेण च। ख.पु.पा.।
९. हन्याच्च। ख.पु.पा.।
१०. सु कर्मषु।

सप्तमी पौष्टिके शस्ता अष्टमी नवमी तथा ॥
दशम्येकादशी चैव भानुशुक्रादिसंयुता ।
आ[1]कर्षणेऽप्यमावस्या नवमी प्रतिपत्तथा ॥
पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्म्मणि ।
कृष्णा चतुर्द्दशी यद्वदष्टमी मन्दतारका ॥
उच्चाटने तिथिः शस्ता प्रदोषे च विशेषतः ।
चतुर्द्दश्यष्टमी कृष्णा अमावस्या तथैव[2] च ॥
मन्दभौम[3]दिनोपेता शस्त्रमारणकर्म्मणि ।
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा ॥
पौर्णमासी च विज्ञेया तिथिः स्तम्भनकर्म्मणि ॥
शुभग्रहोदये कुर्य्यात् शुभानि च शुभोदये ।
रौद्रकर्म्मणि रिक्तार्के मृत्युयोगे च मारणम् ॥

तदुक्तं मत्स्यसूक्ते–

होमतर्पणपूजा च भावना जप एव हि ।
मन्त्रस्य धारणञ्चैव मारणोच्चाटने तथा ॥
एतानि काम्यकर्म्माणि प्रयोगोऽन्यत् समर्च्चनात् ॥

तदुक्तं फेत्कारीये–

विद्याकामेन होतव्यं तिलाज्यमधुसंयुतम्। सिद्धसारस्वतेऽपि–

बन्धूकपुष्पहोमेन दासवत् कुरुते नृपान् ।
सर्पिर्लवणहोमेन समाकर्षति कामिनीम् ॥
वकुलप्रसवैर्होमात् सौभाग्यं लभते नरः ।
मल्लिकाजातिपुन्नागकदम्बैः पुष्टिमाप्नुयात् ॥
राजसोन्दालुवृक्षप्रसूनस्य होमात् सम्पदमाप्नुयात् ।
र र्व्वांतिलाज्यहोमेन दीर्घमायुमवाप्नुयात् ॥
सम्पूज्य मूलमन्त्रेण बिल्वपत्रैर्धनान्वितैः ।

---

१. आ। ख.पु.पा.।
२. विशे॰तः। ख.पु.पा.।
३. शौर। ख.पु.पा.।

सहस्रं प्रत्यहं हुत्वा प्राप्नोति परमां गतिम् ।।
घृताक्तमालतीपुष्पहोमात् द्रष्टुकविर्भवेत् ।
अत्र होमस्य सर्व्वस्य नियमोऽयुतसंख्यकः ।।

।। इति होमप्रकरणम्।।

।।ततस्तर्पणम्[1]।।

मत्स्यसूक्ते-

मधुना तर्पणं देव्याः सर्व्वकामप्रपूरकम् ।
मन्त्रसिद्धिकरं साक्षान्महापातकनाशनम्।।

नीलतन्त्रे-

कर्पूरमिश्रितैस्तोयैर्मासमात्रं हि तर्पयेत्।
वशीकृत्य नृपान् सर्व्वान् भोगी स्याद्यावदायुषम् ।।
घृतैः पूर्णायुषः[2] सिद्ध्यै दुग्धैरारोग्यसिद्धये ।
अगुरुमिश्रितैस्तोयैः सर्व्वकाम्यं सुखी भवेत्।।
नारिकेलोदकैर्मिश्रैस्तोयैः सर्व्वार्थसिद्धये ।
मरीचमिश्रितैरुष्णतोयैः शत्रून्निवारयेत्[3] ।।
केवलैरुष्मतोयैश्च शत्रूनुच्चाटयेत् क्षणात् ।
ज्वराविष्टो भवेत्तेन दुग्धसंकात् शासयं[4] नयेत्।।

तत्रैव जपप्रसङ्गः-

हविष्याशी मुक्तकेशो जपादयुतमादरात्।
गद्यपद्यमयी वाणी तस्य सर्व्वविधा भवेत् ।।

ध्यानन्तु तत्रैव-

उच्चाटयति पिङ्गाक्षी संत्रासयति[5] केकवा ।
विद्रावयति मुक्तास्या विद्रासयति घूर्णिता ।।

---

१. अथ। ख.पु.पा.।
२. घटे पुरर्यवुषः सिद्धै दुग्धैरायुषासिद्धये। ख.पु.पा.।
३. विनाशयेत्। ख.पु.पा.।
१. समं। ख.पु.पा.।
२. संभ्रासयति केकश। ख.पु.पा.।

विक्षोभयति संक्षुब्धा संतापयति संनता।
संकोचयति संरुद्धा विप्रवृद्धा विरोधयेत्॥

फेत्कारीयेऽपि–

अत्र सर्व्वस्य कर्त्तव्यं भावनामात्रचिन्तनम्।
अत्रोच्चाटनादिषु सदा सर्व्वत्रैवायुतसंख्यो जपः॥

तदुक्तं सिद्धसारस्वते–

अयुत[1]ताभिजप्तमात्रे[2] रोचनातिलकं नरः[3]।
कृत्वा पश्यति यं मन्त्री तं कुर्य्याद्दासवद्वशी॥

फेत्कारीयेऽपि–

पुष्करिणी[4]जलेऽगाधे यष्टिकातं[5] तमोग्रहे।
दन्तेनानीय तत्तूर्णं कीलकं तेन कारयेत्॥
तेन मधुघृताक्तेन पद्मिनीपत्रमस्तके।
लिखेत् सूत्रावलीमध्ये मूलमन्त्रविदर्भितम्॥
तत्कुण्डे चतुरस्रे तु निक्षिप्य जुहुयादपि।
सहस्राक्षीरनीरक्तपद्मानां लोहितत्विषाम्॥

तस्यार्थ[6]:–तमोग्रहे राहुग्रहे निशाकरे सूर्य्ये वा निक्षिप्येति कुण्डमध्ये द्वादशाङ्गुल्याधोभागे निःक्षिप्येत्यर्थः। मूलमन्त्र[7]विदर्भितमिति मन्त्रस्थ हृल्लेखा-रेफमध्ये मम द्रुतकवित्वसिद्धिं कुरु कुरु इत्यास्थासहितं लिखेत्। ततः प्रयोगानन्तरं पद्मावतीयन्त्रेण[8] बलिं दद्यात्।

'ॐ पद्मे पद्मे महापद्मे पद्मावति माये स्वाहा' इति मन्त्रेण यथापूर्व्वं नैमित्तिक-पटलेनोक्तेनैव कुर्य्यात्।[9]

तदुक्तं फेत्कारीये–

प्रणवं[1] पूर्व्वमुच्चार्य्य पद्मे युग्मं तथैव च।

---

१. शताभि॥ ख.पु.पा.।
२. मात्रेण। ख.पु.पा.।
३. व्रतम्। ख.पु.पा.।
४. रिण्यां। ख.पु.पा.।
५. काष्ठं। ख.पु.पा.।
६. अस्यार्थ। ख.पु.पा.।
७. मंत्र। ख.पु.पा.।
८. मंत्रेण। ख.पु.पा.।
९. दद्यात्। ख.पु.पा.।

महापद्मे पदं ब्रूयात् पद्मावति पदं ततः।।
माये स्वाहेति मन्त्रेण यथापूर्व्वं बलिं हरेत्।
एवं यः कुरुते कर्म्म स स्याद्द्भुतकविर्ध्रुवम्[२]।।

अथ सकलसिद्धये वक्ष्यमाणबलिमन्त्रेण नित्यपूजोक्तबलिमन्त्रेण वा रात्रौ चतुष्पथे बलिं दद्यात्।

तदुक्तं फेत्कारीये-

उपचारविशेषेण राजपत्नीं वशं नयेत्।
राजानं जपमात्रेण बलिना सकलं जगत्।।

अस्यार्थः--उपचारविशेषेणेति तदुक्तं मस्त्यसूक्ते-

रम्भाजातीबीजपूरं सुगन्धिपरिमिश्रितम्।
मिश्रीकृत्य बलिं दद्यात् अष्टम्याञ्च विशेषतः।।*इति*।।

राजानं जपमात्रेणेति पूजादिरहितेनैवेति यावत्। मन्त्रसहितयोगपल्लवादि-प्रयोगेण राजवश्यो भवति बलिनेति मत्स्यसूक्तोक्तनैमित्तिकपटलानुसन्धानेन बोद्धव्यम्, तदुक्तं नीलतन्त्रे-

प्रयोगबलिमन्त्रोऽयं प्रयोगान् साधयेद्यदि।
अर्द्धरात्रे ततो नित्यं बलिं दद्याच्चतुष्पथे।।
परसैन्यग्राविष्टरोगकृत्यानिवारणः।
प्रणवं पूर्व्वमुच्चार्य्य उग्रतारे ततः परम्।।

येषां[३] हिं सितुमुद्यतां निन्दितुमुद्यता योगिनीचक्रैस्तानहारय द्वयं हुँ फट् स्वाहा परविद्यामाकर्षयाच्छादयरुपाणि[४] गृह्ण गृह्ण स्वाहेति मनुः। प्रसङ्गादत्र[५] यागादिबलिदानम्। यथा कालीतन्त्रे सलक्षणं तरुणं पशुं देव्यग्रे संस्थाप्यार्घ्योदकेन संप्रोक्ष्यास्त्रेण संवक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य कर्णे धृत्वा इमं मन्त्रं पठेन्नरः[१]।

---

१. ॐकारं। ख.पु.पा.।
२. कूर्भवेत। ख.पु.पा.।
३. येष्ठां। ख.पु.पा.।
४. कपाले। ख.पु.पा.।
५. वलि मंत्रेणांप्यथ च वलिं दद्याद्यथा रुचिन्। ख.पु.पा.।

'पशुपाशाय विद्महे विश्वकर्म्माय धीमहि। तन्नो जीवःप्रचोदयात्' 'ह्रीं[1] कालिकालिवज्रेश्वरि लौहदण्डायै नमः' इति संजप्य[2] खड्गं पूजयेत्।[3] लक्ष्मीनारायणाभ्यां नमः[4] द्रीं वागिशीब्रह्माभ्यां नमः द्रूं[5] उमामहेश्वराभ्यां नम इत्यनेन मन्त्रेण ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नम इति ध्यात्वा संपूज्य-

खड्गाय खरनाशाय शक्तिकार्य्याय तत् परः।

ततो मूलमन्त्रेण दूर्व्वाक्षतपानीयं गृहीत्वा दीर्घायुस्तदुर्भिक्षदुःखनिवृत्तिपरमपद-गमनपूर्व्वकशाश्वतसमयावच्छिन्नहर्षविजयकामः श्रीमन्नीलसरस्वती इमं पशुं तुभ्यमहं ददे। देव्याज्ञां प्रार्थ्य पशुं निवेदयेत्।

यथोक्तेन विधानेन तुभ्यमस्तु विधानतः।
ततश्छिन्ने दक्षिणे पतिते वृद्धिविभागे वन्दितम् ।।
दैन्यं मध्ये च पतितं देविच्छेदं स्मरेद्बुधः।
तत् कुण्डान्तिके[7] गत्वा हुतिभिर्दशपञ्चभिः ।।
तेनैवतूत्सृजनदोषं बलिं लक्षेत् सलक्षणम् ।।

ततो रुधिरमासभक्तानि वटुकयोगिनीक्षेत्रपालगणेशादीनां बलिमन्त्रैर्बलिं हरेत्। द्रूँ वाँ वटुकभैरवाय नम इति गन्धाक्षतकुसुमैः संपूज्य वायव्ये द्रूँ याँ योगिनीभ्यः नमः गन्धाक्षतकुसुमैः संपूज्य ईशाने आग्नेये द्रूँ क्षैं क्षेत्रपालाय नमः द्रूँ गाँ गणेशाय नमः गन्धाक्षतकुसुमैः संपूज्य बलिं दद्यात्।

श्मशानाङ्गारमादाय मङ्गनेकासवैर्निशि।
कृष्णवस्त्रेण संवेक्ष्य[8] वघ्नीयाद्रक्ततन्तुना ।।
शतमभिमन्त्रितं तच्च निक्षिपेद्वैरिवेश्मनि।
सप्ताहाभ्यन्तरे तेषामुच्चाटनमिदं मरुत्।।

फेत्कारीये-

नरस्थिनि लिखेत् मन्त्रं क्षारयुक्तं हरिद्रया।
सहस्त्रं परिसंजप्य निशायां रविवासरे ।।

---

१. पठेत् ख.पु.पा.।
२. ह्रीं। ख.पु.पा.।
३. संपूज्य ख.पु.पा.।
४. हूं। ख.पु.पा.।
५. हूँ। ख.पु.पा.।
६. हूं। ख.पु.पा.।
७. ननश्च दंडमध्येक्षाहुति। ख.पु.पा.।
८. संवेद्यय। ख.पु.पा.।

क्षिप्यते यस्य गेहेतु मृत्युस्तस्य त्रिमासतः ।
क्षेत्रे तु सस्यहानिः स्याद्बलहानिस्तुरङ्गमे ।।
धनहानिर्धनागारे ग्राममध्ये प्रजाक्षयः ।।

हृल्लेखाधोगतरेफमध्ये अमुकामुकयोर्द्वेषं कुरु कुरु इति। तदुक्तं नीलतन्त्रे-

द्वेषत् विलिखेन्मन्त्रं प्रेतं कर्पटके सुधीः।
द्वेष्यद्वेषकयोर्न्नाम्नि तस्य द्वेषो महान् भवेत् ।।

इति। अमुकं मारय मारयेत्यादिसाध्यसहितमित्यर्थः अथवा साध्यं लिखित्वा तदन्ते मन्त्रं सहस्रं परिजप्येति अमुकं मारयेत्यन्ते मन्त्रजपः। द्वेषे तु अमुकामुकयोर्द्वेष्यं कुरु कुरु इत्यस्यान्ते मन्त्रमुच्चार्य्य सहस्रं जपेत्।

तदुक्तं सङ्केततन्त्रे-

उच्चाटनपदञ्चापि पिङ्गाक्षी तदनन्तरम् ।
वषट् फट् मन्त्रमुद्धृत्य साध्यसंज्ञान्वितं[1] पुनः ।।
देशाद्देशान्तरं याति रिपुः काक इवापरः[2] ।।

पिङ्गाक्षी फैं इति विभूतभैरवोक्तत्वात् पिङ्गाक्षी कुटिला इति।

अथ परमन्त्रवीर्य्यहानिमाह[3]-

वह्नि[4]पूरे विषोर्विद्यां लिखित्वा पत्रकोमले।
श्मशाने मन्त्रमुच्चार्य्य पुटीकृत्य[5] विदह्युतम् ।।
सहस्रजन्मभिर्जप्ता विद्या नहि फलप्रदा ।
सिद्ध्यर्थं विनश्यन्ति देवा[6]नामपि दुर्लभाः ।।

तत्प्रतीकारो यथा-

मातृचक्रेऽमृतं लिख्यामृतभिन्न पुटीकृतम् ।
जले निक्षिप्य मन्त्रन्तु पुनर्नव इतीरितः ।।
यन्मनुर्जन्मभिर्दग्धो नवोदित[1]शशी यथा ।

---

१. त्वितं। ख.पु.पा.।
२. इवा। ख.पु.पा.।
३. सर्व्वा। ख.पु.पा.।
४. वह्निकूटे। ख.पु.पा.।
५. प्रकटी कृत्वा विदहय च। ख.पु.पा.।
६. वाना। ख.पु.पा.। पाठं अशुद्धम्।

क्षणे क्षणेऽपि तेजस्वी रिपुदृष्टिगतोऽपि च॥

अथ शान्तिकादौ धारणयन्त्रं लिख्यते।

तदुक्तम्–

योनियुग्मे लिखेन्मन्त्रं मन्त्री हेमशलाकया।
क्लीं हीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः[२] ॥
अष्टपत्रे त्वष्टवर्णान् तुबहिर्भूपुरं द्वयम्।
अष्टवक्त्रं भूपुरे च विलिखेत् साधकोत्तमः॥
स्वर्णपट्टेऽथ भूर्जे वा रौप्ये वाप्यथ सुव्रतः[३]।
विलिखेद्धेमलेखन्या गन्धाष्टकसमन्वितम् ॥
दूर्व्वाकाण्डेन वा लिख्यात् कुश[४]मूलेन वा पुनः।
वेष्टितं पीतवस्त्रेण यन्त्रया परिवेष्टितम्॥
बघ्नीयात् पीतवस्त्रेण शिशूनां कण्ठभूषणम्।
स्त्रीणां वामभुजे चैवमन्येषां दक्षिणे भुजे॥
वन्ध्या तु लभते पुत्रं निर्धनो धनमालभेत्॥
इयं[५] रक्षा पुरावद्धा ज्ञानार्थं गौतमादिभिः।
कीर्त्यर्थं पार्थिवैश्चान्यैः संग्रामे जयकाङ्क्षिभिः॥

अस्यार्थः–

योनियुग्मेष्टकोणे तन्मध्ये हेमशलाकया भूर्जपत्रादौ कुङ्कुमगोरोचनाचन्दनैर्मसिं विधाय पङ्क्तिक्रमेण मूलमन्त्रं लिखित्वा तस्य हल्लेखारेफमध्ये अमुकस्य रक्षां कुरु कुरु अमुकीनां शुभपुत्रमुत्पादय उत्पादय इति वा अस्य कार्यसिद्धिं कुरु कुरु इति आराध्यसहितं विलिख्य षट्कोणेक्लीं हीनान् ऋ ॠ ऌ ॡ रहितान् तदुक्तम्–

स्वराणां मध्यगं यत्तु चतुष्कं नपुंसकम्।
इति।

१. तदन्नं तन्मनू दग्ध नवोदित। ख.पु.पा.।
२. सुधीः। ख.पु.पा.।
३. ताम्रके। ख.पु.पा.।
४. दशमूलं। ख.पु.पा.।
५. इमां। ख.पु.पा.।

दीर्घवर्णान् आ ई ऊ ऐ औ अः इत्येकैकं विलिखेत् अष्टपत्रेषु यथा ऐँ द्रीँ ॐ ऐँ द्रीँ फट् स्वाहा इति।

तदुक्तम्–

वाग्भवं कुलदेवीञ्च तारकं वाग्भवं तथा।
हृल्लेखा चास्त्र मन्त्रान्ते वह्निजायावधिर्मनुः[१] ।।
अष्टाक्षरो मनुः प्रोक्तो मन्त्राणां सार ईरितः।।
अन्ये प्रयोगाः कालिकावद्योक्ता अत्रापि कार्य्याः।

तदुक्तं फेत्कारीये–

कालिकामन्त्रतन्त्रोक्तान् प्रयोगानिह चाचरेत्।
अत्रोक्तान् सम्यक्तत्रापि प्रयोगानपि चाचरेत्।।

अथ बालसंस्कारो यथा

दक्षिणपाणिना मधुनाज्याभ्यां नाडीछेदात् प्रकारत्रयं संमार्ज्य हेमशलाकया पूर्व्वया वा यज्ञदास[२]शिवावावालस्य जिह्वायामोष्ठे वा एतल्लिखनम्। मन्त्रनैमित्तिकसंस्कारान्तरं एकादशाहे केचित्। क्षत्रियाणां द्वादशाहे वैश्यानां पञ्चदशाहे शूद्राणां मासान्ते एतदादौ तु देवतां संपूज्य मन्त्रं लिखेदिति गुरवः। महोग्रताराकल्पे तु पश्चाद्देवतां पूजयेत्। यदि पिता दूरस्थो भवति तदा मातुलो वा पितृव्यो वा लिखेत्।

तदुक्तं मत्स्यसूक्ते–

अथवा मधुनाज्याभ्यां जिह्वायां बालकस्य तु।
नालच्छेदविधेः पूर्वं लिखेत् स्वर्णशलाकया।।
मूलमन्त्रं लिखेन्मन्त्री यस्यौष्ठे श्वेतदुर्व्वया।
वाक्योच्चारणतो[१] बालो वाग्मी द्रुतकविर्भवेत्।। इति।।

महोग्रताराकल्पेऽपि–

जन्मसंस्कारकं नाम पुत्रे जाते प्रशस्यते।
जिह्वायाञ्च लिखेन्मन्त्रं यज्ञदारुद्भशेनवा।।

---

१. मभुः। ख.पु.पा.।
२. (याष्टि) ख.पु.पा.।

वारत्रयं तु संमार्ज्य दक्षिणेनैव पाणिना।
मन्त्रमुच्चार्य्य प्रत्येकं पङ्क्तिं कुर्य्यात् सुशोभनाम्॥
आदौ संस्कारः कर्त्तव्यस्तदन्ते विलिखेन्मनुम्[२]।
गन्धचन्दनपुष्पैश्च तदन्ते पूजयेच्छिवाम्॥
उत्तराभिमुखो भूत्वा स्थापयेत् पीठमुत्तमम्।
पूजयेत्तारिणीं देवीं नानाभक्षैः[३] सुशोभनैः॥
कविर्वाग्मी भवेत् पुत्रः सत्यवादी जितेन्द्रियः।
पितुर्भ्राता लिखेन्मन्त्रं मातृभ्राताथवा[४] पुनः॥
पिता चैव लिखेन्मन्त्रं नान्य एव कदाचन।
मातुः क्रोडे तु संस्थाप्य वस्त्रमास्तीर्य्य यत्नतः॥
शान्तिं कुर्य्याद्बालकस्य ब्राह्मणैः सह संयतः॥

यथा-

इमं पुत्रं कामयत कामजानामिहैव हि।
देवेभ्यः पुष्णाति सर्व्वमिदं मज्जननं मज्जनत्वम्।
परं[५] शान्तिस्तारायै रुद्रेभ्यस्तारैयै शिवाय शिवयशसे।
मन्त्रलिखनान्ते मन्त्रद्वयेन शान्तिं कुर्य्यात्।

ततस्तस्य माहुः कर्णे शान्तिस्तोत्रं पठेत्। यथा-

तासां सव्येषु कर्णेषु ततस्तोत्रं समाचरेत्।
मातर्देवि नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे॥
कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे।
माहेशि वरदेवि परमानन्दरूपिणि॥
कौमारि सर्व्वविद्येशे कुमारक्रीडने वरे।
विष्णुरूपधरे देवि विनतासुतवाहने॥
वाराहिवरदे देवि दंष्ट्रोद्धृतवसुन्धरे।
शत्रुरूपधरे देवि शक्रादिसुरपूजिते॥

---

१. मान्त्रेण। ख.पु.पा.।
२. सं.। ख.पु.पा.।
३. नामापुः रवै। ख.पु.पा.।
४. तथैव च। ख.पु.पा.।
५. शिवशान्ति। ख.पु.पा.।

चामुण्डे मुण्डमालास्त्रक्चर्च्चिते विघ्ननाशिनि ।
महालक्ष्मि महोत्साहे क्षोभसन्तापनाशिनि ।।
मितिमातृमये देवि मितिमातृवहिष्कृते ।
एके बहुविधे देवि विश्वरूपे नमोऽस्तु ते ।।
एतत् स्तोत्रं पठेद्यस्तु कर्म्मारम्भेषु संयतः।
विदग्धां वासमालोक्य तस्य विघ्नो न जायते ।।
कुलीनस्य द्वारदेवाः कथितास्तव पुत्रक ।
दीक्षाकाले नित्यपूजा समयेनार्च्चयेद्यदि ।।
तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः ।।

।। इति शान्तिस्तोत्रं समाप्तम्।।

।। इति श्रीशङ्कराचार्यविरचितायां ताराहस्यवृत्तौ काम्यानुष्ठाननिर्णयः पञ्चमः पटलः।।



अथ षष्ठः पटलः

अथ महाचीनाक्रमाधीनाः सिद्धयश्चास्मिनतन्त्रे सर्व्वैः प्रतिपादिताः संप्रतितद्यथा तदुक्तं तारार्णवे।।

।।देव्युवाच।।

महाचीनक्रमं देव कथितं भुविदुर्लभम् ।
गान्धर्व्वञ्चतथासर्व्वं यद्यद्गुप्ततरं भवेत्[१]।।
महाचीनक्रमं देव सूचितं न प्रकाशितम् ।
कथयस्व तदेदानीं यदि स्नेहोस्तिमां प्रति ।।

श्री भगवानुवाच

महाचीनक्रमं देवि सर्व्वतन्त्रेषुगोपितम् ।
नवकृत्यं त्रिभुवने शुद्धभावेन भाविनि[२] ।।
केचिद्देवानराः केचिद्दानवाः यक्षराक्षसाः ।
नातत्वोकाः किन्नराश्च गन्धर्व्वाप्सरसां गणाः ।।
ये वा पशुमृगाः[३] पक्षी ये केचिज्जगतीगताः ।
एतेजड़तराः सर्व्वे परस्परफलार्थकाः[४]।।
कुकल्पनरताः सर्वे कुमार्ग दर्शनोत्सुकाः ।
एतेषां कोपि विन्दानमानन्द ब्रह्मचित् सुखम् ।।
न जानाति महादेवि कथं तत् कथयामिते।
नित्यमुक्त स्वभावोयस्तस्मै तदर्थमीरितम्।।
क्षमस्व देवि चार्वङ्गि न वक्तव्यं त्वयानघे।।

---

१. महत् । ख.पु.पा.।
२. तारिणी। ख.पु.पा.।
३. गणा। ख.पु.पा.।
४. खलात्मनः। ख.पु.पा.

।।देव्युवाच।।

नमस्ते शिवरूपाय नमस्ते गुरुरूपिणे[१]।
नमस्ते वरदे स्वामिन् करुणानिधये नमः ।।
नान्यदेव रता येच येचत्वत् पद काङ्क्षिणः ।
तेषामिवाधिकफलं मद्भक्तानां व्यवस्थितम् ।।
सिंह व्याघ्रादयो ये च येच विघ्नानुकारिणः।
रिपवश्च तथा सर्पा ये चान्ये दुष्टजन्तवः।।
ते सर्व्वे विलयं यान्ति पतङ्गा इव पावके।
देहं दीपशिखाकारं दृश्यते . दुष्टजन्तुभिः।।
केवलं प्रेम भावेनत्वयैव[२] विभुना[३]प्रभो।
किंवा सर्व्वमयो[४] भूत्वा आसने पञ्चदेवताः ।।
पृथिवी जलतां याति जलं तेजोमयं भवेत् ।
तेजोवाये तथा वायुराकाशं तत् प्रकाशकम् ।।
दानवाराक्षसाः सर्व्वे ये चान्ये देवतागणाः ।
राजनश्चतथा चान्ये सर्व्वेतत् पादवर्त्तिनः[५]।।
आज्ञां भजन्ते गन्धर्व्वा के पुनर्नर किंकराः[६]।
यत्र यत्र भवेदाज्ञा तत्तत् सिद्धिः करेस्थिता ।।
सदा तं कमलावाणी भजतेति सुनिश्चला।
त्वन्त्व[७] भावं परित्यज्य किंमन्यद्बहुजल्पितैः[८]।।
मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
अन्ते तु जायते गौरी लोके शिव इव स्वयम्[९]।।
सिद्धा भवन्तु मद्भक्ताः कथयस्व ममाग्रतः।
न वक्तव्यमभक्ताय परभक्तायपापिने[१०]।।

---

१. शिव रूपिणे। ख.पु.पा.।
२. केवलं। ख.पु.पा.।
३. विष्णुनाविभोः। ख.पु.पा.।
४. शवः। ख.पु.पा.।
५. पद। ख.पु.पा.।
६. कांक्षिणः। ख.पु.पा.।
७. द्वन्द्व। ख.पु.पा.।
८. भाषितं। ख.पु.पा.।
९. इनापरं। ख.पु.पा.।
१०. प्रदूष्टायप्रलापिने। ख.पु.पा.।

श्रीभगवानुवाच।

महाचीनक्रमं देवि विविधं संमतं[1] भुवि।

तदुक्तं वीरतन्त्रे

स्नानादि मानसं शौचं मानसं प्रवरोजपः ।।

तथोक्तं योगिनी-हृदये-

बिकल्परूप संजल्प विमुखोन्तर्मुखः सुधीः।
दहमन्त्रे रसं सर्पि नादालोकन तत्परः ।।
पूजनं मानसं दिव्यं मानसं कल्पनादिकम्।
सर्व्व एव शुभः कालोनाशुभो विद्यते क्वचित् ।।
न विशेषा दिवारात्रो न सन्ध्यायां महानिशि।
वस्त्रासनसनृस्थान[2] गेहदेह स्पर्शादिवारिच ।।
शुद्धिं न चाचरे देत निर्विकल्प मनाश्चरेत्[3]।
नात्र शुद्धिरपेक्षास्ति[4] न चामेध्यादि दूषणम् ।।
य एवं चिन्तयेन्मन्त्री सर्व्वकाम समृद्धिदम्।
गद्यपद्यमयीवाणी सभायां तस्य जायते ।।
तस्य दर्शनमात्रेण वादिनो निष्प्रभामताः।
राजानोपिहिदासत्वं भजन्ते के पठेजनाः ।।
सर्व्वथा पूजयेद्देव्यामस्नातः कृतभोजनः।
महानिश्यशुचौ देशे वलिं मन्त्रेण दापयेत् ।।
स्त्रीद्वेषो नैवकर्त्तव्यो विशेषात् पूजनं स्त्रियाः।
जपस्थाने महाशङ्खं निवेश्योक्तं[5] जपं चरेत् ।।
स्त्रियं गच्छन् स्पृशन् पश्यन् यत्र कुत्राप्य चूडके।
भक्षं स्ताम्बूल मान्यांश्च भक्षद्रव्यान्यथारुचि।।

---

१. भुविसंमते। ख.पु.पा.।
२. वस्त्रादि मानसं क्षौचं देहस्पर्शादिवारिणः। ख.पु.पा.।
३. मनश्चरेत्। ख.पु.पा.।
४. क्षास्ति। ख.पु.पा.।
५. निवेश्योद्दि। ख.पु.पा.।

मांस मत्स्यदधिक्षौद्र भक्षद्रव्यान् यथारुचीन ।
भक्ता न[१] शेषा भक्षाणि भुक्त्वा भक्षञ्चरेज्जपम् ।।
दिक्कालनियमोनात्र स्थित्यादि नियमो न च ।
न जपे कालनियमो नार्च्यादिषु वलिष्वपि ।।
स्वेच्छानियम उक्तोऽत्रमहामन्त्रस्य साधने।
नाधर्म्मो जायते सुभ्रु किञ्चधर्म्मोमहान भवेत् ।।
स्वेच्छाचारोऽत्र गदितः प्रभवेत्तुष्ट मानसः[२]।
कृतार्थं मन्यमानस्त संतुष्ये न्निजमानसः ।।
रहस्यान्तरं गान्धर्वसर्गाख्ये- इति महाचीनक्रमः ।
पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः।
तदा वादी स्व[३] सिद्धान्त हतः क्षितितलं विशेत् ।।
नित्यश इति षोडशदिन पर्य्यन्तं। पृथिवीमिति गुरोर्ज्ञेयम् ।
पर्व्वते हस्तमारोप्य निर्भयोजपमानसः।
कवितां लभते सोपि अमृतत्वञ्चगच्छति ।।

अन्यच्च नीलतन्त्रे-

पद्मं दृष्ट्वा तथा विल्वं खञ्जनं शिखिनं तथा ।
चामरं रविविम्बञ्च तिलपुष्पं सरोवरम् ।।
त्रिसूर्यं वीक्ष्यजपत्वातु शतशः शुद्ध भावतः।
मुखप्रसादं सुमुखं सुलोचन सुहास्यकम्।।
सुकेशं सुगतिं गन्धं सदन्तं सुखमेव च।
लभते यथा संख्यं श्रृणु पार्वति सादरम्।।
महाचीनक्रमेदेवीं ध्यात्वा तत्र प्रपूज्य च।
तद्द्रुमोद्भव पुष्पेण[४] पूजयेद् भक्तिभावतः।
स भवेत् कुलदेवश्च कुलद्रुमगतः शुचिः ।।

---

१. भक्षान्यशेष भक्षापि। ख.पु.पा.।
२. प्रचरेद्धवष्ट। ख.पु.पा.।
३. सु.। ख.पु.पा.।
४. पूर्व्वेण। ख.पु.पा.।

ब्रह्मतरोर्महापद्मे देवीं ध्यात्वा यथा विधिः ।
तत् सुधारस सारेण तर्पयेन्मातृकासने।।
स भवेत् साधकश्रेष्ठो मातृणाञ्च भवेत्प्रियः ।
महाचीनद्रुमलतावेष्टितः साधकोत्तमः ।।
रात्रौ यदि जपेन्मन्त्री[१] स च कल्पलता भवेत् ।
तिथिक्रमेण संख्याभिर्लताभिर्वेष्टितो यदि।।
तदा मासेन सिद्धिः स्यात् सहस्रजपमानतः ।
अष्टम्याञ्च चतुर्दश्यां द्विगुणं यदि दृश्यते ।।
तदैव महती सिद्धिर्देवानामपि दुर्लभा ।
महाचीनद्रुमेबीजं लिखित्वा कुङ्कुमेन च ।।
तत् पार्श्वे साध्यमालिख्य भावये[२]दृष्टिवृष्टिभिः ।
तत्र गच्छति कामार्त्ता यत्र तिष्ठति[३] साधक ।।
महाचीनद्रुमरसेनाक्तं पिण्डं विधाय च ।
यन्नाम्नादीयते देवि सोचिरान्मृत्युमर्हति[४] ।।
महाचीनद्रुममूल मज्जाभिर्बिल्व पत्रकैः ।
सहस्त्रं देवीमभ्यर्च्य श्मशाने साधकोत्तमः।।
तदा राज्यमवाप्नोति यदि स्यान्न पलायते ।
तस्यापि षोडशांशेन कलां नार्हन्ति तेशवाः।।
शवासनाधिक फलं लतागेहप्रवेशनम् ।
एवं भूतः[५] सदादेवी साधको भुविदुर्लभः ।।
यया कयापि दृष्टया यो नरो भुवि दृश्यते ।
सोपि दासो भवेत्तस्य येन वायश्च दृश्यते।।
एतत् प्रकाशनाद्देवि मृत्युर्भवति नान्यथा ।
एतत् साधक निन्दां वा एतन्मन्त्रस्य वा पुनः ।।

१. मंत्रा। ख.पु.पा.।
२. ताडये। ख.पु.पा.।
३. यत्र येनोपक्तम्यते। ख.पु.पा.।
४. माप्नुयात् । ख.पु.पा.।
५. भूतं। ख.पु.पा.।

महाभूतगणैः सार्द्धं तस्य सर्व्वं हराम्यहम्।
योगिनीचक्र सहितैस्त्वञ्च[1] तद्वत्कारिणी ।।

।।अथ सारस्वत प्रयोगाः।।

तदुक्तं फेत्कारिये

जिह्वायां नस्यतां[2] देवमूकोपि सुकविर्भवेत्।

अस्यायमर्थः-जिह्वा बुह्यामुखे हस्तमारोप्यजपेदिति कश्चित्। वस्तुतस्तु तेजोरूपां विद्यां जिह्वायां भावयेत् इति रहस्यार्थः तदुक्तं वीरतन्त्रे-

जिह्वायां भावमेद्यस्तु तारिणीं दीपरूपिणीम्।
वृहस्पतिसमातस्य कविता शुक्र[3] निर्जिता।।

नीलतन्त्रे-

ब्राह्मेमुहूर्त्ते उत्थाय कृतावश्यः सुसंयतः।
जिह्वायां भावयन विद्यां[4] तेजोरूपां जपेत् सुधीः।
अमृतस्य त्रिनीतस्य[5]वाणी सर्व्वविधाभवेत् ।।

एकवीराकल्पेपि-

प्रातर्विद्यां विभाव्यैवं जिह्वायां[6] दीपरूपिणीम्।
मातृका सहितां विद्यां त्रिधावृत्याजलं पिवेत्।।
जलपानविधानेन मूकोपि सुकविर्भवेत्।
अजस्रभावना[7]भ्यासात् साधकः सुकृतीद्धतः[8]।
कविर्वाग्मी महायोगी मुक्तिभागी न संशयः।।

तत्रायं क्रमः-

दक्षहस्ते जलगण्डूषमादाय जलाभेदेन मातृकां जपेत्। सविन्दून स्वरान विन्दुरहितानहन उच्चरेत्। वायुमष्टभ्य परतलं प्राप्य तत्र स्थितिरूपेणैकवारं जपेत्। ततो रेचकयोगेन तथा जपत्वा हस्त स्थित गण्डूषमानयेत्। तदनु तज्जलं

---

१. स्वयं तद्वधका। ख.पु.पा.।
२. न्यसना। ख.पु.पा.।
३. शुसु। ख.पु.पा.।
४. भावयेद्यस्तु तारिणीं दीप रूपिणीम्।ख.पु.पा.
५. बृहस्यनिन्दितस्य। ख.पु.पा.।
६. जिह्वयों। ख.पु.पा.।
७. साधना। ख.पु.पा.।
८. स्वहृदि सुधी। ख.पु.पा.।

पिवेदिति रहस्यार्थः। अब्दा चतुर्व्विधं तत्र[१] पान्तेत्यमुपजायते। चतुर्विधं पाण्डित्वमिति कवित्वपाण्डित्व वादित्व वाग्मित्व रूपमिति श्रीसुभगानन्दपादाः।

अथ रहस्यान्तरं तदुक्तं वीरतन्त्रे–

कुलयुवतिसुयोनौ मन्त्रवर्णान् विलिख्य।
निखिल निगम-मन्त्रान[२]स्वदोषादिदुष्टान् ।।
विदित गुरुकुलान्तर्व्वाह्यवर्त्मा विधिज्ञो
मनुपुटितपुटीयान् साधयेच्छान्तचित्तः[३] ।
कुलपथमनुसन्धायोषितानां स्व[४]भूमौ ।।
तवजनिजनो यस्तर्पयेत्तीर्थतोयैः ।।
रुधिर तव[५] सुपुष्पैर्गन्धमाल्यानुलेपै
रुचित सुरभिवेश स्तद्धिया ध्यायते सः ।।
पारिचरित समस्तैर्न्यासि पूर्व्वैः प्रसिद्धे–
र्गुरुपरि परजाले योगि[६]चक्रैः स पूज्यः।
सुविमल कुलजातो द्रीघृणा[७] वर्जितोयः।।
स्वयमपि रचिताङ्गः क्षोभहृद्योगिनीनाम् ।
पशुरिपु कुलचक्रं संस्पृशनमध्यशाखम्।।
सुरतरुसुरनाथः शापदुष्टो[८] मनुष्यः।
कुलपथिकुलनाथस्तद्वयं योजयित्वा ।।
मनुपुटितविमृग्यं योजयेत्तद्वहिर्यः[९] ।
जननि तव कलानां कोविदां कामरूपः ।।
कुमतिरहितचित्तः संलिखेत्तां त्रिधारे ।
विगत भय विषाद ध्वान्तजालः शुधांशु–
स्तवचरणजलान्तान्निश्वरन्मूर्द्धिनि[१०] देशे ।।

⊗ एतत् प्रयोगं वत्सरावधिकाम्यं स्वतन्त्रतन्त्रे। इति ख.पु.पा.।

१. तस्य पाण्डित्य। ख.पु.पा.।
२. वर्णान्। ख.पु.पा.।
३. चेताः। ख.पु.पा.।
४. सु। ख.पु.पा.।
५. तट। ख.पु.पा.।
६. सतव परिजनणातनैर्योगिनिभिः प्रपूज्यैः।
७. स्त्री ह्वी घृणावार्ज्जतोयः। ख.पु.पा.।
८. पातु। ख.पु.पा.।
९. तत्त्वदीर्यः। ख.पु.पा.।
१०. निःशरद्धूक्तिजात्कैः। खं.पु.पा.।

अथ मन्त्रसिद्धयनुकलमहारहस्यम्

विशुद्धेश्वरे महातन्त्रे श्रीदेव्युवाच-

भगवन् प्रसीद देवेश सर्व्वप्राणि हिते रत।
येनावश्यं भवेत् सिद्धिरूपायं वदशङ्करः ॥

ईश्वर उवाच-

शृणु देवि परं तत्त्वं[१] सर्व्वज्ञानोत्तमोत्तमम्।
येन विज्ञानमात्रेण क्षिप्रं विद्या प्रसीदति ॥
मूलस्कन्धे तु या शक्तिर्भुजंगाकाररूपिणी।
तद्भ्रमावर्त्तवातोयं प्राणइत्युच्यते बुधैः ॥
झिन्दी[२]राव्यक्त मधुरं कूजन्ती नभसोत्थित।
गच्छन्ती ब्रह्मरन्ध्रेण प्रविशन्ती[३] स्वकेतने ॥
यातायात[४]क्रमेणैव तत्र कुर्य्यान्मनोलयम्।
तेन मन्त्र शिखाजात्[५] सर्व्वसिद्धिप्रदायिका[६] ॥
तमः पूर्णे गृहे यद्वत्र क्वचित् प्रतिभासते।
शिखा हीनास्तथा मन्त्रा[७] न सिद्धयन्ति कदाचन ॥
शिखोदेशः सर्व्वत्रगोपितः परमेश्वरि।
विनानेनैव सिद्धिः स्याद्वर्णकोटिशतैरपि।
तस्मात्वयापि गिरिजे गोपनीयं प्रयत्नतः ॥

अथ रहस्यान्तरम् ॥नीलतन्त्रे॥

सुप्ता निद्रायिता मत्ता विद्रावणरताः पराः।
समस्तदोषजालेन ग्रथिता कुलसुन्दरी ॥
निशिचारं दिवाचारं[८] सन्ध्याचारञ्च पल्लवम्।
दर्भणं बीज नियोगं[९] भावसंयोगमेवच[१०] ॥

---

१. ज्ञानं। ख.पु.पा.।
२. झिं झि काव्यक्तमधुरा कूजंतो स्ततोत्थिता।
३. शान्तो। ख.पु.पा.।
४. यातायात। ख.पु.पा.।
५. जातो। ख.पु.पा.।
६. प्रदीपिका। ख.पु.पा.।
७. मंत्री। ख.पु.पा.।
८. चारः। ख.पु.पा.।
९. संयोगो। ख.पु.पा.।
१०. एवच। ख.पु.पा.।

ज्ञात्वा[1] प्रबोधयेद्वीर गुरुवक्त्रैव कारणम् ।

निशिचारमित्यादि निशिचारं वामनासायां वायोरुदयः। तथैव दक्षिण नाशयामुदयो दिवाचारः सन्ध्याचारमुभय नाडीप्रवाहः[2]। तदुक्तं विष्णुसंहितायाम्–

स्वापकाले तु मन्त्राणां जपोऽवर्थं[3] फलप्रदः ।।

तत्रैवोक्तं।

स्वापकालो वामवायुः प्रबोधो दक्षिणावहः ।
आग्नेयस्य मनोः सौम्य मन्त्रस्यैतद्विपर्य्ययः ।।
प्रबोधकालं जानीयादुभयोरुभयोरपि ।
कर्म्मणोवह्नितावान्त्यरित्[4] प्रायाः समीरिताः।।
आग्नेया अपि सौम्याः स्युर्भूमिष्ठेन्तु[5] मृताक्षराः ।
त्वदात्मिकाः स्मृताविद्या मन्त्रोदेविमदा[6]त्मकाः।
एवं मन्त्रः[7] माग्नेयाः विद्याः सौम्यास्तथैव च।।

अथ रहस्यान्तरम्

शान्तिकादौ यदि वायो र्विपरीतता तदा मंन्त्रे तदा मन्त्रे ह्रस्वदीर्घवर्णयोगः कर्त्तव्यः।

वामबाहो यदा वायुर्दीर्घाणामुभयस्थता ।
दक्षिणस्यां यदावायुस्तदाह्रस्वानियोजिताः ।
उभयस्यो यदावायुस्तदास्य सभयात्मका ।।

इति विज्ञानभट्टारक चरणाः[8]।।

एवं वामभागे जीवे उदयस्थ संयोगात् सर्व्वाविद्याः फलः प्रदाः। एवं दक्षिण भागे सर्व्वेमन्त्राः। रहस्यार्थस्तु दीर्घयोग विद्याजपः सतु वामगः। एवं ह्रस्व योगाद्दक्षिणगः। एवं यदा विद्यादौ दीर्घगस्तदावामवाहो वायुरिति जानीयात्। ह्रस्वयोगाद्दक्षिणावहः। यदा मन्त्रादौ ह्रस्वयोगस्तदा दक्षिणावहः। यदा विद्यामन्त्रयो

---

१. ज्ञात्वा प्रबोधयेद्वीरोगुरुतत्रैव कारणम्।
२. प्रभाहः। ख.पु.पा.।
३. न स। ख.पु.पा.।
४. तारान्तः विप्रायाश्चसमीहिता। ख.पु.पा.।
५. त्व। ख.पु.पा.।
६. सदात्मिका। ख.पु.पा.।
७. विद्या। ख.पु.पा.।
८. वचना।

र्ह्स्वयोगे। दीर्घ योगश्च तदोभयस्थो वायुरिति। पल्लवं यथा तदुक्तं स्वतन्त्र तन्त्रे।

आदौ योगो भवेदन्ते पल्लवं संपुटं द्वयोः।
एकान्तरितग्रथनं विदर्भोभ्यन्तरीक्षितः[१]।।

आदौ योग इत्यादिना श्लोकेन मन्त्रेषु साध्यसाधक कर्म्मणो योजन प्रणवाद्युप[२] दिशति।

तदुक्तं विमलातन्त्रे-

प्रणवोमातृका देवी हृल्लेखेत्यमृतत्रयम्।
अमृतत्रय संयोगाद्दुष्ट मन्त्रोपि[३] सिद्धयति ।।

भाव संयोग इति भाव निर्णय प्रकारे सबोद्धव्य इति।।

।। अथ रहस्यान्तरम् ।।

मन्त्र चूडामणौ

नियमः पुरुषेज्ञेयो न योषित् सुकथञ्चन[४]।
यद्वातद्वायेन[५] केन सर्व्वदा सर्व्वतोपिवा।।
योषितां ध्यान योगेन सिद्धयः स्युर्न संशयः।
यथा पक्षान्तमात्रेण शूल[६] विद्ध शिलोच्चयः।।
स्वयमेव वह्निर्याति यथा वास्मैरतेजसा।
सूर्य्यकान्त स्फुटं रौति यथावाचेन्दुरश्मयः।।
चन्द्रकान्त तारयति यथा वर्षासुरा विदैः।
जल सेचनाभितप्ताभू रसपूर्णा प्रचक्षते।।
क्षुधार्त्तक्षीरपानेन यथा तृप्तोभिजायते।
कुलपुष्पप्रदानेन यथाशक्तिः प्रतुष्यति[७]।।
गुरुसेवैकमात्रेण मन्त्रसिद्धिर्यथाभवेत्।
महापद्मवन ध्याने[८] यथासिद्धीश्वरो भवेत्।।

---

१. कृतः। ख.पु.पा.।
२. प्रकारस्वरूपं दिशति। ख.पु.पा.।
३. मंत्रेपि। ख.पु.पा.।
४. कथञ्चन। ख.पु.पा.।
५. महातत्वा। ख.पु.पा.।
६. गूढ़ा। ख.पु.पा.।
७. प्रीतिंस्तुजायते। ख.पु.पा.।
८. ध्याना। ख.पु.पा.।

त्रिपुराध्यानमात्रेण भक्तिमुक्तिर्यथाभवेत् ।
महादुर्गाप्रसादेन यथासिद्धिश्वरोभवेत् ।।
गङ्गास्मरणमात्रेण निष्पापो जायते यथा ।
यथाकर्षणमात्रेण शिव एव प्रजायते ।।
योषिच्चिन्तनमात्रेण तथेयं वरदायिनी[१] ।
तस्मात् सर्व्वप्रयत्नेन दीक्षयेन्निजकौलिकीम् इति ।।

तथा कूलचूडामणौ।

अदीक्षितकुलासङ्गात् सिद्धिहानि पदे पदे ।

एतदुक्तं भवति–

मन्त्र विद्ययोः साध्य साधन कर्म्मणी योगेन योग संज्ञा मन्त्रविद्ययोः पूर्वोक्तयोजनात् पल्लवसंज्ञा मन्त्र विद्ययोः प्रोक्तानां चैकां क्षरतोऽन्योन्य योजना ग्रथनमिति संज्ञा। मन्त्र विद्ययोः प्रागुक्तानां अन्योन्याक्षरद्वय योजना विदर्भसंज्ञा।

स च त्रिविधः मन्त्राक्षर द्वयान्तरेसाध्याक्षरमेकं योजयेदित्येकः प्रकारः साध्याक्षर द्वयान्तरे मन्त्रादीनामेकाक्षरं योजयेदित्यपरः। मन्त्रादीनामक्षरद्वयान्तरे साध्यादीनामक्षरद्वयं योजयेदित्यपरः। एवं त्रिविधमिति बीज संयोगोयथा।

।।इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ रहस्यनिर्णयः षष्ठपटलः।।



१. तथैवसिद्धि दायिनि। ख.पु.पा.।

अथ सप्तमः पटलः

अथ कुमारीकल्पः

पूजाज्ञानार्णवे–

होमादिकन्तु सकलं कुमारीपूजनं विना।
परिपूर्ण फलं नैरसफलं पूजनाद् भवेत्।
तस्मात् सकलसिद्धयर्थं कुमारीं तां प्रपूजयेत् ।।

तदुक्तं पञ्चक्रमे–

आनयेत् कन्यकां योग्यां[१] कुमारीञ्च सुवासिनीम्।
सुवासिनीं मदप्रौढ़ां संशयं त्यज पार्व्वति ।।

तदुक्तं रुद्रयामले

कथयामि न सन्देहः कुमार्य्याः पूजनं शुभम् ।
यस्याः[२] पूजनमात्रेण त्रैलोक्यं पूजितं[३] भवेत् ।।
सुकुमारी स्वयं नाथ त्रिधामूर्त्तिर्व्यवस्थिता।
पराचैवापराचैव तृतीयाच परापरा ।।
यत्रकाले न किञ्चित् स्याद्देवासुर मनोरगाः।
त्रैलोक्यं[४] नत्वया हञ्च तदा जाता कुमारिका ।।
आद्या[५] पुष्टिकरीयातु प्रत्यक्षा सातुतपिधा।
उमाकलातु साजाता[६] सृष्टिरूपा भवान्तरे ।।

---

१. गोप्यां। कुमारीं चारु हासिनीम्। ख.पु.पा.
२. तस्यास्मरण। ख.पु.पा.।
३. पूजनं ख.पु.पा.।
४. त्रैलोक्ये ख.पु.पा.।
५. आद्यंसृष्टि करीधातु प्रत्यक्षातु तथा त्रिधा।
६. साधाता सृष्टिकला भवार्जवे। ख.पु.पा.।

एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती।
त्रिवर्षातु त्रिधामूर्त्तिश्चतुर्वर्षा तु कालिका।।
सुभगा पञ्चवर्षातु षडवर्षातु उमा भवेत्।
सप्तभिर्मानिनी[1] साक्षादष्ट वर्षातु दन्तिका।।
नवभिः कालसंकर्षा दशभिश्चापराजिता।
एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी।।
त्रयोदशे महालक्ष्मीर्द्विसप्तापीठनायिका।
क्षेत्रज्ञा पञ्चदशभिः षोडशेचर्च्चिकामता[2]।।
एवं क्रमेण पूज्येत यावत् पुष्पं[3] न विद्यते।
प्रतिपदादि पूर्णान्तं वृद्धिभेदेन पूजयेत्।।
महापर्व्वसु सर्व्वेषु विशेषाच्च पवित्रके।
महानवम्यां देवेशिकुमारीश्च प्रपूजयेत्।।
पिङ्गलां पूजयेद्यस्तु षोडशेचैवभक्तिमान्।
पूजयित्वा तु भक्तया च सर्व्वसम्पत्तिमान् भवेत्।।
पूजयेत् कुलविद्यानामेकां मानवभैरवीम्।
एवं प्रणवयोगेन चैतन्य तनुमर्च्चयेत्।।

ऐं द्रीं श्रीं[4] द्रां द्रीं द्रीं श्रीं एते प्रणवाः। हसौं इदं भैरवी[5] बीजं उभौ बीजाक्षरौ।

एकं द्वाभ्यां त्रिभिश्चैव सप्ताष्टनवधा पुनः।
नित्यक्रमेण देवेशि पूजयेद्विधिपूर्व्वकम्।।
घ्नन्ति विघ्नान् पूजितास्तास्तथा शत्रुं महोत्कटम्।
व्याधयं: सर्व्वारिष्टानि दुर्निमित्तान्यसंशयम्।।
ग्रहायक्षाः क्षयं यान्ति भूतवेताल पन्नगाः।
असुरागुह्यकाः प्रेता योगिनी गुह्यडाकिनी।।
महाभया[6]निदुर्भिक्ष उत्पाताश्च कुलेश्वरः।

---

१. मालिनी। ख.पु.पा.
२. चाम्बिका तथा। ख.पु.पा.।
३. पूजा। ख.पु.पा.।
४. ह्रीं श्रीं द्रील्लं एते पञ्च प्रणवा। ख.पु.पा.
५. अन्ते चैन्य वीजं।/ख.पु.पा.।
६. भायादि। ख.पु.पा.।

दुःस्वप्नमपमृत्युश्च अन्ये ये ये समुद्भवाः ।।
कुमारीपूजनादेव न तस्य[१] प्रभवन्तु च ।
अणिमादीनिसिद्ध्यानि पाताल गुटिकाञ्चनम् ।।
चतुष्कं[२] दिव्यवेतालो भवेत् कुमारिकार्चनात् ।
ऐँ कारेण[३] जलं देयं द्रीँ कारे पाद शोचनम् ।।
श्रीँ कारेणार्घ्यं दद्यान्तुं तुर्य्यबीजेन चन्दनम् ।
शक्तिबीजेन पुष्पाणि षष्ठे धूपञ्च दापयेत् ।।
ऐँ द्रीँ श्रीँ द्रूँ कुमारिके हृदयाय नमः ।
हैँ वैँ द्रौँ श्रीँ द्रीँ ऐँ स्वाहा शिर से स्वाहा ।।

ॐ श्रीँ सैँ शिखायै वषट्। ऐँ कुलवागीश्वरवागीश्वरि कवचायहुँ। द्रीँ श्रीँ अस्त्राय फट्। ऐँ सिद्धजयाय पूर्व्ववक्त्राय नमः ऐँ जयाय उत्तरवक्त्राय नमः ऐँ द्रीँ श्रीँ कुब्जिके पश्चिमवक्त्राय नमः ऐँ कालिका दक्षिणवक्त्रायनमः। वाग्भवेन पुनः क्षोभं मायाबीजे[४] गुणाष्टकम्।

श्रियोबीजे श्रियोलाभो द्रीँ बीजे चारि[५] संक्षयः ।।
भैरवेनतु बीजेन स्वगत्वममरादिभिः ।
कुमारिकाप्रियोहंदेवि[६] सदात्वञ्च[७]कुमारिका ।।
अष्टोत्तरशतं वापि एकां कन्यां प्रपूजयेत् ।
पूजिता प्रतिपूज्यन्ते निर्दहन्त्यपमानिताः ।।
कुमारी योगिनी साक्षात् कुमारी सर्व्वदेवता ।

---

१. सर्व्वं तस्य। ख.पु.पा.।
२. प्रत्यक्षं। ख.पु.पा.।
३. ऐं करिणवादसेचनं द्रीं कारेणार्घतूर्य्य वीजे चंदनं शक्ति बीजे पुष्पानि षष्ठे धूपं चदर्शयेत्। ऐं हीं श्रीं क्रीं सौः क्षांकुलकुमारिके हृदयाय नमः है वै द्रै श्रीं द्रीं एं स्वाहा शिरसि उँ द्रींशिं शिखायै वषट् कुलवागीश्वरं कुलवागीश्वरी कवचाय हूँ द्रः अस्त्राय फट्। ॐ सिद्ध जयाय पूर्व्ववक्त्राय नमः। ए ऐंजयायो जयायोत्तर वक्त्राय नमः ऐं ह्रीं श्री कुब्जिके पश्चिम वक्त्राय नमः ऐं कालिके दक्षिण वक्त्राय नमः। ख.पु.पा.।
४. बीजं। ख.पु.पा.।
५. चारिव। ख.पु.पा.।
६. नाथ। ख.पु.पा.।
७. हिं। ख.पु.पा.।

भूर्भुवोमूर्त्तिका देवा कुमारी यत्नपूजिता ।।
ख[1] सुरादुर्द्धरानागा एते[2] दुष्टग्रहा अपि ।
भूतवेतालगन्धर्वा डाकिनी-यक्ष-राक्षसाः ।।
हृदयं[3] देवताः सर्व्वा भूर्भुवश्चैवभैरवाः ।
पृथिव्यादीनि सर्व्वाणि ब्रह्माण्डं सचराचरम् ।।
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
तेत्तुष्टाः सर्व्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् ।।
कालाग्नि शिवपर्य्यन्तं तथा गौर्य्यादि संस्थितिः ।
सप्तद्वासमुद्राश्च भुवनाने चतुर्द्दश ।।
विधियुक्तं कुमारीभिर्भोजयेच्चैव भैरवीम् ।
पाद्यमर्घ्यं तथा दीपं[4] कुङ्कुमं चन्दनं शुभम् ।।
भक्तिभावेन सम्पूज्य सर्व्वं[5] तस्यै निवेदयेत् ।
प्रदक्षिण त्रयं कुर्य्यादादिमध्ये तथात्ततः[6] ।।
पश्चाच्च दक्षिणादेया रजतस्वर्णमौक्तिकैः ।
विवाहयेत् स्वयं कन्यां ब्रह्महत्या विनश्यति ।।
गोहत्या च स्त्रीहत्या च सर्व्वपापं विनश्यति ।
माता च पितरश्चैव भ्रातरश्चैव सर्व्वतः ।।
येत्तायच[7] पुनः सर्वं कन्यादानं प्रकल्पयेत् ।
भुक्ति-मुक्ति फलं तस्य सौभाग्यं सर्व्वसम्पदः ।।
रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान हरः ।
षष्ठिकोटि सहस्राणि अश्वमेधफलं लभेत् ।।
एतत् फलं लभेत् सद्यःच कन्यां यस्तु विवाहयेत् ।

१. असुरा। ख.पु.पा.।
२. ये ये। ख.पु.पा.।
३. ये चान्ये। ख.पु.पा.।
४. धूपं। ख.पु.पा.।
५. कुमारिभ्यो। निवेदयेत्। ख.पु.पा.।
६. शुभं भवेत्। ख.पु.पा.।
७. येव येच पुनः काले। ख.पु.पा.।

वालुकासागरे यावत् तावदब्दं नरेश्वरः ।।
एकैकं न समुद्धृत्य सत्यकल्पैर्गतोपि च ।
तावत् भुञ्जन्तिते भोगान् यावद्भूमि दिवोकसः।।
कन्यादानं महादानं सर्व्वदानेषु चोत्तमम् ।
दौर्भाग्यं नश्यति क्षिप्रं सौभाग्यं च प्रवर्धते[१] ।।
राज़द्वारे लभेत् पूजां राजमान्यः[२] स्वयं नरः ।
सर्वैभाञ्च कुमारीञ्च पूजयेच्च प्रयत्नतः ।।
महद्भये समुत्पन्ने कन्यकाञ्चैव पूजयेत् ।
तत्क्षणात् लभते मोक्षं सत्यं सत्यं तु भैरवः ।।

।। इति श्रीशङ्कराचार्यविरचितायां ताराहस्यवृत्तौ कुमारी कल्पः सप्तमः पटलः[३] ।।



१. प्रवर्तते। ख.पु.पा.।
२. राजलक्ष्मी स्वयंवरः। ख.पु.पा.।
३. इति कुमारिका पुजन निर्णयः सप्तमः पटल ख.पु.पा.।

अथ अष्टम पटलः

अथेदानीं रहस्यातिरहस्यं प्रवचनं[1] लिख्यते

गान्धर्व्वतन्त्रे।। देव्युवाच।

महाचीनक्रमं[2] देवसूचितं न प्रकाशितम्।
कथयव महादेवि सर्व्वसिद्धि प्रदं महत्।।

।।भैरव उवाच।।

सर्व्वसिद्धिप्रदं साक्षात् सर्व्वदेवनमस्कृतम्।
सर्व्वपापहरं देवि सर्व्वरोगप्रणाशनम् ।।
ब्रह्मविष्णुमहेशानां दिकपालनाञ्च भामिनि ।
भैरवाणाञ्च सर्व्वेषां गन्धर्व्वाणाञ्च योगिनाम्।।
सर्व्वसिद्धि[3] प्रदं देवि सर्व्वेषामालयं[4] महत्।
नान्यत् सिद्धिप्रदं देवि वीरसाधनवर्जितम् ।।
महावलो महाबुद्धिर्महासाहसिकः शुचिः।
महास्वच्छो दया[5]वाँश्च सर्व्वप्राणिहितेरतः।।
तेषां कृते महेशानि कथितं[6] वीरसाधनम्।
अष्टम्याञ्च चतुर्द्दश्यां पक्षयोरुभयोरपि।।
भौमवारे तमिश्रायां यामे याते च भामिनि।
ददर्द्धाभ्यन्तरे सम्यक् पूजोपकरणं बलिम् ।।
सामिषान्नं गुडं छाग सुरापिष्टक पायसम्।

---

१. पुरश्चरणं। ख.पु.पा.।
२. महानील। ख.पु.पा.।
३. सुख। ख.पु.पा.।
४. मानसं। ख.पु.पा.।
५. महात्मा च दयालश्च सर्व्वभूत हितेरतः। ख.पु.पा.।
६. रक्षितं। ख.पू.पा.।

नाना फलञ्च नैवेद्यं स्व स्व कल्पोक्तानुसारेण[1] पूजां कुर्य्यात्-विचछणः।
समानगुणसम्पन्नैः साधको बीतभीः स्वयम् ।।

चितारक्षणं[2] यथा।

असंस्कृता[3] चिता ग्राह्या न तु संस्कार संस्कृता।
चाण्डालादिषु संप्राप्ता केवलं सिद्धि[4] सिद्धिदा।।

वीरतन्त्रे

शवं वापि चितां वापि नीत्वा गत्वा यथासुखम्।
स्नात्वा रक्षां सुरध्वाच[5] देवताध्यान तत्परः।।
भीतश्चेत् साधकस्तत्र चतुर्द्दिशि च साधकाः।
माभैर्माभैरीति वाक्यैर्व्वारयेषुः पुनः पुनः ।।
न चेत् स्वयं कैवलोसौ भैरवः परिकीर्त्तितः।
वस्त्रालङ्कारभूषाद्यैर्भूषितः पूर्व्वसंमुखः ।।
अस्त्रान्त[6] मूलमन्त्रेण प्रोक्षणं यागभूमिषु।
गुरुपादरजोध्यात्वा गणेशं वटुकां[7]स्तथा ।।
योगिनीं मातृकां श्चैव कामपाद पुरः सरम् ।
ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः।।
पिशाचाः सिद्ध यक्षाश्च गन्धर्व्वाप्सरसां[8] गणाः।
योगिन्यो मातरो भूताः सर्व्वाश्च खेचरस्त्रियः।।
सिद्धिदास्ते भवन्त्वत्र यथा च मम रक्षकाः।
प्रणम्य मन्त्रेणानेन पुष्पाञ्जलित्रयं क्षिपेत् ।।
श्मशानाधिपतिं पश्चाद्भैरवं कालभैरवम् ।
महाकालं यजेद्यत्नात् पूर्व्वादि दिक्चतुष्टये ।।
पाद्यादिभिश्च मन्त्रज्ञा बलिं पश्चान्निवेदयेत् ।

---

१. साधितं चितास्थानं समानीय सहृद्भिः। शस्त्र पाणिभिः। ख.पु.पा.।
२. लक्षणम्। ख.पु.पा.।
३. संस्कृता। ख.पु.पा.।
४. शीघ्र। ख.पु.पा.।
५. सुवध्वावै। ख.पु.पा.।
६. अस्त्रान्तो। ख.पु.पा.।
७. वटुकं। ख.पु.पा.।
८. शिरसां। ख.पु.पा.।

द्रीँ शब्द बीजं तत् पश्चात् श्मशानाधिप तत्परम्।।
हुँ मन्त्रेणामिषान्नं बलिं गृह्ण ततः परम्।
गृह्णापय पद द्वन्द्वं विघ्ननिवारणं ततः।।
कुरुसिद्धि मेततश्चान्ते प्रयच्छ स्वाहयायुतम्।
प्रणवाद्येन मन्त्रेणा प्रथमो वत्विरीरितः।।
मायान्ते भैरवात् पश्चाद्भयानक ततः परम्।
पूर्व्ववत् मनुमुद्धृत्य दक्षिणे बलिमाहरेत्।।
हुँ मन्त्रे च महाकालात् भयानक ततः परम्।
पूर्व्ववत् मनुमुद्धृत्य दक्षिणे वलिमाहरेत्।।
हुँ मन्त्रे च महाकालात् पश्चात् पूर्व्व वदुद्धरेत्।
पश्चिमे कालदेवाय प्रणवाद्येन दापयेत्[१]।।
शब्दान्ते काल शब्दान्ते भैरवेति ततः परम्।
श्मशानाधिप इत्येकं पूर्व्ववच्चोत्तरे हरेत्।।
चितामध्ये ततो दद्याद्बलित्रयमनुत्तमम्।
कालरात्रि महाकालि कालिके घोरनिस्वने।।
गृहाणेमं वलिं मातर्देहिसिद्धिमनुत्तमाम्।
कालिकायै बलिं दत्वा भूतनाथाय दापयेत्।।
शब्दान्ते भूतनाथाय श्मशानाधिप इत्यपि।
प्रणवाद्येन मनुना दापयेदलिमुत्तमम्।।
हुं शब्दान्ते सर्व्वगणनाथान्ते चाधिपाय च।
श्मशानमस्तके दत्वा पूर्व्ववच्च समुद्धरेत्[२]।।
ताराद्येन बलिं दत्वा पञ्चगव्येन सुन्दरि।
अद्भिः[३] संप्रोक्षणं कृत्वा पीतवस्त्रे लिखेत्ततः।।
भूर्देवा[४] वटपत्रेवा ततः[५] पीठमनुं न्यसेत्।

१. कलप्येत्। ख.पु.पा.।
२. बक्तिं हरेत्। ख.पु.पा.।
३. आस्थि। ख.पु.पा.।
४. भूर्जि वा। ख.पु.पा.।
५. तत्र। ख.पु.पा.।

पीठमास्तीर्य्य तस्मिन्नवैवद्धवीरासनस्ततः ॥
वीरार्दनेन देवेशि रक्षां दिक्षु प्रकल्पयेत् ।
कूर्च्चयुग्म द्वयं देवि मायायुग्म तदन्तरम् ॥
कालिके घोरदंष्ट्रेच प्रचण्डे चण्डनायिके ।
दानवान्द्रावयेत्युत्त्वा[१] हरेति त्रितयं पुनः ॥
शवशरीर महाविघ्नं छेदयद्वितयं ततः ।
द्विठान्ते वर्म्मशस्त्रान्ते वीरार्दनमनुमतिः ॥
अनेन मन्त्रितं[२] लोष्ट्रं दशदिक्षु समास्तरेत् ।
तन्मध्ये भैरवोदेवो न विघ्नैः परिभूयते ॥
यदि प्रमादाद्देवेशि साधको भयविह्वलः ।
ततस्तैस्तैः सुहृद्वर्गै रक्षितो नाभिभूयते ॥
अर्केन्दुसितवाट्यालतूलैनिर्मित वर्त्तिका ।
प्रदीपं तत्र संस्थाप्यं अस्त्रं तत्र प्रपूजयेत् ॥
हतेतस्मिन् महादीपे विघ्नैश्च परिभूयते ।
तदधश्चास्त्र[३] मन्त्रेण विलिखेत् कुलदीपिकाम् ॥
तत्तत् कल्पोक्त विधिना भूतशुद्ध्यादिकञ्चरेत् ।
षोढ़ा वा तारढांकाश्चापि विन्यस्य पूजयेत्ततः ॥
मातृकाक्षरसंयुक्तां विद्यां षड्धा न्यसेत् पुनः ।
क्रमव्युत्क्रमयोगेन ताराषोढा प्रकीर्त्तिता ॥
षोढाविन्यस्त देहस्तु साक्षाद्विश्वेश्वरोभवेत् ।
मन्त्रध्यानपरोभूत्वा जपेन्मन्त्रमनन्यधीः[४] ॥
एकाक्षरं यदि भवेद्दिक[५] सहस्रं ततो जपेत् ।
द्व्यक्षरे चाष्टसाहस्रं त्र्यक्षरेत्वयुतार्द्धकम् ॥
ततः परन्तु मन्त्रज्ञो गजार्द्धक[६]सहस्रकम् ।

---

१. दानवांदारमत्युक्त्वा। हिलेतिद्वयं ततं।
२. मनुना। ख.पु.पा.।
३. तता। ख.पु.पा.।
४. धा। ख.पु.पा.।
५. का। ख.पु.पा.।
६. गजान्तर। ख.पु.पा.।

अथवा

निशायां जपमारभ्य उदयान्तं समाचरेत्।
जपादौतु बलिं दत्त्वा पश्चादपिबलिं हरेत्।।
जपान्ते जपमध्ये वा देहि देहीति भाषिते।
तदापि च बलिं दद्यात् महिषं वापि छागलम्।।
नदिक्षुवीक्षणं किञ्चिन्न च बन्धु समागमः।
जलाद्रि दुर्ग सर्पाग्नि गजानां दंष्ट्रिभिस्तथा।।
पक्षिकीट पिशाचानां यद्यद्वा मनसिस्थितम्।
तत् सर्व्वं स्वप्नवन्मत्वा भयं सर्व्वत्रवर्जयेत्।।
समाप्यसाधनं देवि दक्षिणां विभवावधि।
गुरवे गुरुपुत्राय तत्पत्नयै वापि दापयेत्।।
सम्यकसिद्धैक मन्त्रस्य नासाध्यं विद्यतेक्वचित्।
बहुमन्त्ररतः[१] पुंसः का कथा रुद्रएव सः।।
यतः सर्व्वत्र देवेशि गुरुपूजा गरीयसी।
तदग्रेमन्त्र-तन्त्राणां भाषणं नैव कारयेत्।।
पूजिते गुरुपादेवै सर्व्वदेवः सुखीभवेत्।
सर्व्वेषामन्त्रवर्गाणां पितासौ यत् सदाशिवः।।
अन्य देव सप्प्य्र्याञ्च अन्यदेवस्यकीर्त्तनम्।
गुरुदेवं विनादेवि तदग्रे नरकं व्रजेत्।।
शवारुढो यदि भवेत् तद्विशेष इहोच्यते।
शून्यागारे विल्वमूले नदीतीरे चतुष्पथे।।
आनीय स्नापये[२]दादौ न्यासजालं समाचरेत्।
पीठमन्त्रं समालिख्य गन्धपुष्पादिभिस्ततः।।
अभ्यर्च्च्य चासनं दत्वारक्षामात्मनि कारयेत्।
ततः शवास्ये विधिवद्देवताप्यायनं ततः।।

---

१. वतः। ख.पु.पा.।
२. स्थापर्य। ख.पु.पा.।

ततो जपत्वा सर्व्वमन्त्रं सर्व्वसिद्धीश्वरो भवेत्।
तारं शब्दं मृतकायनमोन्ते मन्त्रमुच्चरेत् ।।
शवस्नपन मन्त्रोरसौं[१] शवासनमनुस्ततः ।
मन्त्रान्ते भुवनेशीस्यात् फडन्तोद्वादशाक्षरः[२] ।।
महाचीन[३]क्रमं देवि सर्व्वसिद्धिप्रदायकम् ।
न कस्याचित् प्रवक्तव्यं गोप्तव्यं प्रीतयेमम ।।
सर्व्वेषां जीवहीनानां जन्तूणां बीरसाधने ।
ब्राह्मण गोसवत्यक्त्वा साधयेद्वीरसाधनम् ।।
महाशवाः प्रशस्तास्युः प्रधानसाधने प्रिये ।
ब्राह्मणन्तु स्त्रियं त्यक्तवा सर्वत्र शव माहरेत्।।
क्षुद्राः प्रयोग कर्तृणां प्रशस्ताः सर्व्वसिद्धये।
श्मशाने तु पुरश्चर्य्या कथिता दैविदुर्लभा।।

अथभैरवीतन्त्रेपि

भावसर्व्वस्व तन्त्रेषु सर्व्वतन्त्रेषु गोपितम्।
वीरसिद्धेर्विधानन्तु देवदेवेन शम्भुना ।।
यस्य विज्ञानमात्रेण मन्दभाग्योपि सिध्यति।
अहोरात्रेण कालेन हेलया साधकोत्तमः।।
मन्त्रं नीत्वा गुरोः पार्श्वे गुरुभक्तिपरायणः ।
गोप्यं रहस्यं[४] मन्त्रस्य प्राणान् विज्ञाय यत्नतः ।।
मन्त्रञ्च कीलकं ज्ञात्वा कुर्य्यान्मन्त्रपुरस्क्रिया ।
पुरश्चरणसम्पन्ने वीरसिद्धिंसमाचरेत् ।।

तदुक्तं स्वच्छन्दभैरवे-

सम्यक्परिश्रमेणापि नैवसिद्धिः समीहिता[५]।

---

१. यं। ख.पु.पा.
२. मंत्रई रितः ख.पु.पा.।
३. महानील। ख.पु.पा.।
४. मंत्र चैतन्य श्रोत्रास्य प्राणान् विज्ञापयत्नतः।
५. समाहिता। ख.पु.पा.।

जायते तत्र[1] कर्त्तव्या साधकैर्वीरसाधना।
पुत्रदारधनस्नेह-लोभमोहविवर्ज्जितः ॥
मन्त्रं वा साधयिष्यामि देहं वा पातयाम्यहम्।
प्रतिज्ञामीदृशीं कृत्वाबलिद्रव्याणि चिन्तयेत् ॥
यस्य मन्त्रस्य यद्द्रव्यं तत्तद्ग्राह्यमशेषतः।

शवलक्षणं यथा

उर्द्धं द्विवर्षाद्यदिवा पञ्चत्वं तरुणं[2] यदि।
सप्तमाष्टममासीयं गर्भजं यदिवाशवम्।
चाण्डालं चाभिभूतं शीघ्रं सिद्धिफलप्रदम् ॥

इतिक्षेत्रडामरे।

भैरवतन्त्रे

यष्टिप्रभृतिभिर्विद्धं चाभिभूतं जलेयदि[3]।

अथस्थान निर्णयस्तु भैरवतन्त्रेपि-

शून्यागारे विल्वमूलेनदीतीरे चतुष्पथे।
श्मशाने वा विशेषेण नीत्वा उद्धृत्य भूषयेत् ॥
यष्टि प्रभृत्यस्द्भिन्नं शूलविद्धं पयोमृतम्।
शवमानीय कर्त्तव्यं नाहरेत् स्वेच्छयामृतम् ॥
स्त्रीरहस्य[4] पतितास्पृश्य यवनेतरमानवम्।
अव्यक्तलिंगं कुष्ठाधिं[5] विप्रादन्यं शवं हरेत् ॥
न दुर्भिक्षं मृतं वृद्धं न पर्य्युषितमेव वा।
स्त्रीशवं चेदृशं रूपं सर्व्वथा परिवर्जयेत् ॥
शून्यागारमरण्यं वा नीत्वा उद्धृत्य भूषयेत्।
संस्थाप्य कुशशय्यां पुरुषं नीच[6]रूपिणम् ॥

---

१. तर्हि। ख.पु.पा.।
२. पञ्च वा वीर साधने। ख.पु.पा.।
३. मृतं। ख.पु.पा.।
१. स्त्रीवश्य। यनिता स्पृश्यनवर्ण हितं ननं।
२. कुष्ठिनं विप्रेतरशव हरेत्। ख.पु.पा.।
३. दिव्य। ख.पु.पा.।

एकवीराकल्पे-

आनीयस्नापयेदादौ न्यासजालं समाचरेत्।
पीठमन्त्रं समालिख्य गन्धपुष्पादिभिस्ततः ।।
अभ्यर्च्यासनं दत्वा रक्षामात्मनिकारयेत्।
ततः शवास्ये विधिवद्देवताप्यायनं मतम् ।।
ततोजपेत् सर्व्वमन्त्रं सर्व्वसिद्धिश्वरोभवेत् ।
तारं शब्दं मृतकाय नमोन्तं मन्त्रमुच्चरेत् ।।
शवस्नपन मन्त्रोऽयं शवासन मन्त्रास्ततः।
तारान्ते गुरु नेशी स्यात् फडन्तोमन्त्ररीरितः ।।

मत्स्यसूक्तेपि-

ततः शवंक्षालयित्वा स्नापयेच्च प्रयत्नतः।
यदिरक्तादिकं[१] तिष्ठेद् भैरवात्तद्भयं भवेत् ।।
एलालवङ्गकर्पूर जाती खदिरसारकैः।
ताम्बूलञ्च मुखेक्षिपत्वा शवं कुर्य्यादधोमुखम्।।
स्नापयित्वा ततः पृष्ठे चन्दनेन विलेपयेत्।
वाहुमूलान्त कट्यन्तं चतुरस्रं विधाय च।।
मध्येपद्मं चतुर्द्वारं दलाष्टकसमन्वितम्।
ततः[२] शैलेयमजिनं कम्बलन्तेरितं न्यसेत्।।
मृतशव्यं[३] सन्निधौ च दूरे चोत्तरसाधकम्।
संस्थाप्य शवमभ्यर्च्य तत्रशारोहणं विशेत् ।।
कुशान् पादतले दत्वा शवाकेशान प्रसार्य्य च।
दृढं निवध्य झुटिकां[४] तत्रदेवस्वरूपिणीम्।।
तस्यां देवं सुसंपूज्य पठेदुत्थाय संमुखे।

---

१. यदिरक्ताक्तकास्तिष्ठेद्रौखाच्चभयं भवेत्। ख.पु.पा.।
२. तत्र चैत्येन मजिनं कम्बलान्तरितं। ख.पु.पा.।
३. पूजाद्रव्यं। ख.पु.पा.।
४. जुटिकां तच्च। ख.पु.पा.।

वशोभवत्वं[1] देवेश वीरसिद्धिकृतास्पद ॥
पट्टसूत्ररज्जुनाथ चरणे बन्धयेद्दृढम् ।
ॐ भीम भीमभ[2]याव्याप्य भाव्यलोचन भावुक ॥
त्राहिमां देवदेवेश शवानमधिपाधिपः ।
इति पादतले तस्य त्रिकोणं चक्रमुल्लिखेत् ॥
तनोत्थातुं शवेनेति शवस्तु निश्चलोभवेत् ।
उपविश्य पुनस्तत्र वाहूतिःसार्यपाणयोः ॥
हस्तयोः कुशमास्तीर्य पादौतत्र निधापयेत् ।
तुष्टौ संपुटकौ धृत्वा[3] स्थिरचित्तः स्थिरेन्द्रियः ॥
सदादेवं हृदिध्यात्वा मौनी जपमथाचरेत् ।
चलासनाद्भयं नास्ति भयेजाते वदेत्ततः ॥
यत् प्रार्थयसि वलित्वेन दातव्यं कुञ्जरादिकम् ।
दिनान्तरे तद्दास्यामि[4] स्वनाम कथयस्वमे ॥
इत्युक्त्वा संस्कृतोक्त्या[5] च निर्भयस्तु पुनर्जपेत् ।
ततश्चेन्मधुरं वक्ति वक्तव्यं लीलयानरैः ॥
ततः सत्यं कारयित्वा वरं तत् प्रार्थयेन्नरः ।
यदि सत्यं न करोति वरं न संप्रयच्छति[6] ॥
तदा पुनर्जपेद्धीमान् एकाग्रयतमानसः ।
सत्येकृते वरं लब्ध्वा सत्यजेत्तु जपादिकम् ॥
फलं जातमिति ज्ञात्वाजुटिकां मोचयेत्ततः ।
शवं प्रक्षाल्य संस्थाप्यमोचयेत्पाद वन्धनम् ॥
पादरज्जुंमोचयित्वा पूजाद्रव्यं जलेक्षिपेत् ।

---

१. वाशत्वं भव देवेशि अमुकेइष्ट सिद्धिं देहि वीर सिद्धि कृताम्बरे। ख.पु.पा.।
२. भीम भीरु भयाभावभव्यलोचनभावुकम् । ख.पु.पा.।
३. कृत्वा। ख.पु.पा.।
४. च दास्याभिः। ख.पु.पा.।
५. संस्कृतोक्त्यानि। ख.पु.पा.।
६. वरं दान संप्रयच्छती। ख.पु.पा.।

शवंजले च गर्त्तेवा निःक्षिप्य स्नानमाचरेत् ॥
ततस्तु स्वगृहं गत्वा वलिं दद्याद्दिनान्तरे ।
अग्रिम रात्रौ यजमानो हस्ते गृह्णन्तुमया दत्तमिमं वलिम्॥
अथ यथोचितानश्वानरकुन्जरश्वकरान् ।
दत्वापिष्टमयानान्तु कर्त्तव्यं समुपोषणम् ॥
परेह्नि नित्यमाचर्य्य पञ्चगव्यं पिवेत्ततः ।
ब्राह्मणान् भोजयेत्तत्वपञ्चविंशति संख्यकान्॥
पञ्च पञ्च विहीनान् क्रमेणैव दशावधि ।
ततः स्नात्वा च उक्तवा च निवसेदुत्तमस्थत्रम् ॥
यदि न स्याद्विप्रभोज्यं तदा निर्द्धनताभियात्[१] ।
तेन चेन्निर्द्धनत्वं स्यात्तदादेवः प्रकुप्यति॥
त्रिरात्रं वाथषड्रात्रं नवरात्रं तुगोपयेत्[२] ।
स्त्रीशय्यां यदि गच्छेद्वै तदाव्याधिं विनिर्द्दशेत् ॥
गीतं श्रुत्वा च बधिरो निश्चक्षुर्नृत्यदर्शनात्।
यदि वक्ति दिने वाक्यं तदास्य मूकता भवेत्॥
पञ्चदशदिनं यावत् देहेदेवस्य संस्थितिः ।
न स्वीकुर्य्याद्गन्धपुष्पं वहिर्याति यदा यदा॥
तदावस्त्रं परित्यज्य गृह्णीयाद्वसनान्तरम्।
गोब्राह्मणनिन्दनञ्च न कुर्य्याच्च कदाचन ॥
प्रातर्नित्यक्रियान्ते च विल्वपत्रोदकं पिवेत् ।
ततः स्नात्वा तु गङ्गायां प्राप्ते षोडशवासरे॥
स्वाहान्ते मन्त्रमुच्चार्य्य तर्पणान्ते नमः पदम् ।
एवं शतत्रपादूर्द्ध्वं देवानवै तर्पयेज्जलैः॥
स्नानतर्पणशून्यस्य न स्याद्देवस्यतर्पणम् ।
इत्यनेन विधानेन सिद्धिमाप्नोति साधकः ॥

१. व्रजेत। ख.पु.पा.।
२. वापि। ख.पु.पा.।

इह भुक्त्वा वरान् भोगानन्ते याति हरेः पदम् ।
पञ्चगव्यं मूलमन्त्रे मन्त्रितं निःक्षिपेत्ततः ॥

तदुक्तं वीरतन्त्रे

निःक्षिपेत् पञ्चगव्यादीन् मूलमन्त्रेण मन्त्रितान् ॥

इति बीरसाधनप्रकरणम्

अथवान्य प्रकारेण पुरश्चरणमिष्यते

कुजेवा शनिवारे वा नरमुण्डं समाहृतम् ।
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः॥
निक्षिप्य[1] भूमौ हस्तार्द्धमानतः कानने वने।
तत्रतद्दिवसे रात्रौ सहस्रं यदिमानतः ॥
एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ।
सूर्य्योदयात् समारभ्य यावत् सूर्य्योदयान्तरम् ॥
तावज्जप्त्वा निरातङ्कः सर्व्वसिद्धीश्वरोभवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
शवमानीय तद्वारे तेनैव परिखन्य च।
तद्दिनात्तद्दिनं यावत्तावदष्टोत्तरं शतम् ।
स भवेत् सर्व्वसिद्धीशो नात्र कार्या विचारणा॥

अथवान्यप्रकारेण पुरश्चरणमिष्यते।

ग्रहणेर्कस्य चेन्दोर्वाशुचिः पूर्व्वमुपोषितः ।
नद्यां समुद्रगामिन्यां नाभिमात्रोदकेस्थितः ॥
मन्त्री शुद्धोदकेस्नात्वा शुचौ देशे समाहितः।
ग्रहणादि विमोक्षान्तः जपेन्मन्त्रमनन्यधीः ॥
अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
एवं कृते सिद्धमन्त्रः प्रयोगानपि साधयेत् ॥

---

१. ततो निक्षिप्य। ख.पु.पा.।

ग्रहणेर्कस्य चेन्दोर्वाशुचिः पूर्व्वमुपोषितः ।
ग्रहणादि विमोक्षान्तं जपेन्मन्त्रं समाहितः ।।
होमयेत्तुद्दशांशेन तद्दशांशेन तर्पयेत् ।
मार्जनं त द्दशांशेन ब्राह्मणानपि भोजयेत् ।।
एवं कृते पुरश्चर्य्या फलमुक्तमवाप्नुयात् ।
सूर्य्यग्रहण कालाद्धि नान्यः कालः प्रशस्यते ।।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।।
शरत्काले चतुर्थ्यादि नवम्यन्तं विशेषतः ।
भक्तितः पूजयित्वातु रात्रौ तावत् सहस्रकम् ।।
जपेदेकाकी विजने केवलं विजयालये ।
अष्टम्यादि नवम्यन्तमुपवासपरोभवेत् ।।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
अन्यत्रगुरुमार्गस्यलङ्घनं नैवकारयेत् ।।
अष्टमीसन्धिवेलायांमष्टोत्तरलतागृहम् ।
प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्चयत्नतः ।।
पूर्वोक्त कल्पमासाद्य क्रमात् पूजादिकं चरेत् ।
केवलं कामदेवोसौ जपेदष्टोत्तरं शतम् ।।
तासां च पत्रमूले च[१] उग्रां संपूज्यमात्रिकः ।
महासिद्धिर्भवेत् सद्योलतादर्शनपूजनात् ।।
अथवान्यप्रकारेण पुरश्चरण मिष्यते ।
कुलाकृष्टलतागारे लिखित्वा मन्त्रमेव[२] च ।।
प्रपूज्य तत्र संस्कारं कृत्वातस्यै निवेदयेत् ।
किञ्चिज्जप्तजननान्त्वादेवताभाव तत् परः ।।
तां संपूज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः ।
प्रातः स्त्रीभ्योबलिं दत्वा मन्त्रसिद्धिर्नसंशयः ।।

---

१. षु.।ख.पु.पा.।
२. मुत्तमम् । ख.पु.पा.।

पुनः पुरश्चरणम्

भूमिपुत्र समायुक्ता अमावस्या शुभप्रदा ।
भाद्रे संक्रमयोगेण तस्यां बीरवरोत्तमः ।।
विष्णुक्रान्ता समानीय निक्षिपेन्मृतभूमिषु ।
तत्र तां साधितां कृत्वा तद्दिने मृतरुहके ।।
तत्र प्रसारितं मत्स्यमेकामूल्येन दापये ।
तज्जले नभिषेकश्च पूर्व्ववच्च शवोपरि ।।
सोधितां विजयां तस्य उदरेमुखवर्त्मना ।
क्षिप्तातत्रैव तन्मत्स्यमञ्जुलाञ्चिचलोचनः ।।
तिलकं[1] पूर्व्वद्रव्येण उत्थाय च मनुं जपेत् ।
स्वयमायाति भगवान् भैरवोलगुडाक्षितः ।।
गतभीतस्ततोवीरहस्तं[2] विलोक्य मनुं जपेत् ।
यदि भाग्यवशाद्देवि लगुडस्तत्र लभ्यते ।
तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरोभवेत् ।।

पुनः पुरश्चरणम्

मत्स्यमानीय देवेशि निक्षिपेत् पितृकानने ।
तत्रासकृज्जपित्वा च देवता मेनकं भवेत् ।।

अथवेत्यादि

निशायां मृतदेहे च उन्मत्तानन्दभैरवः ।
दिग्वासा विमली भस्म भूषणो मुक्तकेशकः ।।
कपाली खड्गहस्तश्च जपेन्मातृकयायदि ।
तदा तस्य महादेवि सर्व्वसिद्धिः करेस्थिता ।।
डाकिनी योगिनीं वापि अन्यां वा भूतलाङ्गनाम् ।
तत्र चानीय संपूज्य सर्व्वसिद्धिश्वरो भवेत् ।।

---

१. तिलकी। ख.पु.पा.।
२. चरतीत। ख.पु.पा.।

अथवेत्यादि

गुरुमानीय संस्थाप्य देववत् पूजनं विभो।
वस्त्रालङ्कार हेमाद्यैः सन्तोष्य गुरुमेव च।।
तत् सुतं तत् सुताञ्चैव तत् पत्नीञ्च विशेषतः।
पूजयित्वा मनुं जप्त्वा स्वयं सिद्धिश्वरो भवेत्।।

अथवेत्यादि।

सहस्रारे गुरोः पाद पद्मं ध्यात्वा प्रपूज्य च।
केवलं देवताभावे जप्त्वा सिद्धीश्वरोभवेत्।।

गुरुध्यानं यथा–

सहस्रदल पङ्कजे सकलशीतांशुप्रभम्।
वराभयकराम्बुजं विमलगन्ध पुष्पाम्बरम्।।
प्रसन्न वदनेक्षणं सकलदेवतारूपिणम्।
स्मरेच्छिरसि हंसगं तदभिधान पूर्व्वं गुरुम्।।
गुरवे दक्षिणां दद्याद्यथाविभवविस्तरैः।
गुरोरनुज्ञा मात्रेण दुष्टमन्त्रोपि सिद्धयति।।
गुरुं विलङ्घ्यशास्त्रेस्मिन्नाधिकारः सुरैरपि।
एषाञ्च[1] मन्त्रतन्त्राणां प्रयोगः क्रियते यदि।।
गुरुवक्त्रं विना देवि सिद्धिहानिः प्रजायते।
एतन्मन्त्रञ्च तन्त्रञ्च शिष्येभ्योपि न दर्शयेत्।
अथान्य प्रेतराजस्य भवनं याति निश्चितम्।।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ रहस्याति रहस्य वर्णनम् अष्टमः पटलः।।

◆◆◆

---

१. एवञ्च मंत्र यंत्राणां। ख.पु.पा.।

अथ नवमः पटलः

अथ मन्त्रोद्धारः

यथा मत्स्य सूक्ते–

अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान्।
येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः।।

तत्रादौ संप्रदायशुद्ध्यर्थं सर्व्वविद्यानामाद्यां पञ्चाक्षरीं विवृणोति[1] यथा।

मायाबीजं समुद्धृत्य एकारं वह्नि संयुक्तम्।
मायविन्द्वीश्वरयुतं द्वितीयं बीजमुत्तमम्।
कूर्च्चबीजं तृतीयन्तु फटकारं तदनन्तरम्।
संपूर्णसिद्धिमन्त्रन्तु रश्मिपञ्चक संयुतम् ।।

रश्मिपञ्चकमित्येक जटापक्षे रश्मिपञ्चकम् वर्णपञ्चकम्। उग्रजटा पक्षेतु रश्मिपञ्चकं प्रणवमित्यर्थः। तेनाकारोंकारमकारनादविन्दवः। मन्त्रचूड़ामणौ तु–

अनुत्तरं समुद्धृत्य मायोत्तर मतः परम्।
पञ्चम पञ्चसमायुक्तं पञ्चरश्मि प्रकीर्त्तिम्।।

तथा फेत्कारीये–

त्र्क्षरासौ महामन्त्रः फटकारान्तो हृदिस्थितः।
पञ्चरश्मि समायुक्तोप्यज्ञानेंधनदाहकः ।।
तस्योद्धारमहं वक्ष्ये मनोः[2] सर्व्वज्ञकारणम् ।
प्रथमं सपरं दत्वा चतुर्थस्वरसंयुतम्[3] ।।
रेफारुढं स्फुरद्दीप्तमिन्दुविन्दुविभूषितम् ।
एं कारञ्च ततो दद्यात् चतुर्थस्वरसंयुतम् ।।

---

१. विषनोमियथा। ख.पु.पा.।
२. शृणु। ख.पु.पा.।
३. भूषितम् । ख.पु.पा.।

दीर्घोकार समायुक्तं हंकारं योजयेत्ततः।
फटकारञ्च ततो दद्यात् संपूर्णसिद्धमन्त्रकम्।।
लीलयावाक्प्रदाचेति ततो[१] नीलसरस्वती।
तारकत्वात् सदातारा सुखमुक्ति प्रदायिनी।।
उग्रापत्तारिणी अस्मादुग्रताराप्रकीर्त्तिता।
वितौरकजटा चैषा महामुक्ति करी मता।।
तारास्त्ररहितात्पर्णा महानीलसरस्वती।
दुक्षेन्दुपारपाथेऽनवरत् पतिता योगिनोयां यजन्ति ।।
हस्तैः कर्त्रीं कपालोत्पलमपिमनिशं विभ्रतीं भूविभूषाम् ।
श्रीकुल्लुकां शवस्थां शशिरुचिरजटां सोमवक्त्रां[२] त्रिनेत्रां ।।
प्रत्यालीढां घ्रियुग्मां प्रत्ययघननिभां भावयेत् साधकेन्द्रः।
कुल्लुकेति[३] समाख्याता केचिदिच्छन्ति तान्त्रिकाः।।

नीलतन्त्रेऽपि–

ताराद्या पञ्चवर्णेयं श्रीमन्नीलसरस्वती।
सर्व्वभाषामयीशुद्धा सर्व्वाम्नायै नमस्कृता।
श्रीजीवाद्या[४] यदा विद्या तदा श्रीः सर्व्वतोमुखी।
एषैव हि महाविद्या मायाद्या सकलेष्टदा।
वाग्भवाद्या महाविद्या वाग्रूपा सर्व्वाङ्मयी।
एताः क्रमगताः प्राप्ता मतभेदा जगन्मयी।
एकवीरा कल्पेपि लज्जाबीज कूर्च्चजं बीजं तथाहिफट्।
एवं पञ्चाक्षरीविद्या पञ्चभूतप्रकाशिनी।
वधूबीजं मध्यबीजं एङ्कारं केवलं मतम्।

मध्ये षोडश हनि ते शुद्धं केवलं तारकमित्यर्थः। विशेषस्तु अत्र मध्यबीज गुप्तामृतबीजमस्तित्रि[५]गुप्तत्वान्नोछ्रितम्। तेन[६] चन्द्रयुत्तं मध्यबीजमिति-सिसिद्धैर्ज्ञेयमिति शिवदीक्षाटीकाकारः।

---

१. तेन। ख.पु.पा.।
२. नौमिरक्ता। ख.पु.पा.।
३. कुल्लुकेयं। ख.पु.पा.।
४. श्री वीजाधा। ख.पु.पा.।
५. अतिगुप्तत्वान्नो। ख.पु.पा.।
६. येन। ख.पु.पा.।

तदुक्तं तारार्णवे–

वशिष्ठाराधिताचोग्रा नत्वं शीघ्रफलप्रदाम्।
अतस्तेनापि मुनिना शापोदत्ता सुदारुणः॥
ततः प्रभृति सा विद्या वधूरिव यशस्विनी।
फलिनी सर्व्व विद्यानां जयिनी जयकाङ्क्षिणाम्॥
विषक्षयकरीविद्या अमृतत्वप्रदायिनी।
चतुर्लक्षंजपेद्धीमानिमां विद्यामनन्यधीः।
मन्त्रस्य ज्ञानमात्रेण विजयी भुविजायते॥

एतत्तु न केवलं एकजटायां नीलसरस्वत्यापि विद्ययोरेकार्थत्वात् तन्त्रचूडामणावपि–

अनुत्तरं समुद्धृत्य यामोत्तरमतः परम्।
पपञ्चमसमायुक्तं पञ्चवाक्य[1]प्रकीर्त्तितम्॥
जीवनी मध्यमा पश्चादेकाक्षी तदनन्तरम्।
उग्रदापद तत् पश्चादस्त[2] देवि प्रकाशितम्॥

एकवीरा कल्पेपि–

लिखेत् खं कूर्च्च संयुक्तं रौद्रं त्रैगुण्यमेव च।
विधिविष्णु महेशानां स्वशक्तया क्रमयोगतः॥
एषा माता महाविद्या सर्व्वसिद्धिप्रदासदा।
सर्व्वमन्त्रमयीविद्या सर्व्वतन्त्रेषु गोपिता॥
सिद्धिदा भजतामाशु संप्रदायविधानतः।
ध्यानार्च्चन प्रयोगन्तुतारिण्याः पूर्व्ववद्भवेत्॥

नीलतन्त्रेऽपि–

अथान्यां[3] संप्रवक्ष्यामि तारां भुवनतारिणीम्।
स्मरणात् सर्व्वसत्वानां भयमाशु विनाशयेत्॥
प्रणवं पूर्व्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत्।

---

१. पञ्चरश्मि। ख.पु.पा.।
२. मंत्रों। ख.पु.पा.।
३. अकविद्यां प्रवक्ष्यामि। ख.पु.पा.।

गगणं शेष संयुक्तं विन्दुनादविभूषितम् ।।
कूर्च्चबीजञ्च हृदयं तारायै च समुद्धरेत्।
सकलदुस्तरां स्तारयेति तथा पुनः ।।
तारायुग्मं वह्निजाया मन्त्रोयं सुरपादपः।
गद्यपद्यमयी वाणी कथायामभिधायिनी ।।
चतुर्लक्ष जपेनास्याः सिद्धयोष्टौ मर्वान्तहि।
ध्यानपूजादिकं सर्व्वं पूर्व्ववत् समुपाचरेत् ।।

मायातन्त्रेऽपि श्रीभगवानुवाच-

अथ तारा मनूनवक्ष्ये भुक्तिमुक्तिफलप्रदान् ।
येषा स्मरणमात्रेण जगद्वश्यं भवेद्ध्रुवम् ।।
तारा चोग्रामहोग्रा च रुद्रकाली[१] सरस्वती।
कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृताः ।।
उष्णवर्ण गतोजीवो निगमस्वर संयुतम्।
नादविन्दु समायुक्त[२] स्तत्वरश्मि समन्वितः ।।
कथितं वामकर्णस्थं मादाढ्यं विन्दुशेखरय्।
पार्श्वान्तस्थं तथाञ्चान्तं शवान्तं परिकीर्त्तितम् ।।
मध्यादि मायाकवचं द्वितीयं मन्त्रमुद्धतम्।
विपरीतं त्रिधाज्ञेयं अन्त्याद्यञ्च[३] तुरीयकम् ।।
मायादिकरचान्तञ्च पञ्चमं परिकीर्त्तितम्।
मायामध्यगतं षष्ठं द्वितीयायाञ्च सप्तमम् ।।
अष्टमं कवचं मध्यमेवं भेदाष्टकं भवेत् ।
त्र्यक्षरस्य विशेषोयं कूटो यत्र न तत्रवै ।।
जप्येतु त्र्यक्षरं ज्ञेयं न्यासे सर्व्वप्रतिष्ठितम्।
ऋषिः स्यादष्टकं छन्दोऽनुष्टुप देवता तथा ।।

---

१. वज्रकाली। ख.पु.पा.।
२. युक्तां। ख.पु.पा.।
३. कूर्चाढ्यं। ख.पु.पा.।

शम्भु पत्नी महेशानि चतुर्व्वर्गेषु योजयेत्।
काललक्षं जपेन्मन्त्रमेवमुक्तेन वर्त्मना ।।

गान्धर्वतन्त्रे–

जलपुच्छु[१]मयीं मायां वक्ष्येन्यां शृणुतत्वतः ।
यस्याः स्मरणमात्रेण भयमाशु विनाशयेत् ।।
प्रणवं पूर्व्वमुद्धृत्य तारेतद्वत्तारके[२] तथा ।
उक्तवा[३] स्वाहेति मन्त्रोयं दशाक्षर उदीरितः[४] ।।
ध्यानं वक्ष्ये शृणु प्राज्ञे समस्तायन्निराकृतम् ।
यस्मात् सर्व्वत्र तोयेषुबाधा न भवति स्मृते ।।
श्यामवर्णां त्रिनयनां द्विभुजां वर पङ्कजे ।
दधानां बहुवर्णाभिर्वहुरूपाभिरावृताम् ।।
शक्तिभिः स्मेरवदनां स्मेरामौक्तिकभूषणाम् ।
रत्नपादुकयोन्यस्त पादाम्बुजयुगां स्मरेत् ।।
दशलक्षं जपेद्विद्यां नियमेन यथा वशी ।
कुशांशं जुहुयान्मन्त्री घृताक्तैर्रक्तपुष्पकैः ।
इति सिद्धामहाविद्या दद्यात् सर्व्वमनोरथान् ।।

मातृकार्णवे–

विद्यान्तरं प्रवक्ष्यामि शृणुष्वा[५]वाहितानघे ।
वाग्भवं कुलदेवीञ्च तारकं वाग्भवं तथा ।।
हृल्लेखा चास्त्र मन्त्रान्ते वह्निजायावधिर्मनुः ।
अष्टाक्षरो मनुः प्रोक्ता वेदमातुरनुत्तमः ।।
पञ्चाङ्गं चास्य मन्त्रस्य[६] पञ्चबीजं प्रकल्पयेत् ।
अस्त्रं शेषाक्षरैर्न्यस्य कृतकृत्यो भवेन्नरः ।।

---

१. जनाचत्समंनी तारां। ख.पु.पा.।
२. तारे उत्तार येति च। ख.पु.पा.।
३. प्राया। ख.पु.पा.।
४. उदाहृतः। ख.पु.पा.।
५. सा । वहिताप्रिये। ख.पु.पा.।
६. देवेशि पञ्चवीजैः। ख.पु.पा.।

ध्यानपूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत्।
कालिका सिद्ध विद्यास्यान्महाकाली परामृता ।।
तस्यास्त्रान्त महाविद्या विज्ञेया साधकोत्तमैः ।
कुल्लुका तारिणी प्रोक्ता पूर्व्वग्रन्थे मयाद्विज[१] ।।
सर्व्वदेवमयी विद्या सर्व्वाम्नायैर्नमस्कृता ।
रक्षाकरी च संप्रोक्ता यथा परमसाधकैः ।।
प्रणवं पूर्व्वमुच्चार्य्य पद्मे युग्मं तथैव च।
महापद्मे पदं ब्रूयात् पद्मावति पदं ततः ।।
माये स्वाहेति मन्त्रोयं प्रोक्तः सप्तदशाक्षरः ।
पूजा पूर्व्ववदुद्दिष्टा अर्द्धरात्रे ततो[२]जपेत् ।।
जपस्तस्या[३]श्चरेद्यस्तु स्याद्भुतकविध्रुवम् ।
बीजमन्त्राः स्वतन्त्राः स्युस्तारिण्याः सर्व्वसिद्धिदाः ।।
एते भेदा महोग्रायाः पुरुषार्थ प्रवर्त्तकाः ।
आयुः श्रीः कान्ति कविता विद्या सौभाग्यदायकाः ।
अन्तेनिरामयं ब्रह्म जीवन्मुक्ति प्रदायकाः ।।

अथ स्वच्छन्दसंग्रहे

शिवबीजं महेशानि शक्तिबीजं ततः परम् ।
सर्गविन्दुसमायुक्तं वेदाद्यं तदधः क्रमात् ।।
मायात्रीं वर्म्मबीजान्ते हंसबीजमुदीरितम् ।
एषात्वष्टाक्षरी विद्या कथिताभुवि दुर्लभा ।।
आत्म[४]सिद्धिमवाप्नोति त्रैलोक्यं वशमानयेत् ।
वशमायान्ति सहसो वेदविद्याश्चतुर्दश ।।
हंस तारा महाविद्या तवस्नेहात् प्रकाशिता ।
कवितामाहरेत्[५] पुंसां धनार्थी धनमाप्नुयात् ।।

१. महा। ख.पु.पा.।
२. चतुष्पथो। ख.पु.पा.।
३. मस्य। ख.पु.पा.।
४. आज्ञा। ख.पु.पा.।
५. मावहेत्। ख.पु.पा.।

मोक्षार्थी लभते मोक्षं नात्र कार्या विचारणा ।
उग्रतारामहाविद्याः कथ्यन्ते मम पौरुषम् ॥
...ाक्षरी च विद्येयं साद्यन्ता महोदया ।
...लं त्वत् प्रगत्तेन तवस्नेहात् प्रकीर्त्तिता ॥
अनया जपपूजादीना पञ्चाक्षरी वदाचरेत् ।
बीजखण्डामहाविद्यास्त्रिताराद्याः पृथक् पृथक् ॥
त्रैलोक्य कवितासिद्धि दायिन्युत्तमभूतिदा ।
षडदीर्घयामायया च षडङ्गं समुपाचरेत् ॥
पूजा पूर्व्ववदुद्दिष्टा प्रयोगा अपि तत् समाः ॥

एक बीराकल्पेदि

शिवशक्तिस्ततो माया फटकारान्ता उदाहृतः ।
सार्द्धवेदा[1]क्षरोमन्त्रो ज्ञानदीपः कवित्वदः ॥
तारोमायाशिवः शक्तिः फटकारान्ता मनस्मृताः ।
एतयोः कल्पमुदितं महोग्राकल्पमुत्तमम् ॥

अथमहानील सरस्वती यथा तदुक्तं सिद्धसारस्वते–

वाङ्मायाकमलाबीजं ईशो भृगुनिषेवितः ।
चतुर्द्दशेन्दुसंयुक्त पश्चाद्भृगुमहेश्वरौ ॥
चतुर्द्दशविसर्गाढ्यौ पर[2]दत्वन्तचञ्चवाक्पदम् ।
वादिनीति ततः पश्चात्रीं पदत्रितयं ततः ॥
नीलसरस्वती पदं त्रिधावृत्तिश्च वाङ्मनोः ।
पाहिशब्द[3] द्वयं पश्चात् कलवीमग्निवल्लभा ॥
चतुस्त्रिंशद्वर्णयुक्तो नीलसरस्वतो मन्त्रः ।
षटकौषिकसौ विज्ञेयः षड्भिर्मन्त्रैर्यतः कृतः ॥
ऋषिछन्दो देवतानां विभागं शृणु पार्व्वति ।
गङ्गाप्रवाहोनामर्षिर्मत्स्यरूपी जनार्द्दनः ॥

---

१. सर्द्धपञ्च। ख.पु.पा.।
२. वदद्वन्द्वं। ख.पु.पा.।
३. काहि। ख.पु.पा.।

अति[1] वाक्कविताछन्दो देवी नीलसरस्वती ।
सर्व्ववागैश्वर्य्यमयी समस्ताभीष्टदायिनी ।।
ऐं बीजं कीलकं ज्ञेयं कलाशक्तिः समीरिता ।
नीलोवर्णश्च विज्ञेयस्त्वरितं कविताफलम् ।।
मुद्रास्तु प्रतिवादीन्द्र मुखमुद्राः समीरिताः ।
हृल्लेखया षडङ्गानि कुर्य्यात् षडदीर्घयुक्तया ।।
नीलांशुकं मणिमयी च करेषुवीणां ।
मुद्राञ्च पात्रमथ पूर्णसुधां दधानाम् ।।
उद्यच्चतुर्मुख वहत् कविता प्रवाहाम् ।
नीलां भजामि हृदयेषु सरस्वतीं ताम् ।।

अथ मातृकार्णवोक्त ध्यानान्तरम् –

नीलाम्भोधर सन्निभा त्रिनयना वाहुस्फुरदवल्लकी ।
मुद्रा पात्र करा चतुमुर्ख वहद्वाभङ्ग[2] कल्लोलिनी ।।
नीलच्छायमराल चन्द्रवदना[3] दिव्ये विमानेस्थिता ।
प्रोत्तुङ्गस्तनमारभङ्गुर तनुनीलानिशं पातुवः ।।

देव्युवाच-

भगवन् सर्व्वदेवानां पारगस्त्रं[4] महेश्वर ।
चिदचिन्मय[5] विश्रान्तर्व्याप्तरश्मि कदम्बकः ।।
तत्रास्ति जगतीचक्रे यन्त्रागोचरं पदम् ।
अथ सर्व्वज्ञ नामासि देवेषु सकलेष्वपि ।।
ख्याता सर्व्वत्र लोकेस्मिन् धवला भारतीशुभा ।
न पीता न च वा श्वेता कथं नीला सरस्वती ।।
तद्वक्तुमशेषेण[6] देवदेव त्वमर्हसि ।

---

१. अतिसय। ख.पु.पा.।
२. वह्न कर्पूरकल्लोलिनी। ख.पु.पा.।
३. पांवक्ते घटना रम्ये विमानोस्थिता। ख.पु.पा.।
४. गत्व। ख.पु.पा.।
५. विच्छिन्मयाय। ख.पु.पा.।
६. विस्तरेण। ख.पु.पा.।

गायत्री चैव सावित्री सरस्वत्यपि शङ्कर।।
प्रातर्मध्याह्नसायाह्ने रक्ताश्वेता च श्यामला।
सावित्री हृदये प्रोक्ता सैवान्या किं वदप्रभो।।

।।महेश्वर उवाच।।

साधुपृष्टं[१] त्वयासम्यगिदमेतद्विविच्यते।
पूर्व्वं देवासुरे युद्धे दानवादितिजै सह।।
चक्रेण चक्रिणाछिन्नाः कान्दिशीकाः प्रदुद्रुकः।
सम्भूयते दुष्टदैत्याः समुद्रकुहरोदरे।।
मन्त्राणं चक्रिरे पूर्व्वं देवानां परिभूयते।
देवरूपा भगवती सर्व्वमन्त्रमयी हि या।।
तथैव सर्व्वविघ्नानां यन्त्र[२] कान्तिः प्रवर्त्तते।
तेषु यत्नेषु[३] संपूर्त्तिर्हरिभिर्वलिनः सुराः।।
अतोदयस्मान् प्रवाधन्ते वयञ्च वलिनस्ततः।
इति तेषां वचः श्रुत्वा दीनानां दितिजन्मनाम्।।
हयग्रीवः सोमकश्च[४] निर्वेदं भृशमाप्नुतुः।
तावुभौभ्रातरो दृप्तौ[५] तुरङ्गग्रीव सोमकौ।।
शब्दाकर्षणिकां देवीं समुद्दिश्यातपस्यताम्।
तयोर्घोरतपस्तुष्ट शब्दकर्षणदेवता।।
कोवात्रवीर्य्यं नामात्र वपुः कोवातिरोञ्चितः।
ताभ्यामुक्ता भगवती वरंप्रार्थन हेतवे।।
सर्व्वशब्दाकर्षणमस्त्रभावाभ्यां दीयतामिति।
तथास्त्वेति तया प्रोक्ता दानवावतिदर्पितौ।।
तस्यास्त्रस्य स्वभावेन भूलोकं समुपस्थितौ।
सर्व्वांश्च कर्षतुः शब्दान्मंत्ररूपान् दिते सुतौ।।

१. साधुत्वया। ख.पु.पा.।
२. सर्व्व विघ्नाण, यज्ञकांड प्रवर्त्तते। ख.पु.पा.
३. यज्ञेषु संभूतैर्हरिभिश्च चलिनः सुराः।
४. सोमफढ। ख.पु.पा.।
५. प्राप्ता। ख.पु.पा.।

सा शब्दरूपिणी देवी शुभ्ररूपासरस्वती।
मुखानि सर्व्वविप्राणां त्यक्त्वा दिव्यवपुर्द्धरा ।।
आयत्तादैत्यवरयोर्द्वयोः पाशमुपागता।
क्रन्दन्तीं ताश्चविरसां नीत्वा पातालगोलके ।।
हालाहलविषैः कुण्डं कृत्वानीलजलप्रभैः।
तत्रतां विनिमिज्यैव बद्ध्वापन्नगरज्जुभिः।।
पर्व्वतैर्निचितां कृत्वा पुनर्देव जिगीषया।
स्वर्गमासाद्यसेनाभिः प्रतुष्टवत्तरात्वम् ।।
शब्दाकर्षणवाणेन दैत्यानां पृथिवीतले।
निःशब्दाश्चैव निर्मन्त्रा वेदविस्तारिणोद्विजाः ।।
मन्त्र विस्मरणेनैव यस्तु[1] विद्या निरासिताः।
तन्नाशतो हविर्भागवर्जिताबलहानितः।।
निर्व्वीर्य्यस्त्रानिरुद्योगास्ताभ्यां देवानिराकृताः।
इत्थं विद्राव्य विबुधान् तौ हयग्रीवसोमकौ ।।
विष्णु चक्राच्छङ्कितौ च समुद्रान्तग्रहेस्थितौ।

इत्थं यदा वेदमयी विनष्टा वाचां प्रसूः सर्व्वमनुस्वरूपा
स्वर्गप्रणाशा दुःखिताः सुरेन्द्रास्तदाहरिं तुष्टुवुरादादिदेवम्।
सुरैः स्तुतः सोधिवरोरुमायो मायाविनौतौ[2] दितिजन्म वर्य्यौ
वेदस्य[3] चौरौ मनसाविदित्वा चकार तस्याहरणाय यत्नम्।
सहस्रदंष्ट्रस्य झषस्य रूपं पाठीन नाम्नः परमोपविष्णुः
रूपं गृहीत्वा भगवाननन्तो विवेशवेदो हरणाय सिन्धुम्।
वराहरूपेण यथाब्धिमग्नां युगेयुगे प्रोद्धृत्वान् धरित्रीम्
तथैवमत्स्याकृतिं अम्बुजाक्षो विलोडयामास समुद्रपूर्वम्।
मत्स्यस्वरूपस्य हरेः शरीरादाविर्वभूबुश्च भुजाश्चतस्रा
चक्रं तथा नन्दकशार्ङ्ग[4] चापौ कौमोदकीत्यस्त्र चतुष्टयेन।।

---

१. यज्ञविद्यानिवारिता। ख.पु.पा.।
२. रूमाया मायाविनौतौ द्वितीजन्म वार्यौ। ख.पु.पा.।
३. देवस्या। ख.पु.पा.।
४. चक्रं तथा नन्दकशार्ङ्ग चापौ। ख.पु.पा.।

मत्स्यस्वरूपस्य जनार्दनस्य वभूव युद्धं शरदां सहस्रं
ततस्तु शब्दार्थ विकर्षणास्त्रम् निःश्वासवातेन वलादगृह्णात्।
अपाहृतास्तौ हरिचक्रकृत्तौ[1] कौमोदकी ताऽनमूर्च्छि तौ च
खड्गप्रहारात् पतितौचनाश मुभौहयग्रीवकसोमकाख्यौ ।।
अथाम्बुधेर्गर्भ पुरान्तराणि निवेशितां तां विषकुण्डमध्ये
मत्स्यरूपी[2] भगवाननन्तः प्रोद्धृत्य निःश्वासनिरस्तपङ्कः।
गरुत्वहालोकन शुष्यमाणे विषस्य कुण्डे विवसां शयानां
निरस्तचेष्टां निभृताङ्गयष्टिम् निश्वासमात्रैक शवैक[3]शेषां ।।
आश्वासयामास सुगीत वाक्यैः हरिः स्मितं प्राह सरस्वतीं तां
तितार[4] निधां प्रथमं जगाद समस्त मन्त्रप्रवरस्य मूलं।
तेनापि नो संविदमाप देवी प्रासादमस्त्रं पुनरुज्जगाद
तेनापिनोसंविदमापदेवी बीजत्रयीमभ्यवदन्मुकुन्दः ।।
तेनापि नो संविद मपदेवी कामेश्वरीं सांथजगाद् विष्णुः
एवं पञ्चाकारमुनं प्रणीय संज्ञां प्रपेदेव च सां सवित्री।
इत्याप्यसौ सस्मितमाथभास नीलासि जाता विषकुण्डमग्ना
सर्वाङ्गपूर्णासितताविलापा यथाहृती तेपि च शङ्कमुख्यौ।
यथापुरा सर्व्वमहीसुराणां मुखान्तरे जातासि वीतशङ्का
धर्मं समुल्लास यदेवताभ्य इत्यादिवाणीं हरिमाहदेवी[5]।
मत्स्यावतारेण सुरक्षिताहं त्वयामजस्येहफलं समस्तम्
निवेशिताहं विषकुण्डमध्ये तद्येनदुरीभवति क्षणेन ।।
तथा कुरुस्व प्रथितैरुपायैरित्युक्तईशोपि जगादत्वक्षम्या
मात्वं शुचं याहि वचः सवित्रे प्रागद्यदूरं सविशुद्धवर्णा।
उग्रेण हालाहलनिर्विषेण नीलत्वमाप्तासिकुतोऽत्रदोषः[6]
नाना विधान्याभरणानि शोभा प्रागन्ति नीले खलुदेह एव ।।
मनोमृतानां जगतां सवित्री नीलश्चकण्ठः पुरशासनस्य

---

१. कृत्तो। ख.पु.पा.।
२. मत्स्यवरस्वरूपी।
३. शरो। ख.पु.पा.
४. तितार। ख.पु.पा.।
५. हरिराहदेवी। ख.पु.पा.।
६. गेषः। ख.पु.पा.।

नीलो महेन्द्रः सुरचक्रवर्ती नीलोजगज्जीवनदश्वमेघः ।
नीलं नभः सर्व्वजनावकाशो नीलः कलङ्कः शशिदीप्तिहेतुः
नीलोप्यहं सत्वगुणाश्रयश्च नीलस्य वर्णस्य कुतोस्तिदोषः
अशेषभूषा मणि[1]वेष्टिताङ्ग्यो विनाञ्जुनेनाक्षि निवेशितेन
न रूपवत्यो भुवने[2] युवत्यो विलासवत्यो नवयौवनाश्च ।
ततश्चते नीलसरस्वतीतिरथाता सवित्री भुवनत्रयेपि
त्वदर्थमेव प्रणतामहार्हा षटकौशिकी बालमृगाक्षिविद्या ।।
षटकैस्तयोगे नहिजीवितासि विनष्ट चेष्टा विषकुण्ड[3] मध्ये
षट्कौषिकस्तेन मनुर्भवान्याः प्रवर्त्तते सप्तदशत्वदर्णः ।
इत्यागमे नीलसरस्वतीयो महेश्वरेण प्रतिपादनीयः
एतत् प्रभावाद्वचसां सवित्रि भविष्यसित्वं द्रुतवाक्प्रदात्री ।।
इत्थं समाश्वास्य वचोभिवाद्यः पुमान् समादाय सरस्वतीं ताम्
प्रवर्त्तयामास मुखेद्विजानां पुनः सुराणां सुखहव्य लब्धौ[4]।
ततः प्रभृत्येव जगत् प्रतीता श्रेयः पदा नीलसरस्वतीति
नीलत्व हेतुः पुनरेवमुक्तः पुनस्तु शुश्रूषितुमस्ति किं ते ।।

इति सिद्ध सारस्वते।

लक्षमेकं जपेद्विद्यां दशांशमसितोत्पलैः ।
नीलत्रया महाविद्यां बीजाद्याः परिकल्पयेत् ।
ध्यान पूजा पुरश्चर्य्या सर्व्वं नीलासमं भवेत् ।

।।इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ मन्त्रोद्धारः नवमः पटलः।।



१. सुनि। ख.पु.पा.।
२. यवन। ख.पु.पा.।
३. कुण्ड। ख.पु.पा.।
४. लब्धेः। ख.पु.पा.।

अथ दशमः पटलः

अथेदानीं स्तवनिर्णयो लिख्यते।

ताराष्टकम्

तथानीलतन्त्रे–

मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे।
प्रत्यालीढपदस्थिते शवहृदि स्मेराननाम्भोरुहे।
फुल्लेन्दीवरलोचनेत्रिनयने कर्त्रीं कपालोत्पले।
खड्गं चादधतीत्वमेव शरणंत्वामीश्वरीमाश्रये॥१॥
वाचामीश्वरि भक्त[1]कल्पलतिके सर्व्वार्थ सिद्धिश्वरि।
गद्य प्राकृत पद्यजातवचना सान्निध्यसिद्धिप्रदे।
नीलेन्दीवरलोचनत्रययुते कारुण्यवारां निधे।
सौभाग्यामृतवर्षेण कृपया सिञ्चत्वमस्मादृशम्॥२॥
खर्व्वेगर्व्व समूहपूरित तनो सर्वादिवेशोजले।
व्याघ्रत्वक परिवीत सुन्दर कटि व्याधूत घण्टान्विते।
सद्यः कृंत्यगलद्रजः परिमिलन्मुण्डत्वयी मूर्द्धज[2]
ग्रन्थि श्रेणि नृमुण्डदामललिते भीमे भयं नाशय॥३॥
मायानङ्गविकाररूपललना बिन्द्वर्द्धचन्द्रात्मिके।
हूँ फटकारमयी त्वमेव शरणं मन्त्रात्मिके मादृशः।
मूर्त्तिस्ते जननि त्रिधाम घटिता स्थूलातिसूक्ष्मापरा।
वेदानां नहिगोचरा कथमपि प्राज्ञानुतामाश्रये[3]॥४॥
त्वत् पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यताम्।
तस्य श्रीपरमेश्वर त्रिनयन ब्रह्मादि साम्यात्मनः।

---

१. भक्ति। ख.पु.पा.।
२. मुण्डद्वयीमुद्धनजा। ख.पु.पा.।
३. प्राप्तान्नता। ख.पु.पा.।

संसाराम्बुधि मज्जने पटु[illegible] देवेन्द्रमुख्यान् सुरान् ।
मातस्त्वत् पदसेवनेहि विमुखान् किं मन्दधीःसेवते ॥५॥
मातस्त्वत् पद[illegible] कोटीरिण[2]-
[illegible] सुरसङ्घ[illegible] निःशङ्कमङ्केगताः ।
[illegible]हं भुवनेन मे [illegible] वहन्तः शनै-
[illegible] नितं [illegible] किं नति किं कृपा॥६॥
[illegible]
[illegible]गाः ।
[illegible] दानव पुङ्[illegible] खचरा [illegible] [illegible]न्दार्वो ।
[illegible]ः कुपितान्स्तवा[illegible] भूतले [illegible] ॥७॥
[illegible] सिद्धिगणाः पादु[illegible]ः [illegible]
[illegible]आदिगणा[illegible] [illegible]
मातस्त्वत् पद [illegible] सिद्ध[illegible]ः।
[illegible]ः [illegible] भवति [illegible] ॥८॥
[illegible]कमिदं [illegible]
[illegible] ॥९॥
लभते कविता [illegible]वेत् ।
[illegible]मीमनश्वरीं [illegible]॥१०॥
[illegible]ति शान्ति [illegible] भवेत् ।
विख्यातिश्चापि लोके[illegible] [illegible]प्यान्ते मोक्षमाप्नुयात्॥११॥

॥ इति नीलतन्त्रे परमरहस्ये ताराष्टकं समाप्तम्॥

तारा[illegible]टिका

[illegible]जय तारिणि [illegible] शिव [illegible]
[illegible] फलमर[illegible] [illegible] कुरु [illegible]॥

---

१. [illegible] ।
२. [illegible] [illegible] ।
३. [illegible] ।
४. [illegible]
[illegible]

चिन्तामणिरसि भगवति [illegible] योगीन्द्राणां हृदयनाभे
प्रहरसि मोहध्वान्तमधीरं भासति दीपवत्प्रसादानीरम् ॥
[illegible] सारं [illegible] वेदवंशुक [illegible] ।
पायय [illegible] परिपालय सुखं शीतत्रयभवदावानलदग्धम् ।
संसारोदधिविधिरासिविद्धे विगतोपाधि समाधि सु[illegible] ॥
त्रिविध [illegible] समृद्धि दरिद्रं अति घनचिन्तितारयः [illegible]
माता [illegible] सा सुधा[1] सिद्धिफलिनी गुरुद्रुम[illegible] ।
लीला [illegible] विरह[illegible] भूमि सुखभोगोपमा ।
एकाविदे [illegible]पायः प्रधानपुरुष संज्ञो ज्ञेयः ।
[illegible] गुणः [illegible]दक्षत्वं न तु [illegible] ॥
निर्गुण [illegible] विकार[illegible] नेन्द्रियगम्या सदा [illegible]
हरिहरचतुराननप्रविवेशा [illegible] निराकृति[illegible] ॥
[illegible] सुरासाः[2] [illegible] [illegible]कलिकाकलम् ।
[illegible] प्रसरति [illegible] हरिमुख्यं [illegible] ।
[illegible] भगवति [illegible] [illegible] ।
[illegible] स्थिति [illegible] [illegible] भुवनम्
भवभय[illegible] अग्नि [illegible] [illegible] ।
[illegible] दीपः निष्काल [illegible] घ[illegible] ।
[illegible] त्वयितारिणिलयमेष्यति [illegible] भुवनम् ।
[illegible] मरणैरतिदीनं [illegible] मतिहीनम्[4] ।
पातु [illegible] लब्ध्वा[5] मूर्तिः [illegible] दीप्ताकृति[illegible]
[illegible] कारोपरि[illegible] तदुपरि[illegible] राच्छितपदाम्
[illegible] कमले [illegible] ध्यायति योगी योग[illegible] ।

१. [illegible] ख.पु.पा.।
२. सुधया। ख.पु.पा.।
३. [illegible]रिते। ख.पु.पा.।
४. लीनम्। ख.पु.पा.।
५. [illegible]। ख.पु.पा.।
६. [illegible]। ख.पु.पा.।

हूँ कारो परि देवीं ध्यात्वातस्य महत्वं वेदैर्ज्ञात्वा।
शुद्धस्फटिकशवोपरितारा प्रत्यालीढपदार्पितहारा ।।
नीलजटाटविपिङ्गलजूटे वट्वक्षोभ्यस्तिष्ठति कूटे ।
अनन्तचक्री मण्डितमुण्डे शोणित भोजनरक्तिमत्तुण्डे ।।
मदिरानन्द विघूर्णित नयने प्रचण्ड हसिता कम्पित भुवने।
चन्द्र सूर्य्य शिखिलोचन षण्डे फणिपति कुण्डलमण्डितगण्डे।
प्रकटित नर शिर माला भरणे गजकुम्भस्तनि जडता भरणे।
सूर्य्यकोटि किरणानिकराले खड्गेन्दीवर कर्तृकपाले ।
नीलानीलजटोज्वलकाया लम्बोदरिंजयमोक्षोपाया।
व्याघ्रचर्म्म वसनं सुपिनद्धं दृढ़तरवासुकिरज्जुनिबद्धम्[१]।
अमर शिरोमणि मण्डितपाटे जयजय जय दत्ता भयवादे।
पाण्डुरकुण्डलि[२] लक्ष्यकिरीहे नानारत्न विमण्डित मुकुटे।
एकजटे जय योगिनि सिद्धे योगाचार निरञ्जन बुद्धे।।
नरास्थिधारिणि समुन्नत मुद्रे भस्म विभूषित रूपितभद्रे।
श्मशानचारिणी चित्त विहारे स्फुटतरसिद्धिकरी जयतारे।
सपर चतुर्थ स्वर रजनीशं शून्यं परशुं तदधोदेशम् ।
मध्ये षोडश हनिते[३] शुद्धं अन्ते द्रूँ फटकारनिबद्धम्।।
अयमिहविमलो मन्त्रो ध्येयस्तारिणि[४] तवहृदि कमलोज्ञेयः[५]।
यदि पुनरपि न भवति भयवाञ्छा जननीयोनिविलेपतनेच्छा।
येषां तारिणि मोक्षे कृत्यं तैतस्तव मन्त्रोजाप्या नित्यम् ।
येषां त्वय्यपि भव शुभशिक्षा[६] तेषां कल्पतरौ फलभिक्षा।।
ये सेवन्ते तव पदकमलं तेषां वश्यं भुवनं सकलम् ।

---

१. निबद्धे। ख.पु.पा.।
२. पाण्डव। ख.पु.पा.।
३. दलिने। ख.पु.पा.।
४. ज्ञेय। ख.पु.पा.।
५. धेय। ख.पु.पा.।
६. भिक्षा। ख.पु.पा.।

प्रज्ञाकीर्त्तिर्वाञ्छा विजयः स्फुटतर सुलभ स्त्वयिवरनिचयः।।
वन्दे तव चरणं भयहरणं वाञ्छासागर नीलाभरणं।
मोक्षं लब्धं त्वामहमीडे जयजय झटिति [1]कृताहितपीडे।
त्वाञ्च विशेषण निर्णय नित्यां न वदति वेदस्त्वत्तो भीत्या।
विरुद्धषट पदमति सन्दिग्धो महानवास्थि विभूषित विद्धः।
यै स्तवचरणं नित्यं ध्येयं ब्राह्मणं पदमपि विघ्नं ज्ञेयम्।
सेवन्तेऽभयपदसिद्धा प्रणतनतादपि सुलभाविद्या।
सकृदपिमन्त्र श्रवणाद्भक्ति[2] र्दृढ तरबन्धन रज्जो मुक्तिः।
नश्यति जडता झटितिक्षिप्ता तिमिरोदय इवरविशशिदीप्ता।
उग्रनीला[3] कालीतारा प्रज्ञापारमिता भवसारा ।
लक्ष्मीगौरी वाणीगङ्गा परार्द्ध नामचयैव हृतसङ्गा।
तीर्णोहं भवसागर पारे मति नौवाहिनि मातस्तारे ।
ब्रजामि परमब्रह्मागारं दुर्गस्थानादपि कुरुपारम्।।
एनां पज्झटिकां[4] सुपद्यघटिकां जाऽयेन्छनोत् पज्झटिकाम्।
ये शृण्वन्ति पठन्ति वेद विदुषे दत्वा धारिष्यन्ति ये ।
तेषां मोक्षफलं करस्थकमलं देव्याकृतं निर्मलम्।
भोगः किं विषयस्तथा च विजयः केऽमी कवित्वादयः।।

।।इति श्री शङ्कराचार्य्यकृता पज्झटिका[5] समाप्ता।।

विरुपाक्षकृत तारास्तवनः

।।विरुपाक्ष उवाच।।

जय जय तारे देवि नमस्ते प्रभवतिभवती यदिहसमस्ते।
संसाराम्बुधितरणे तरणिर्हितमनुसरतां सुगमा शरणिः ।
प्रज्ञापारमितेऽमित चरिते प्रणतजनानां दुरितक्षयिते[6] ।

---

१. जय झाटिर्तिकृतज्जिनमीडे। ख.पु.पा.।
२. भुवित्ति। ख.पु.पा.।
३. उग्रानीला। ख.पु.पा.।
४. पंठिका सुपद्य घटिता। ख.पु.पा.।
५. तारापंजाटिका।
६. दुरितं दुरिते। ख.पु.पा.।

[illegible] मानसा [illegible] कृत्यम् ।

[illegible] तिलो विलुनः

[illegible]

[illegible] रयत्तारिण [illegible] कुर्वं [illegible] गात्।
[illegible] विध मनोरथ दानवमा [illegible] देन जटं [illegible]
[illegible] पर्यरि श्रीश्रीणिलिङ्गि [illegible] रश्मए [illegible]

[illegible] स्नात [illegible] मायं आर
[illegible] मत्वयं [illegible] पाठ्य
नीलाब्जाम्बुसनुर्वसुनगोरवनुदि [illegible] ॥
[illegible] तुर्कीमांग दिशालं विभुनारकः [illegible] ॥
[illegible] कणिदे [illegible] ।
[illegible] कुर्व [illegible] मारं हरणम् ।
[illegible] निबद्धः [illegible] ॥
[illegible] त्रिभुवनभूमावपि नि [illegible] ॥
[illegible] पशुकृत्वे धारत [illegible]
[illegible] ओमिति अंकुरा कमलाक्षे [illegible]
[illegible] पश्च त्यक्षरमन्त्र [illegible]

[illegible] ब्रह्मरा [illegible]

[illegible] मध्यात रस नवं तु भवालस [illegible]
[illegible] जननी त्वं जयाख्ये ।
[illegible] मालताडरिताश ।
[illegible] रितिमंधिपरी [illegible] कल्पे
[illegible]
[illegible] मधु [illegible] जयाग [illegible] ।

[illegible]

[illegible] तानं [illegible] [illegible]
[illegible] [illegible]तिम्नत् [illegible]
[illegible]हीन्द्र [illegible]गुखेन त्रिकोणा[illegible] सुरे
[illegible] देवी [illegible]नन्द्या [illegible] [illegible]
श्रद्धानुद्धिः [illegible] तुष्टि[illegible] [illegible] शान्तिः पुष्टि[illegible]।
कर्म्मसमानं फलं तत् पुरुष [illegible]ऽशेष हितमपि [illegible]।
त्रिभुवनजननी स्थिरसुख हेतुर्भवजलधावपि करुणा[illegible]।
[illegible]दीनस्य भयस्य यदस्मिन्कलुषं नाशय [illegible]स्मिन्।।
लोकेन्द्रस्य सुताप्ययमाता वालावृद्धा कालीश्वेता।
स्वाहाकारा स्वधाभिधेया तारेऽतस्त्वं जगति ज्ञेया।
ॐ कारोत्था शैवीशक्तिर्योगमयी त्वं [illegible]।
[illegible]दधानेयं जगतोवश्यं भक्तिं मुक्तिं कुरुतेऽवश्यम्।
मायारूपा[illegible] चरिता [illegible]ता वयसा ललिता।
ज्ञानादद्भुत[illegible]हंसा मोहस्वान्ते कृतविध्वंसा।
वज्रोग्रादि पदद्वय नाम्नाख्याता त्वं सहजे न [illegible]।
अष्टकरूपैरागमदृष्टे तौरकाजय भावोत्कृष्टे।।
दुर्गेभ्यस्त्वं तारयसीति तारानाम्ना तत्ते कीर्त्तिः।
उग्रं तद्धि[4] करोषि समन्तादेकजटेत्वं भाग्युपशान्ता।
दुःख शोक भयमारिणि हन्त्री सात्वं लब्धाविधितोमन्त्री।
सुखगम्या मपित्वां न भजन्ते येतेऽनर्थशते निवसन्ते।।
[illegible]स्त्वं गौरसिगौरीमाया गङ्गा गौतम्यमृतो पाया।
सर्व्वैवत्वं भगवति तारे मामनुकल्पय पतितमपारे।
तव वर लाभादजरामरता सुरता सुलभा[illegible]थ खेचरता।
किमधिकमथवा सिद्धयति मुक्ति स्त्वयियस्यास्ते सुदृढाभक्तिः।।

---

१. छन्दः। सहितविबुधोभुविनिपुनाभान्यः। ख.पु.पा.।
२. गिह। ख.पु.पा.।
३. तत्व। ख.पु.पा.।
४. उग्रापत्ति। ख.पु.पा.।

अञ्जन पादुक गुटिका सिद्धिरणिमादिभिरपि भवति समृद्धिः।
सौर्व्यं राज्यं नवरसभोगास्तवभक्ते स्युस्तेपि नियोगाः।
वश्याकर्षण[1] मोहन भावस्तवमन्त्रस्य च महिमाभावः ।
करुणामृत रसवाशे नयसे देविनमस्ते त्वञ्च विजयसे ।
योजपतित्वामा पत् समये तस्य सदा शुभदायिन्यभये ।
तव चरणेहं पतितोनित्यं कुरुमम चेतसिशोभन कृत्यम्।।

इति विरुपाक्षरचित स्तवः समाप्तः।।

।।शिवसासनेतारास्तवः।।

प्रकट विकटद्रंष्टा घोररूपाट्टाटहासा,
नरशिर कृत माला मेघवर्णातिखर्व्वा।
त्रिभुवनजयदात्री हस्तविन्यस्तकर्त्री,
कर निहितकपाला पातुमामुग्रतारा।।१।।
खर्व्वानीलरूपा कपिल जटधरानागचूड़ान्वित्रद्धा
खड्ंगकापद्महस्ता शवनिहितपदा व्याघ्रचर्मातिभूषा ।
सानन्दालोल जिह्वा प्रहसितवदना वह्निनेत्राविशाला
सा देवी तत्वसारा सकलहितकरा पातुनित्यञ्चतारा ।।२।।
वन्दे मञ्जुलवञ्चन[2] प्रसरक प्रोदभासि नेत्रत्रयाम्।
मायामोहनकारिणीं सुतरणिं संसारपाथोनिधौ ।
वक्षोजद्वयसन्नतां हृतमतेरानन्दपुण्यस्थलीम् ।
व्यालव्याकुलदेहभागशुभगां तारां सुतारां चिरम् ।।३।।
तारां नागेन्द्रहारां शवहृदयतले कुञ्चित श्रीमदाङ्घ्रम्[3]।
द्रीँ कारां सारां त्रिभुवन भवनोदीपनीष्कर्तृरूपाम्।
स्वर्भूभूपाललोकैरतुलगुणयुतैर्जुष्टपादारविन्दां
मन्दारै श्रीमदेकोद्भदजट प्रकटाटोपभीमां[4] भजेहम्।।४।।

---

१. वश्याकर्षमोहनभव। ख.पु.पा.।
२. वन्दे मञ्जुल मञ्जुल प्रशब्दक (शीतकरालनलाधिर्त सुत) ख.पु.पा.।
३. मद्धङ्घ्रीम् । ख.पु.पा.।
४. विकटा। ख.पु.पा.।

त्रिभुवनवनवल्ली स्वर्गमोक्षप्रतानैरतुल फल[१]
वितानेरुग्रतारां लसन्तीम्।
सकलविभवसिद्ध्यै प्रार्थ्यमानां भजेहं
नखर कुसुम भास्वच्चारु प्राणि प्रबालाम्।।५।।
तारे संसार सारे सकलजनहितानन्दसन्दोह दक्षे
दक्षाद्यैः सारभूते स्थिरहृदय दृशालक्षिते पद्मदलाक्षि।
मातर्विश्वैकसारे हरिहर विनुते सर्ववेदान्तबोध्ये
साध्ये[२] सिध्यैः प्रसिध्यैः प्रतिदिनमपरे पाहिमां मुग्धबुद्धिम्।।६।।
तारां तारकहारिणीं नरशिरोमालासमालङ्कृतां
प्रोद्यन्नीरतभासमाशुभजते प्राप्नोति तुङ्गां श्रियम्।
त्वत् पादाम्बुजचिन्तनं प्रकुरुते तत् सूक्तजापं तथा
संसेव्यः कविपुङ्गवैर्विजयते देवी सुतो भूतले।।७।।
नित्यं भावन कानने मृगपति र्योजागरूको तत् [३]साच्चिर्तां।
तारायाः खलुसेवनाय सततं तस्माद्यतस्वेति भो
रानन्दास्पद राजितं यदि चिरं काव्यामृतं वाञ्छसि।।८।।
काव्यव्याकृति सागरं यदिचिरं सन्धा[४] हितुं वर्त्तसे
तत्रालङ्कृति मौक्तिकं यदि समुद्धर्त्तु समाकाङ्क्षसि।
तस्मात्तां महितां महामुनिजनैर्ब्रह्मादिभि सन्ततं
तारां भावय पूजय प्रतिदिनं मोक्षप्रतोलीं सताम्।।९।।
प्रोच्छद्भतज्वलदग्निभास्वरतितामध्यस्थितां भावये
नीलेन्दीवरदामभूषिततनूमापादपद्मद्वयां।
सद्यः कृत्य महीतलोद्भट जटात्तुङ्गोत्तमाङ्गावली
मालाभूषणविग्रहामपिलसन्मांसैकमुष्टिग्रहाम्।।१०।।
खर्व्वां नीलाम्बुजाभां शवनिहितपदां व्याघ्रचर्माकृताङ्गी

---

१. गुण। ख.पु.पा.।
२. वुध्ये। ख.पु.पा.।
३. सायुज्यताम्। ख.पु.पा.।
४. संगाहितुं। ख.पु.पा.।

[illegible]

[illegible] व्याघ्रचर्म [illegible]
नागेन्द्रावद्धनिवीभसित [illegible] पादारविन्दां
वन्दे वृन्दारकन्यां त्रि [illegible] सुग्रतां र [illegible] म्॥१२॥
शिवे हूँ हूँ [illegible] कारभूते [illegible] महिषासु [illegible] नि।
त्रैलोक्यत्राणजनिते तारे देवि नमोस्तुते ॥१३॥
रुधिरासवपानाढ्य वक्रेत्रिभुवनेश्वरि।
मुण्डमाले [illegible] कालि कालि नमोस्तुते ॥१४॥
कपालिके महावक्रे महारावे सुरेश्वरि।
जाड्यं नाशय देवेशि कालि कालि नमोस्तुते ॥१५॥
पिङ्गौग्रैकजटां नमामि सततं लम्बोदरीं त्र्यम्बकां
विद्युत्पुञ्ज निभाननां सुललितां नागाष्टकैर्भूषिताम्।
ताङ्कारार्पित पद्म भाजन धरां हूँ कार बीजोद्भवां
खर्व्वा नीलविशालभालमुदितां त्वामेकामाश्रये ॥१६॥
वन्देत्वाकारशून्यां तदुपरि विशदं पङ्कजं कुङ्कुमाभं
पश्चात् ताङ्कारपद्मे त्रिभुवन जननीं नीलहूँकार जाताम्।
खर्व्वां मट्टहासां कपिलजटधरां नागमुख्यै विशालां
विम्बौष्ठीं त्वाञ्च वन्दे शारगमनवतीं तारिणीमाशुतुष्टाम्॥१७॥

॥इति शिव शासने तारास्तव समाप्तः॥

ब्राह्मतारा कवचम्

॥अष्टक उवाच॥

किमर्थं साधकालोका मन्त्रं साधितुमुद्यताः।
म्रियन्ते साधकाभूत्वा तन्मेब्रूहि समासतः॥

---

१. महि। ख.पु.पा.।

।।वशिष्ठ उवाच।।

न जानन्ति परं मूढाः कवचं ब्रह्मनिर्म्मितम् ।
म्रियन्ते साधकास्त्रेन सदाहंकार संयुताः ।।
तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति कवचं मन्त्रिणः सर्व्वदर्शिनिः ।।
मन्त्रकवचयोर्मध्ये सारदं कवचं मुने ।
मन्त्रेण म्रियते योगी रक्षते कवचैर्यतः[1] ।
तस्मात्तु कवचं दिव्यं मन्त्राणां त्राणकारणम् ।
महाभक्त्या समभ्यर्च्य मासं संपठ्य संयताः ।।
ततो मन्त्रसमारूढ़ा भवन्ति नरपुङ्गवाः ।
यस्मान्नजायते सिद्धिर्यन्त्रः कवचविभ्रमात् ।।
तस्माद्वक्ष्याम्यहं देव कवचं ब्रह्मनिर्मितम् ।
महायोग्यं महागुह्यं कवचं सिद्धिदायकम् ।।

ब्रह्मोवाच–

प्रणम्य शिरसा देवीमुग्रताराञ्च चेतसा ।
वाचापि कर्म्मणा भक्त्या कवचं शृणुनारद ।।
प्राङ्मुखः संयतोभूत्वा शुचिस्तदगत मानसः ।
प्रणवं पूर्वमुच्चार्य्य कवचं चोच्चरेत्ततः ।।
ॐ पूर्व्वस्यां दिशिचाग्नेये दक्षिणे नैर्ऋते तथा।
वारुणे चैव वायव्ये कौबेरे रुद्रगोचरे ।।
छिद्रस्थानेषु सर्व्वेषु वाह्ये सर्व्वासुदिक्षु च ।
पाताले च तथाकाशे पृष्ठतश्चाग्रतोपि वा ।।
पार्श्वयोः सर्व्वकोणेषु[2] ब्रह्मरन्ध्रेषु च क्रमात् ।
कर्त्रीकर्पर भुजादेवी पातुमामुग्रतारिणी ।।
वस्ति[3]देशे ललाटे च लोचने कर्णनासिके ।

---

१. यतः। ख.पु.पा.।
२. कार्येषु। ख.पु.पा.।
३. वक्त्र। ख.पु.पा.।

मुखे कण्ठे च मां पातु भुजयोश्चोग्रतारिणी ।।
हृदयेचोरसि पार्श्वेतत्पृष्ठे पर्व्वसन्धिषु ।
जठरे पायुदेशे च पातुमामुग्रतारिणी ।।
अधमोत्तममध्यानि यानि चाङ्गानि सन्तिमे ।
समस्तरोमकूपेषु पातुमामुग्रतारिणी ।।
शब्दबीज समुद्भूते लोलजिह्वे भयङ्करि ।
कर्त्रीकर्परधरे रौद्रे उग्रतारे नमोस्तुते ।।
आकाशनिलये देवि त्र्यक्षरे ब्रह्मवादिनि ।
सिद्धानां सिद्धिदे देवि नमस्ते उग्रतारिणि ।।
सर्व्वं एवक्षमां देवि भयेभ्यश्चोग्रतारिणि ।
त्वत् प्रसादादुग्रतारे नामं हिंसन्तु हिंसकाः ।।
अभेद्य कवचं बध्वा विचरामिमहीतले ।
प्रसादात्ते महेशानि न भयं मेस्ति कुत्रचित् ।।
वाङ्मनः कर्म्मभिर्येमां क्रूराहिंसन्ति हिंसकाः ।
ते सर्व्वे विलयं यान्ति उग्रतारा निवारिताः ।।
जलेस्थले च पाताले तथा नागात्मके नगे ।
दिवारात्रौ च सन्ध्यायां पातुमामुग्रतारिणी ।।
गच्छतस्तिष्ठतोवापि जाग्रतः स्वपतोपिवा ।
उग्रतारा कृतागुप्तिः पातुदेवो भयोहयहम् ।।
न्यस्यैवं कवचं दिव्यं महदिदं मुनिसत्तम् ।
यान् कामानभिध्यायांस्तांस्तान् प्राप्नोति निश्चितम् ।।
दृष्ट्वा स्तुत्वा नमस्कृत्य संपूज्यचोग्रतारिणीम् ।
प्राप्नुवन्ति नराराज्यं स्वर्गं मोक्षञ्च दुर्लभम् ।।
यं यं काममभिध्यायन जपते चोग्रतारिणीम् ।
तं तं काममवाप्नोति नरोनास्त्यत्र संशयः ।।
तेजः षोढुं न शक्ताः स्युर्ब्रह्मरुद्रादयः सुराः ।
किं पुनर्मानवालोकाः सिद्धगन्धर्व्वचारणाः ।।

देवत्वञ्च महेशत्वं गन्धर्व्वत्वञ्चभोद्विज ।
यक्षविद्याधरत्वञ्च तथेशत्वं[१] प्रयच्छते ।।
इति ते कथितं सम्यक कवचं ब्रह्मनिर्मितम्।
नदेयोऽयं मनुष्याय नाभक्ताय न दुर्जने ।।
शिष्येभक्ते महाशुद्धे सत्यवादिनि पण्डिते ।
कुलीने शुभगेमित्रे प्रियम्बद दृढ़व्रते ।।
महात्मनि सदादेयं पुत्रे च सुपरीक्षिते ।।

इति ब्रह्मोपनिषत् संहितायां ताराकवचं समाप्तम् ।

श्रीमदुग्रतारास्तवः

घोररूपे महाभागे शत्रुपक्षक्षयंकरि।
भक्तेभ्योवरदेदेवि त्राहिमां शरणागतम् ।।१।।
सुरा सुरार्चितेदेवि सिद्धगन्धर्वसेविते ।
जाड्यपापहरेदेवि त्राहिमां शरणागतम् ।।२।।
जटाजूटसमायुक्ते लोलजिह्वानुकारिणि ।
द्रुतबुद्धिकरेदेवि त्राहिमां शरणागतम् ।।३।।
सौम्यरूपे क्रोधरूपे चण्डरूपे नमोस्तुते ।
सृष्टिरूपे नमस्तुभ्यं त्राहिमां शरणागतम् ।।४।।
जडानां जडतां हंसि भक्तानां भक्तवत्सले।
मूढताहर मे देवि त्राहिमां शरणागतम् ।।५।।
हूँ हूँ कारमयेदेवि बलिहोमप्रिये नमः।
उग्रतारे नमस्तुभ्यं त्राहिमां शरणागतम् ।।६।।
बुद्धिं देहि यशो[२]देहि कवित्वं देहि देहि मे ।
मूढत्वं हरमे देवि त्राहिमां शरणागतम् ।।७।।
तारेताराधिनाथास्ये त्राहिमां शरणागतम् ।।८।।
अष्टम्याञ्च चतुर्दश्यां नवम्यां यः पठेन्नरः ।

---

१. तथा अन्यत्वं। ख.पु.पा.।
२. प्रियं देहि। ख.पु.पा.।

षण्मासैः सिद्धिमाप्नोति नात्रकार्य्याविचारणा ।।९।।
मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकाम् ।।१०।।

तदुक्तं वाराही तन्त्रे-

विद्यार्थीकालिकां जपेच्चतुर्वर्गेतु तारिणीम् ।
ध्यानं पूजा पुरश्चर्य्या सर्व्वं नीलासमं भवेत् ।।

।।इति श्रीमदुग्रतारा स्तवः समाप्तः।।

।। इति श्रीशङ्कराचार्यविरचितायां तारा रहस्यवृत्तौ स्तवनिर्णयः दशमः पटलः।।



इदं स्तोत्रं पठेद्यस्तु सन्ध्यंश्रद्धया नरः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा च जायते।।
पडायावादि संग्रामे जाप्ये दाने तथा भ्रमे।
य इदं पठति स्तोत्रं शुभंतस्य न संशयः।। ख.पु.पा.।

अथैकादशः पटलः

अथ विद्यामाहात्म्यम्

यदुक्तं तारारहस्ये-

अथातः संप्रवक्ष्यामि तारारहस्यमुत्तमम् ।
येनानुष्ठान[1]मात्रेण सिद्धयोष्टौ भवन्तिहि ॥
यस्याः स्मरणमात्रेण वाग्विचित्रायते नृणाम् ।
यऽज्ञानादमरत्वञ्च लभेन्मुक्तिश्चतुर्विधाम् ॥

कालीकुलार्णवेपि-

येजपन्ति परां विद्यां नियमेनापि यत्नतः[२] ।
देवाः सर्व्वे नमस्यन्ति किं पुनर्मनुजादयः ॥
वृहस्पतिसमोवाग्मी धनैर्धनपतिर्भवेत् ।
कामतुल्यश्चनारीणां रिपूणां समरेयमः ॥
तस्य पादाम्बुजद्वन्द्वं राज्ञां किरीटभूषणम् ।
तस्य भूतिं विलोक्यैव कुबेरोपि तिरस्कृतः ॥
येन पूजयेद्देवीं नियमे पितृकानने ।
तस्य आज्ञाकरास्तावत् सिद्धयोष्टौ भवन्तिहि ॥
तस्यैव जननी धन्या पिता तस्य सुरोत्तमः[२]।
संप्रदायविदं वक्त्राद्यो एवं वेत्तितत्वतः ॥
अस्य विज्ञानमात्रेण कुलकोटिं समुद्धरेत् ।
नन्दन्ति पितरः सर्व्वेगाथां गायन्ति सोत्सुकाः[३] ॥

---

१. येनाधिष्ठान। ख.पु.पा.।
२. सुरोपमः। ख.पु.पा.।
३. सुखी। ख.पु.पा.

अपिनः स कुले कथित् कुलज्ञानी भविष्यति।
सधन्यः सच विज्ञानी स कविः सच पण्डितः ।।
स कुलीनः स च शुचिः[१] स वशी स च साधकः।
स ब्राह्मणः स संयमी सोपिहोता स दीक्षितः।।
स तीर्थ सेवी पीठानां स निवासी स सर्व्वदः।
स सोमयाजी स व्रती स संन्यासी स दीक्षितः।।
स धर्म्मात्मा स योगी च स मुक्त स च ब्रह्मवित्।
स वैष्णव स शैवश्च स सौरः स च गानपः ।।
स च विज्ञानवेत्ता च य एनां वेत्ति तत्वतः।
अस्ति चेत् त्वत् समानारी मत्समः पुरुषोस्तिचेत्।।
अनिरुद्धसरस्वत्यासमो मन्त्रोस्ति वै तदा।
योग संधारणं सम्यक् ध्यानमस्या न संशयः।।
महापदि महा[२]पाये महाग्रहनिवारणे।
महोत्पति महाशोके महादाहे महागदे।।
महामोहे महाशौर्व्ये महादरिद्रसंकटे।
महारण्ये महाशून्ये महाज्ञाने महाह्रदे ।।
समस्तक्लेशसम्वादे स्मरणादेव नाशमोत्।
तस्यात्मानं[३] ज्ञानमेव ध्यानमस्यात्मदर्शनम्।।
तस्मादस्याः समाविद्या नास्ति तन्त्रेण संशयः।

फेत्कारीये–

जिह्वायां न्यसनादेव मूकोपि सुकविर्भवेत्।।
ज्ञानमात्रेण मन्त्रस्य जपात् सर्व्वज्ञतां नयेत्।
अव्याहतामतिः शास्त्रे विजयीवाक्पतेरपि।।
भावनावस सम्पन्नो भवेद्योगीमहाकविः।
जडोपि यदि शुद्धः स्याद्भावनावशतत् परः।।

१. सुखी। ख.पु.पा.।
२. महापापे। ख.पु.पा.।
३. अस्याज्ञानं। ख.पु.पा.।

लभते श्रीमतां वाणीं मन्त्रस्यलक्षजापतः।।
सुविमलनखदन्तपाणि पात्रा[१]मुदितमनाः परभूषणेषु मौनी।
हरिहरकमलोद्भावा[२] ङ्घ्रिभक्तोभवति वायस[३] सरस्वती निवासः।।
कृतसुकृत सहस्रानेकजन्म प्रभावै-
र्भवति यदि मनुष्यो गुर्व्वधीनश्चिराय।
कथमपि मनुमेनं प्राप्यशिष्टायकस्मै।
निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्।।

अन्यत्रापि-

मनुर्विमृष्यदातव्योज्ज्येष्ठाय सुविनीतये[४]।
पुत्राय किमथान्यस्मै विगोत्राय स्वपौरुषम्।।
मम्बुनात्रिदिना[५]दर्वाक् जिह्वायां न्यसनादयम्।
विनापाठेन मूर्खोपि पण्डितः सोऽपिजायते।।
गुरुचरणसरोजे सर्व्वदाभक्तिभावात्।
परिचरित विधेयो वरस्य सर्व्वात्मनास्यात्।।
अनुदिनमनुऽमेनं मानयन्मानवोस्मै[६]।
भवति जगति वादि प्रौढ़[७] सिद्धान्तहन्ता।।
सर्व्वदागोपयेदेनं मन्त्रं सद्गुरुमेव च।
तेन वीर्य्यवती विद्या निर्वीर्य्यास्यात् प्रकाशतः।।
उत्पादक ब्रह्मदात्रोर्गवीयान् ब्रह्मदः पिता।
तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम्।।
न कदापि भवतिमूर्खो मनुमेनं वेत्ति यो मनुजः।
त्रिजगति भवति ख्यातो विविधायमनोः पूजां मनुष्यः।।

---

१. पादो। ख.पु.पा.।
२. चरणारविन्द। ख.पु.पा.।
३. चिराय। ख.पु.पा.।
४. हितकारिणी। ख.पु.पा.।
५. अधुना। ख.पु.पा.।
६. भावयंमानवोसौ। ख.पु.पा.।
७. द्वैत। ख.पु.पा.।

यस्मिनदिवसे लभते मनुमेनं तत्रतुल्लाभः स्यान्नियतम्।
भवतिव्य[1]मपि स सद सत् कर्म्मणोरुभयोः ।।
विद्याब्रह्मेणमित्याह सेवधिस्तेस्मि रक्षमाम्[2] ।
असुयकायमां मदोस्तथान्यां वीर्य्यवन्तमाम्।।
यमेवत्तशुचिं विद्यान्नियतं ब्रह्मवादिनम् ।
तस्मै मां ब्रूहिविप्राय निधिपायाप्रमादिने ।।
क्षिप्रप्रसादा जगतां[3] तथा नील सरस्वती।
नीलसारस्वते तन्त्रे कविता विघ्नकारिणी।।
विशेषतः कलियुगे मत्प्रसादाद्भविष्यति ।
मन्त्रस्य ज्ञानमात्रेण अनुभावद्वयं भवेत् ।।
तात्कालिकी च कवितापरैरनभिभाविता[4] ।
सिद्धमन्त्रो यदामन्त्रीवालिशस्यापि मूर्द्धनि ।।
करं दत्वाजपत्यासु[5] सोपि श्लोका न करोत्यतः।
विद्या वेदानवाप्नोति कीर्त्तिमायुः सुतान् बहून् ।
संसाराः श्रीसरस्वत्योर्यत्र सारस्वतो मनुः ।।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ विद्यामाहात्म्यम् एकादशः पटलः।।



१. व्यत्ययमपि। ख.पु.पा.।
२. साम। ख.पु.पा.।
३. भजनां सदा। ख.पु.पा.।
४. भाव्यता। ख.पु.पा.।
५. करदत्वादिशत्याशु सोपि श्लोकां करोत्पुनः।

अथ द्वादशः पटलः

अथ भावना निर्णयः

भावनावशेति यत् सूचितं तद्विधिः कथ्यते। तदुक्तं भावचूडामणौ।

भैरव उवाच

समयाचारसङ्केतं भावसङ्केतमेव च ।
सूचितं तु महादेवि कथयस्वानुकम्पया ।।
सर्व्वतन्त्रेषु विद्यासु भाव[1]सङ्केतमेवहि ।
तथाहि शक्तितन्त्रेषु विशेषात् सर्व्वसिद्धिदम् ।
रहस्यानां हि मन्त्राणां यदि भावो न विद्यते ।।

।।श्रीदेव्युवाच।।

भावस्तु त्रिविधो[2] देव दिव्यवीर पशुक्रमात् ।
गुरवस्तु त्रिधाचात्र तथैव मन्त्रदेवता।।
आद्यभावो महादेव प्रेयान् सर्व्वसमृद्धिदः ।
द्वितीयो मध्यमश्चैव[3] तृतीयः सर्व्वनिन्दितः।।
बहुजापात्रथा होमात् कायक्लेशादि विस्तरैः ।
न भावेन विनादेव तन्त्रमन्त्राः[4] फलप्रदाः ।।
किं वीर साधनैर्लक्षैः किमाकृष्टि कुलाकुलैः[5] ।

---

१. भाव। ख.पु.पा.।
२. त्रिविधा। ख.पु.पा.।
३. प्रोक्त। ख.पु.पा.।
४. मंत्रविद्या। ख.पु.पा.।
५. कुलाचारकर्म्मण। ख.पु.पा.।

किं पीठपूजनैश्चैव किं कन्याभोजनादिभिः ।।
स्वयोषित् प्रीतिदानेन किं परेषां तथैव च।
किं जितेन्द्रिय भावेन किं कुलाचार कर्म्मणा ।।
यदि भाव विशुद्धात्मा नस्यात् कुलपरायणः।
भावेनलभते मुक्तिं भावेन कुलवर्द्धनम् ।।
भावेन गोत्रवृद्धिस्याद्भावेन कुलसाधनम्।
किं न्यासविस्तरेणैव किं भूतशुद्धिविस्तरैः ।।
किं तथा पूजनेनैव यदि भावो न जायते।
केन वा पूज्यते विद्या न च केन प्रजप्यते।।
फलाभावश्च[१] देवेशि भावाभावात् प्रजायते।
एतद्रहस्य कथने शङ्कते मम मानसम् ।।
त्रिलोकीमत् पराप्रायः सर्व्वत्र तत् समागमः।
निरीक्ष्यनिर्जनं देव कथं तत् कथयामिते ।।

।।भैरव उवाच।।

नीलद्वयं[२] समवरुह्य पुनः[३] प्रयान्तो
नीलम्बराभरणमाल्य विभूषिताङ्गी
निद्रापटेल जगतां प्रतिबन्ध्य[४]चेतः
खड्गायुधा भगवती भवदुःखहन्त्री ।।
त्वत् प्रसादान्महादेवि विद्या स्वप्न[५] विरोधिनी।
सर्व्वमाया प्रपञ्चावा दीक्षीणेयं महेश्वरि ।।
विद्या[६]ते देवि सर्व्वेषां भूतानां स्वापकारणम्।
करोमि कथयत्वं मां यदि पुत्रत्वमागतः ।।

---

१. वाश्च। ख.पु.पा.।
२. नीलंहयं। ख.पु.पा.।
३. पुरः। ख.पु.पा.।
४. रुध्यतेतः। ख.पु.पा.।
५. आसुपूजा विरोर्द्धनी। ख.पु.पा.।
६. विद्यते। ख.पु.पा.।

देव्युवाच-

प्रथमं दिव्यभावस्तु कथ्यते शृणु सादरम्।
यद्वर्णं देवता यत्र तत्तेजः पुञ्जपूरितम्॥
तेजोमयं जगत्सर्व्वं विभाव्य मूर्त्तिकल्पनम्।
तत्तन्मूर्त्ति[१] मयैर्मन्त्रैः स्वेन स्वेनैव वा पुनः॥
स्वात्मानं तन्मयं दृष्ट्वा सर्व्वं भावं तथैव च।
तत् सर्व्वं योषित ध्यात्वाचिन्तयेद्यतमानसः॥
अशेषकुलसम्पन्ना नानाजाति समुद्[२]भवा।
नानादेशोद्भवावापि गुणलावण्यसंयुता॥
द्वितीयवत्सरादूर्ध्वं यावत् स्यादष्टमाब्दिकम्।
तावत् कुमारी विज्ञेया यन्त्र मन्त्र फलप्रदा॥
कुमारीपूजनाच्चैव कुमारीभोजनादपि।
एकद्वित्र्यादि बीजानां फलद नात्र संशयः॥
ताभ्यः पुष्पं फलं वापि अनुलेपादिकं तथा।
बलिप्रियं च नैवेद्यं दत्वाततभावपूरितः॥
कृत्वा तदङ्गमात्मानं वालभाव विचेष्टितः।
ताभिः प्रिये कथालाप क्रीड़ाकौतूहलादिकम्॥
यथातथं[३] तृप्तिमुक्त्वा कृत्वासिद्धिश्वरो भवेत्।
तस्मात्षोडश पर्य्यन्तं युवतीति प्रचक्षते॥
तत्रभावः प्रकाशश्चेत् सभावः परमोमतः।
रक्षितव्याः प्रयत्नेन अक्षतास्तत्रकारयेत्॥
मूलयोगे कृते तत्र सप्ताहान्मरणं भवेत्।
नं विष्णुस्तु हरिः शम्भुर्नदेवी नापि षोडशी॥
न च मृत्युञ्जयोवापि नन्यासानापि भावना।
तस्य मृत्युक्षये देवि प्रभवन्ति न देवताः॥

---

१. एतन्मूर्त्ति। ख.पु.पा.।
२. कुलोद्भवा। ख.पु.पा.।
३. यथातथातत्प्रियकृत्। ख.पु.पा.।

शस्त्रेण[1] शूलयोगेन सर्पदंष्ट्र विषेण वा।
रौद्रेणाति ज्वरेणैव महाव्याधिवशादपि।।
म्रियन्ते तेन पापेण सत्यं सूत्रित[2] निश्चितम्।

।।भैरव उवाच।।

चतुर्थाश्रमिणां देवि मोक्षदात्वं सदाकथम्।
कुलभाव विरोधित्वात् संशयं ममदूरय।।

।।देव्युवाच।।

मोक्षद्वारन्तु[3] बहुधापद्यस्ति कुलभैरवः।
केवलं कुलयोगेन प्रसीदामि न संशयः।।
चतुर्था श्रमिणां देव अवधूताश्रमोमहान्।
तत्राहं कुलयोगेन प्रसन्ना मोक्षदायिनी।।
यदि न स्यात्तथावत्स शृणुतत् कथयामिते।
कुलभावे समुत्पन्ने संप्राप्य च तदाज्ञया।।
तदा योगी विमुक्तः स्यात्तां संपूज्य कुलान्तरे।

।।कुलार्णवे।।

कुण्डलीशक्ति विवरे तदा योगं समभ्यसेत्।।
निर्द्वन्द्वो निरहङ्कार शुद्धनाडी गणोव्रती।
मृद्वासने समासीन खगसंयमने रतः।।

।।तदुक्तं रुद्रयामले।।

सुखासने समास्थाय सुखमेवं विचिन्तयेत्।
मेरुदण्डवहिः पार्श्वे चन्द्र सूर्य्यात्मकेशिवे।।
मध्ये सुसुम्ना संदिष्टा[4] तन्मध्ये चित्ररूपिणी।
तन्मध्ये ग्रथितं[5] पद्मं मूलादि पद्मषटकम्[6]।।

---

१. शास्त्रेणशूलयोगेनागष्ट। ख.पु.पा.।
२. शृणुतत्र निश्चितम्। ख.पु.पा.।
३. द्वारस्तु। ख.पु.पा.।
४. संशलिष्टा। ख.पु.पा.।
५. तयैव ग्रथितं नित्यं। ख.पु.पा.।
६. षट्ककम्। ख.पु.पा.।

कालिकोऽङ्कार रूपेण डाकिन्याद्युपलक्षितम् ।
मूलद्वारं समासाद्य स्थितानागस्वरूपिणी ।।
वायुना[१] भिद्यते रन्ध्रं दृढ़ं विद्रावयेत्ततः ।
उच्छावासोज्ज्वलकामस्य खिशयाति समुज्वलम् ।।
प्रतिचक्रं प्रबुद्धासौ जीवात्मानं परेकुले ।
नियोजयति तद्योगादमृतं क्षरते चिरात् ।।
व्योम प्रोद्भिद्यमानौ तु गतौ चन्द्रदिवाकरौ ।
अथो[२] रन्ध्रं महापद्मं क्रोडीकृत सुसुम्नया ।।
व्याघुट्य नाडिका मध्य गतछिन्द्रान्तरं गतौ ।
ऊद्धर्वंभित्वातुवैलिङ्गं दृढं तत् क्षरती ततः ।।
वह्निरुद्धमनाकाङ्क्षाकारिणी मोक्षदायिनी ।
जीवेनाकृष्यसंबद्धा स्थितापरमसन्निधौ ।।
एतदभेदं विजानाति भित्वा याति परं पदम् ।
अदृष्ट धातुर्जीवासौ वहिर्याति दिने दिने ।।
दिनेशाङ्गुलिमानेन तदर्द्धं चोपवासतः ।
द्विगुणं रति कालेस्यात् त्रिगुणं भोजनाद्वहिः ।।
अत उर्द्धं वहिर्देवं त्रिगुणं यदि दैवतः ।
न्यूनं वा तदधः प्राणः शरीरं परिमुञ्चति ।।
शरीरे शमतां नीत्वा न्यूनां वा वटुकेश्वर ।
कुम्भत्वा[३]दधोवायुं कुण्डलीमुखवर्त्मनि ।।
योजयित्वा ततोजीवं नीत्वा नादावसानकम् ।
गमागमं कारयित्वा सिद्धो भवति मानवः[४] ।।
पीयते खाद्यते यत्तु सर्व्वं कुण्डलिनीमुखे ।
हुत्वा सिद्धिमवाप्नोति न च बन्धेन वाध्यते ।।

---

१. वाद्यपुनाभिद्यतेवध दढाविद्रावयेत्ततः। ख.पु.पा.।
२. अधोवक्त्र। ख.पु.पा.।
३. कुम्भयित्वा। ख.पु.पा.।
४. नापरः। ख.पु.पा.।

भिक्षाकार्य्या न च स्वार्थं कुण्डलिन्याः कृते पुनः।
रेमातुर्देहि मे भिक्षां कुण्डलीं तर्पयाम्यहम् ॥
अवधूताश्रमेस्थित्वा भैरवाननुतत्परः।
भैरवोहं न अन्योस्मि न देवो मत् परः क्वचित् ॥
तन्त्र मन्त्राञ्चनं सर्व्वं मयिजातं न चान्यथा।
शिवोहं भैरवानन्द मत्तोहं कुलनायकः ॥
रक्तचन्दन दिग्धाङ्गोरक्तकौपीनभूषितः।
रक्तमाल्याम्बरधरो हेतुयुक्तः सदाभवेत् ॥
एवं भिक्षां वज्रनभिक्षुर्भैरवाचारतत्परः।
क्षीयते न च पापेन बध्यते न च जन्तुना ॥
यत्र देशे स्वयं याति सदेशः क्षेत्र नायकः।
अत्र निन्दापरायेतु नश्यन्ति तत्क्षणात् प्रभो ॥
तस्माद्यत्नात् पूजितव्यो [1]तिरस्कार्य्य एव हि।
यत्रेछावर्त्तते तस्य तत्कार्य्यं प्रियमप्रियम् ॥
तथान्यं देव देवेश विज्ञोप[2]चारिस्तवम्।
पूजयन्ति महादेवीं कुलाङ्गे दृष्टि मात्रतः ॥
पुष्पं गन्धञ्चताम्बूलं नैवेद्यं यत्र मद्भवेत्।
मनसात् समुत्सृज्य बाह्यतः कुलवारिणा[2] ॥
आत्मने तत् समायुक्त देवी रूपः कुलेश्वरः।
न पूजा नापि तन्यासो नाधिष्ठान व्रतादिकम् ॥
पूर्णोहं भैरवश्चाहं नित्यानन्दोहमव्ययः।
निरञ्जन स्वरूपोहं निराकारस्त्वहं प्रभुः ॥
सर्व्वशास्त्रार्थयुक्तोहं सर्व्वमन्त्रार्थपारगः।
नास्मात् परतरोदेवी न जातो न जनिष्यति ॥
आनन्दरूपवान् वुद्धः सर्व्वेषां प्रियकारकः।

---

१. विलोच्याचार विस्तारः। ख.पु.पा.।
२. चारिणा। ख.पु.पा.।

युक्तदुर्गन्धमत्स्यादित्याज्यं दिव्यैर्वलिप्रियैः ।।
नाना सुगन्धि संयुक्तैर्मांसादि भोजनं चरेत् ।
सुगन्ध्यामल तैलाद्यैर्नानाङ्गरागविस्तरैः ।।
स्नानं कार्य्यं चाति शुद्धं सूक्तं वासोऽभिधारयेत् ।
सुगन्धिपुष्पमालाभिः स्वर्णालङ्कारभूषणैः ।।
स्निग्धं सुमधुरं देहं कामरूपं मनोरमम्।
कृतार्थं मङ्गलं देहं मृदुभाषणतत्परः ।।
नाम्नामधुमतीतत्र जायते नात्र संशयः ।
मधुमत्याः फलं देव कथयामि शृणुष्व मे ।।
सुधाधारधरावाणी वक्रान्तस्य[1] प्रजायते ।
सर्व्वज्ञः सर्व्वशास्त्राणमधिपः कुलनायकः ।।
सूर्य्यचन्द्रावधिः पृथ्व्यां भुनक्तिबहुलं सुखम् ।
देवकन्याप्सरोभिस्तु दिव्यगन्धर्व्वचारणैः ।।
नानाविचार[2] सम्बन्धैः कुलाकुलकलाविधैः ।
नृत्यैर्गीतैश्च मधुरैर्नानोपाय रसायनैः ।।
अमृतार्थे प्रीतिकरैर्देव भोग्यैः सुदुर्लभैः ।
देवकन्या हस्तगत[3] रथमारुह्यसोत्सुकाः ।।
आयाति साधकाकांक्षहृदया परमेश्वरी ।
यत्र कामेश्वरो देवश्चिन्तागतमुपागतः ।।
तत्रैव याति सततं देवकन्याः सहस्रशः ।
इन्द्रभोग्यां पुरीकृत्वावसन्ति साधकैः समम् ।।
तत्रापगत पापात्मा भुक्त्वातु बहुधासुखम्[4]।
चिरकालं भुविस्थित्वा चान्ते मुक्तिमवाप्नुयात् ।।
ब्रह्माण्डभाण्डसंभेदात्तेन जीवेत् स्वसिद्धिषु ।

---

१. मुखा। ख.पु.पा.।
२. विलास। ख.पु.पा.।
३. गतै। ख.पु.पा.।
४. सुखी। ख.पु.पा.।

एषतेकथितो देव दिव्यभावः शुभावहः ।।
न देयो यस्य कस्यापि पशौगोप्यः प्रयत्नतः ।
वीरभावो महादेव कथ्यते शृणु भैरव ।।
निर्द्वन्द्वमानसो भूत्वा हृदा कामकला तनुः ।
इदं बीरफलं[१] देव देववन्द्यं मनोहरम् ।।
यद्देशे विद्यते वीरस्तत् फलं वापि भैरव ।
न च मारीभयं तत्र न च चौर भयादिकम् ।।
सुमङ्गलं सदा तत्र धनपुत्रविवर्द्धनम् ।
लक्ष्मीस्तत्र महादेवि सुस्थिरा सर्व्वदा भवेत् ।।
योगिनीभिर्नलुप्तं तनु च पापेन युज्यते ।
यत्र तत्र कुजेवारे श्मशाने गमने कृते ।।
पूजाफलं भवेत्तत्र सप्तवासरसन्मितम् ।
चतुर्द्दश्यां गते देव[२] पक्ष पूजा फलं लभेत् ।।
नागते नार्चिते भावे पशुरेव न संशयः ।
नान्योस्यादधिकोदेव इति चिन्तापरायणः ।।
मादकद्रव्यं त्यक्त्वा भवेत् फलपरायणः ।
साधके क्षोभमापन्ने मम क्षोभः प्रजायते ।।
तस्माद्यत्नाद् भोगयुक्तो भवेद्वीरतरसुखी ।
भोगेन मोक्षमाप्नोति भोगेन कुल साधनम् ।।
बिना हेतु मनासाद्य भयुक्तो महेश्वरः ।
न पूजां मानसीं कुर्य्यान्नध्यानं न च चिन्तनम् ।।
यद्यद्वदति निद्राति यत् करोति यदर्च्चति ।
तत् सर्वाकुल रूपन्तु ध्यात्वा तु बिहरेत् सुखी ।।
तस्माद् भक्तया च पीत्वा च पूजयेत् परमेश्वरीम् ।
नात्र च श्रुति दोषोस्ति नापरो दोषपूरणम् ।।
एकाकी निर्जने देशे श्मशाने पर्व्वते वने ।

---

१. कुलं। ख.पु.पा.।
२. तत्र। ख.पु.पा.।

शून्यगेहे नदीतीरे निःसङ्के[1] विचरेन्मुदा ।।
बीराणां जपदानन्तु[2] सर्व्वकाले प्रशस्यते।
सर्व्वदेशे सर्व्वपीठे कर्त्तव्यं नात्र संशयः।।

तथा भगवद्वाक्यम् –

ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ बह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ।।

।। इति।।

अन्तर्यजन काण्डे–

अन्तर्निबन्धन निबन्धन मेघमाने ।
मायान्धकार परिपन्थिनि सम्बिदग्नौ।।
कस्मिँश्चिदस्तु मरीचिविकाशभूमौ ।
विश्वं जुहोमि वसुधादि चिदावसानम्।।
यदि विप्रोभवेत् श्रेष्ठः कुलद्रव्यपरायणः।
तदानेनविधानेन कर्त्तव्यं कुलतोषणम् ।।
अपरा पुष्पगर्भेतु कुलस्थानं [3]मनोरमम् ।
सर्व्वदेशसुखं तत्तु महाकामकलात्मकम्।।
हयाविज्ञ[4] सुमेदेव स्त्रयमस्ति सदाशिवः।
तन्मुखे लघुमादाय पुष्पमध्ये तु चन्दननम् ।।
रक्त कुङ्कुमरागं वा दत्वा तत्र शिवात्मकम् ।
योर्च्चयेत् शिवशक्तयोस्तु ऐक्यं सद्भावयन् धिया ।।
क्षणं विचिन्त्यतत्रैवं सञ्चिन्त्य परमेश्वरीम् ।
जप्त्वातदेवकुण्डोत्थं द्रव्यं परमदुर्लभम्।।
यत्रापराजितापुष्पं जवापुष्पञ्च भैरव ।
करवीरे रक्त शुक्ले द्रोणपुष्पञ्च तिष्ठति ।।

---

१. सङ्गोविहरेत्सदा। ख.पु.पा.।
२. कालात्सु। ख.पु.पा.।
३. मनोहरम। ख.पु.पा.।
४. हयारिकु। ख.पु.पा.।

तत्रदेवी वसेन्नित्यं तद्यन्ते पूजनं मम ।
दत्ते चैकजबापुष्पे पट्टवस्त्रफलंलभेत् ।।
ब्रह्महत्यादिकं पापं क्षणान्नश्यति निश्चितम्।
जपरायास्तु महात्म्यं वक्तुं न हि महेश्वर[१] ।।
वीरसाधनकार्य्यन्तु कर्त्तव्यं बीरपुरुषैः ।
दिव्यैरपि च कर्त्तव्यं पशुभिर्नचपामरैः ।।
वरं पामरकार्य्यन्तु पशोरिति निश्चितम् ।
यद्यत्तत्त् पुराप्रोक्तं सङ्केतं मन्त्र साधनम् ।।
अञ्जनं गुटिकादींश्च कुर्य्याद्वीरो महावलः ।
दिव्ये वीरे न भेदोस्ति यद्भेदं कथ्यते तव ।।
शान्तो विनीतो मधुरः कलालावण्यसंयुतः ।
दिव्यस्तु देववत् प्रायोवीरश्चोद्धतमानसः ।।
विभूतिभूषणै[२]र्वापि चन्दनै वापि लेपितः ।
आकारगोपनो वापि व्यक्तोवा कुल भैरव ।।
रक्तचन्दन दिग्धाङ्गो वैष्णवोवाप्यवैष्णवः ।

तथा च भगवद्वाकयम् –

लोके[३] ना र मतो योगी योगसिद्धिश्च विन्दति ।।

तथा च तन्त्रान्तरे–

क्वचिद्दष्टः[४] क्वचिद्भ्रष्टः क्वचिद्भूतपिशाचवत् ।
असंस्कृतकेशजालः संस्कृतो वा कुलेश्वरः ।।
अपमाने च पूजायां हृष्टपुष्टः सदाभवेत् ।
देव निन्दापरो वापि तत् पूजादि परोपिवा ।।
पूजारतस्तद्रहितः कुललोपमते स्थितः ।
निजभावसमायुक्तो देववत् विचरेत् क्षितौ ।।

---

१. महेश्वरी
२. भूषितै। ख.पु.पा.।
३. लोके। ख.पु.पा.।
४. शिष्टः। ख.पु.पा.।

स्वकुलान्ते पुरश्चरर्य्यं रात्रौ कार्य्या न चान्यथा।
वेदहीने द्विजेदेव यथामन्त्री न संस्क्रिया[1]।।
विष्णुभक्तिं विनादेवी भक्तिर्न प्रभवेत्तथा।
शक्तिं[2] ज्ञानं विनामुक्तिर्यथाहास्याय कल्पते।।

तथोक्तं दुर्व्वासिसा–

भगवता सिद्धान्तैर्बहुभिः प्रमाणगणितैरन्यैव विद्यते
द्यातमो नक्षत्रैरिवसर्व्वमन्धतमसं तावन्ननिर्भिद्यते ।
यावत्ते यावत्ते सवितेव सम्मतमिदं नोदेति विश्वान्तरे
जन्तोर्जन्मनिवारणैक भिदुरं श्री शाम्भवि श्री शिवे ।।
गुरुं विना यथामन्त्रेणाधिकारः कथञ्चन ।
पतिर्हीना यथा नारी सर्व्वकर्म्मविवर्जिता ।।
कुलं विना तथा देव[3] वीरो वा मम साधकः।
नाधिकारीति कौलेयस्तस्माद्भाव परोभव ।।
अविनीतं कुलं यस्य स कथं मम पूजकः ।
तस्मात् यत्नात्तथाकार्य्यं यथास्या द्विनयान्वितम्।।
भावाभावात् कुलं शास्त्रे नाधिकारः कथञ्चन ।
तेन भाव विशुद्धस्तु साधकः कौलिकोभवेत् ।।

देव्युवाच–

पशुभावं प्रवक्ष्यामि शृणुष्व सुसममाहितः ।
यथाविधि पशोदीक्षां गृहीत्वा भावतत्परः ।।
प्रथमं पूर्वसेवार्थं यत्नतः[4] शुद्धिमाचरेत् ।
न मत्स्यभोजनं कुर्य्यान्नस्त्रियं मनसास्मरेत्।।
न परद्रव्य लोभस्यान्नभोगे मानसं भजेत्।
स्निन्धुतीरे पर्व्वते वा कानने वा सुरालये।।

---

१. मंत्रोहतः प्रभुः। ख.पु.पा.।
२. शाक्तंज्ञानं। ख.पु.पा.।
३. दिव्यं।. ख.पु.पा.।
४. अयुतः। ख.पु.पा.।

विल्वमूले विविक्ते वा[१] पुण्यक्षेत्रेसुशोभने ।
न शूद्रदर्शनं कार्य्यं कौटिल्यं दूरतस्त्यजेत् ।।
देवता शुद्धभावेन ध्यातव्या सुसमाहितैः ।
त्रिसन्ध्यं देवपूजास्यात्रिसन्ध्यं जपमाचरेत् ।।
रात्रौ मन्त्राश्च यन्त्रश्च स्पृशेन्नैव कदाचन ।
न मन्त्रमुच्चरेद्रात्रौ मौनीस्यात् सर्व्वकर्म्मसु ।।
पर्व्वकाले स्त्रियं नैव प्रगच्छेत् साधकोत्तमः ।
पुष्पं गन्धं कुलं चैव समानीय प्रपूजयेत् ।।
मैथुनं तत् कथालापं तग्दोष्ठीः परिवर्जयेत् ।
ऋतुकालं विनागच्छेन्नच स्वस्त्रियमादरात् ।।
पुराणश्रवणे श्रद्धा वेद वेदार्थतत्परः ।
न रात्रौ भोजयेद्विद्वान् ताम्बूलं परमेश्वर ।।
गुरुणा यद्यदादिष्टं तत् सर्व्वं यत्नतश्चरेत् ।
अपितत् कुसुमञ्चैव हेतुद्रव्यञ्चभैरव ।।
स्पष्टास्त्रियं त्रिरात्रे तु[२] पञ्चगव्येन शुद्धयति ।
रक्तवस्त्रं न गृह्णीयादेवीभक्तिपरायणः ।।
विष्णुभावोक्त कल्पा[३]दितदनुष्ठानमेव च ।
कार्य्यं वीरकथालापं कुर्य्यादिव निन्दनम् ।।
नित्यश्राद्धं गवांग्रासं सन्ध्यावन्दनमेव च ।
तीर्थस्नानं पीठदेशे गमनं धर्म्मतत्परः ।।
पशुस्तुद्विविधोदेव पूर्व्वेण तु स भैरव ।
अस्याधिकारः पूजायां न गुरुत्वेकथञ्चन ।।
पूर्व्वस्यनाधिकारोस्ति पूजादेशगतागते ।
पूर्व्वस्तु सर्व्वकौलेयैर्वहिस्कार्य्यः स्वदेशतः ।।
पूर्व्वदर्शनमात्रेण कुलदर्शनमाचरेत् ।

---

१. तु.। ख.पु.पा.।
२. ण। ख.पुं.पा.।
३. विष्णुक्लपोक्त तंत्रेण तदनूष्ठानमेवच। ख.पु.पा.।

ब्रह्महत्यादिकं पापं वरं सह्यं न च प्रभो ।।
पूर्व्वदर्शनमात्रन्तु सत्यं सत्यं बदाम्यहम् ।
ममात्मा सोपि देवेश विभुरित्यपि स प्रभो ।।
तथापि तत्तु मे शङ्का जायते तत् पदे पदे ।
वरं कुलं परित्यज्यं वरं स्वकुलहिंसनम् ।।
वरं स्वकुलनिन्दास्याद्वरं स्वकुलवन्दनम् ।
वरं स्वकुलहानिस्तु वरं स्वकुलकुट्टनम् ।।
कायेन मनसावाचा वरं स्वकुलपातनम् ।
न कुर्य्यात् पूर्व्वसङ्गश्च ममाङ्गँक्षयकारणात् ।।
कुलशास्त्रे द्वयं पापो गर्विष्ठः कुलनायकः ।
स्वकुले महती निन्दा परायोगः[१] कुलेश्वरः ।।
तस्मादपि च तत् पापं पशुयोगात् प्रजायते ।
सर्व्वथा तत्र भावौद्वौ न प्रकाश्यौ कथञ्चन ।।
सभावश्च विभावश्च पशुर्द्वेधा प्रकीर्त्तितः ।
सभावः पशुभावेन जन्मत्रंय विभावनात् ।।
वीरभावो भवेद्दे[२]व ततोदेवः प्रजायते ।
दैवाच्च जायते वीरो वीराद्देवः प्रजायते ।।
दैवेवीरे न सन्देहः साम्यमित्यभिधीयते ।
भावस्तु मनसोधर्म्मः शब्द स हि कथं भवेत् ।।
तस्माद्भावो हि कर्त्तव्यो दिऽमात्रं समुदाहृतम् ।
यथेक्षुगुडमाधुर्य्यं रशनै[३]र्ज्ञायते प्रभो ।।
तथा भाव विभावश्च मनसापरिभाव्यते ।
एक एव महान् भावो नानात्वं भजते प्रभो ।
उपाधि भेद भावेन भावभेदोमयीष्यते[४] ।।

१. पर। ख.पु.पा.
२. भवेद् देवो। ख.पु.पा.।
३. रसनै। ख.पु.पा.।
४. हि यिज्यते। ख.पु.पा.।

तथा नागभट्टे–

नित्यानन्द इति श्रियः पतिरिति श्री वासुदेवः पुमान् –
आनन्दाच्युत इत्यचिन्त महिमा योगीयते योगिभिः।
स्थानेस्मिन् परमेश एष भगवान् व्यक्ता[1]भवत्यव्यय।
साक्षी वाहुरिवान्तर[2] गतश्चन्द्रार्कयोर्मण्डले ।।
आनन्दघन सन्देहे प्रभुः प्रकृतिरूपधृक् ।
रसरूपः स एवात्मा स प्रभुः परमोमतः ।।
श्रोतव्यः स च मन्तव्यो निध्यातव्यः स एव च।
साक्षात् कार्य्यश्चदेवेश आगमैर्विविधैः प्रभोः ।।
श्रोतव्यः श्रुतिवाक्मे ह्योमन्तव्यो मननादिभिः ।
सोपपत्तिभिरेवायं ध्यातव्यो गुरुदेशतः ।।
तदा स एव सर्व्वात्मा प्रत्यक्षी भवतिक्षणात् ।
तस्मिनदेहे[3] तु देवेश प्रत्यक्षः परमेश्वरः ।।
भावैर्वहुविधैर्देव भावस्तत्रापि नीयते।
भुक्त्वा[4] नानाविधं ग्रासं[5] गविचैको यथा रसः ।।
दुग्धाद्यभ्यास योगेन नानात्वं लभते प्रभुः।
तृणेन जायते देव वसस्मात् परोरसः ।।
तस्माद्यधि यतोहव्यं तस्मादपि रसादयः ।
स एव कारणं तत्र तत्कार्य्यं स च लभ्यते ।।
दृश्यते च महादेव न कार्य्यं न च कारणम् ।
तत्रैवायं स एवात्मा नानाविग्रहयोनिषु ।।
जायेज्जनिष्यतेजातः कालभेदाविभाव्यते ।
स जातः स मृतोवाद्धः समुक्तः सत्सुखी[6]पुमान् ।।

१. व्यक्तो।
२. रात्मनिवापुरं। ख.पु.पा.।
३. सहेतु। ख.पु.पा.।
४. भुक्तवा। ख.पु.पा.।
५. ग्रामं। ख.पु.पा.।
६. ससुखी पुमान् । ख.पु.पा.।

सस्त्रीनपुंसकश्चापि सविज्ञोप्यज्ञ एव च।
नानाध्यानसमायोगान्नानात्वं भजते[1] प्रभुः ॥
अव्यक्तं स च व्यक्तं[2] स्यात् प्रच्छत्या ज्ञायते ध्रुवम्।
तस्मात् प्रकृतियोगेन नान्यथा ज्ञायते क्वचित् ॥
विनाघटत्वयोगेन प्रत्यक्षो न यथा घटः।
इतराद्भिद्यमानोपि न भेदमुपगच्छति ॥
मां विना पुरुषोभेदो न च याति कथञ्चन।
न प्रयोगैर्न च ज्ञानैः श्रुत्वा च न गुरुक्रमैः ॥
प्रकृत्या जायते त्यर्थः प्रकृत्यालुप्यते पुमान्।
प्रकृत्याधिष्ठितं सर्व्वं प्रकृत्यावञ्चितं[3] जगत्॥
प्रकृत्याभेदमाप्नोति प्रकृत्या भेदमाप्नुयात्।
न वस्तु प्रकृतिर्नैव न पुमान् परमेश्वरः॥
तयोः[4] समरसं ज्ञानं वस्तुतत्त्वं महेश्वरः।
उभयो समावायोस्तु वस्तुतलं परं पदम् ॥
ज्ञाते[5]तस्मिन् स्वयं प्राज्ञः स्वरूपश्चपुमानसौ।
निर्विकारः सविज्ञेयो गुरुतुल्यो न संशयः॥
व्यक्तो भवति देवेश स्वयमात्मा स्वयमस्तुवः[6]।
उपायाः सन्तिबहुधा[7] ज्ञानं ब्रह्मसनातनं॥
तथापि प्रकृतेर्योगात् क्षिप्रं प्रत्यक्षतां ब्रजेत्।
सां यान्त्रिकात्वा[8] न सेतु यथानावं प्रगृह्य च॥

---

१. जायते। ख.पु.पा.।
२. अव्यक्तश्च सच व्यक्त प्रकृत्याज्ञायते ध्रुवम्। ख.पु.पा.।
३. रंजितं जगत्। ख.पु.पा.।
४. द्वयोः। ख.पु.पा.।
५. ज्ञाने। ख.पु.पा.।
६. स्वयंभुवा। ख.पु.पा.।
७. सन्तिवहवो। ख.पु.पा.।
८. सायांती काद्गते। ख.पु.पा.।

तत्तटे[१] नावमास्थाय क्षणाद्यान्ति यथा प्रभो।
विष्णुभक्त्या न भेद्ब्रह्मतदभावादपि[२] प्रभो ।।
वैराग्यं[३] नास्तिचेत्तत्र कथं तत्तद्धिकारणम् ।
तस्मात् परम्परा जातास्तद्धिकारणतागताः ।।
याति आलोकोऽङ्कुको यथा।।
चक्षुरादि न तत् किञ्चिदधिकं निर्विकल्पकम् ।
घटत्वं पुनरेतस्य भेद कारणमेवहि ।।
तथाहि ज्ञाप्ति विभवे अन्येव्यञ्जुकतां गताः ।
साक्षात् कारणमेवैतत् प्रकृतिर्भैरवेश्वरः[४] ।।
दिव्यभावोवीरभावे यस्य चित्ते व्यवस्थितः ।
जीवन्मुक्तः स एवात्मा भोगार्थमटते महीम् ।।
देवीपुत्रः स एवात्मा भैरवः परिकीर्त्तितः ।
भावत्रयाणां मध्येतु द्वौ भावौ सुप्रतिष्ठितौ ।।
न वक्तव्यौ महादेव कुलसारं कुलोत्तमैः ।

भैरव उवाच–

त्वमेव जगतामंबा नाहं वै जगतोवहिः ।
तस्मादम्बानुकम्पायां मुक्तो भवति नान्यथा ।।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ भावना निर्णयः द्वादशः पटलः।।



१. तत्रैव। ख.पु.पा.।
२. नते ब्रह्म। ख.पु.पा.।
३. वैजात्यां ख.पु.पा.।

अथ त्रयोदशः पटलः

।।अथ विद्यानुष्ठानविधिः।।

ब्राह्मेमुहूर्त्ते उत्थाय मुक्तस्वापः शिरसि सहस्रार[1]कमलकर्णिकावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं। श्वेतमाल्यानुलेपनं प्रकाशस्वरूपं स्ववामस्थितया विमर्षरूपया रक्तशक्त्या प्रकाशमयासहितं विभाव्य मानसैरूपचारैराराध्य।[2] ऐँ इति यथा शक्तिं जप्त्वा।

ऐँ अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरुवे नमः।।

इति उक्त्वा नमस्कृत्य मूलादिब्रह्मरन्धान्तमरुणदिवाकरकोटिपाटलां कुण्डलीरूपां[3] मूलविद्यां विभाव्य तया शम्भुनाक्रियासमभिव्याहारेण विन्दुल सुधाधारया सन्तर्प्य यथाशक्ति मूलमन्त्रं जप्त्वा उत्थायावश्यकं विधायस्नानार्थं नद्यादौ मृत् कुशान् गृहीत्वा मृत्तिकां मूलन्त्रेण संगृह्य हस्तद्वये सूर्य्यायदर्शयित्वा विलेपनं कुर्य्यात्। रमिति मन्त्रेण गो करीषं नासिकायां दद्यात् ततोजलाञ्जलित्रयं मूर्द्ध[4] हृन्नाभिकेषु दद्यात्। ततो दक्षिणे त्रिकोणाकारं कृत्वा आचमेत्।

ततः शङ्खावर्त्तक्रमेण जलं विलोड्य तत्रमूलमन्त्रं पठन त्रिर्निमज्याञ्जुलित्रयं वरुणायदद्यात्। एवं सोमाय भानवे दद्यात्। ततो गोपी चन्दनेन रक्त चन्दनेन वा दिव्यास्त्रं भाले लिखेत्। ताराबीजं हृदि लिखेत–शक्तिं मध्येलिखेत्। ततः प्राणायामं कृत्वा देव्याः पूजार्थं स्नानमहं करिष्ये इति संकल्प्य यथाविधिस्नात्वा मन्त्रस्नानमारभेत्।

---

१. सहस्रदल। ख.पु.पा.।
२. सम्पूज्य। ख.पु.पा.।
३. कुण्डलिनी। ख.पु.पा.।
४. मूर्द्धिन। ख.पु.पा.।

मूलविद्या जपान्ते त्रिर्निमज्य उत्थाय मूलविद्यया त्रिवारजप्तेनोदकेन कलसमुद्रयाऽङ्गुलिनात्मानं त्रिवारमभिषिञ्च्य मूलविद्यया त्रिराचम्य देवर्षिपितृतर्पणं विधाय मूलविद्यान्ते श्रीउग्रतारामेकजटां नीलसरस्वतीं वा तर्पयामिस्वाहेति-पञ्चविंशतिवारं त्रिधासन्तर्प्यजलादुत्थाय वाससी परिधायाचम्य सूर्य्यायार्घ्यं दत्वाताम्रादि पात्रे चन्दनार्क कुसुम श्वेतापराजितापुष्पानि निक्षिप्य उद्यदादित्य मण्डलवर्त्तिन्यै[१] चैतन्योदितायै श्रीमदेकजटायै स्वाहेति त्रिरर्घ्यं दत्वा तन्मध्ये देवीं विभाव्य गायत्रीं यथाशक्तिजप्त्वाहं सर्च्च जपन् सवितारमुपस्थाप्य हंस झ क यथा श्रोक हंसः शुचिः षड्व[२]सुरन्तराक्षसद्धोतादेवि[३]सदा-तिथिर्दुवोलसतनृस। दूरसन्ध्योम सद्व्रागो जा झ तजा अश्रिजा ऋतं वृहत, इति। तारायै धीमहि महोग्रायै विद्महे तन्नोदेवी प्रचोदयात्।

इति गायत्रीं जपित्वा संहारमुद्रया स्वहृदि समानीय नियतवचनो यागस्थान-मागत्य 'ॐ व्रजोदके हूँ फट स्वाहे' ति जलमन्त्रेण जलमधिष्ठाय एतज्जलं सपर्य्यार्थं विधाय किञ्चिदन्यजलेनिः क्षिप्य तेनैव वारिणा ॐ द्रीँ स्वाहेति मन्त्रेण पादौ प्रक्षाल्य कुशहस्तः कुशान् सुवर्ण रजत मुद्रिका रूपान यथा संख्यं हस्ते दत्वा ॐ श्रीं विशुद्धधर्म्म सर्व्वपापानिशामयाशेषविकल्पमपनय हूँ फट स्वाहेति यथाविध्याचम्य तत्रपीठं चिन्तयेद्यथा-

श्मशानं तत्र सञ्चिन्त्य तत्र कल्पद्रुमं स्मरेत्।
तन्मूले मणिपीठञ्च नानामणि विभूषितम् ।।
नानालङ्कारभूषाढ्यां मुनिदेवैश्च शोभितम्[४] ।
शिवाभिर्वहुमांसास्थिमोदमानाभिरन्ततः ।।
चतुर्दिक्षु शिवा[५]मुण्डाश्चिताङ्गारास्थित भूषिताः।
तन्मध्ये भावयेद्देवीं यथोक्त ध्यान योगतः[६] ।।

---

१. मण्डलमध्यवर्तिन्यै। ख.पु.अ.पा.।
२. सद्व। ख.पु.पा.।
३. वेदिसतिथिदूरोणासत्। ख.पु.पा.।
४. मण्डितम् । ख.पु.पा.।
५. शवा। ख.पु.पा.।
६. मार्गतः। ख.पु.पा.।

इति ध्यात्वा ॐ मणिधरिणिवज्रिणि[१] सर्व्ववशङ्करि स्वाहा इति शिखाबन्धनं ॐ रक्ष रक्ष हूँ फट स्वाहेति जलाभिषेकाद्भूमिशोधनम्।

'ॐ सर्व्वविघ्नानुत्सारय हूँ फट स्वाहे'ति नाराचमुद्रयाऽक्षतप्रक्षेपात् त्रिविधविघ्नानुत्सारयेत्।।

ॐ पवित्रवज्रभूमे हूँ फटस्वाहेत्यनेन भूमिमभिमन्त्र्यं तत्र रक्तकम्बल कोमलविष्टराद्यासनानास्तीर्य्य ॐ आः सुरेखे वज्ररेखे हूँ फट्स्वाहेति रक्तचन्दन पुष्पाभ्यां अभ्यर्च्य स्वस्तिकादिक्रमेण तत्रोपविशेत्। तत्रानेनमन्त्रेण भूमौ मण्डलं विरचय्य्य तत्रासनमास्थाय तत्रोपविशेदिति केचित् आसनेपि केचित्। ॐ मणिधरिणिवज्रिणि महाप्रतिसरे रक्ष रक्ष मां हूँ फट स्वाहेति वस्त्रान्तरे रक्षा ग्रन्थिं वन्ध्येत् ॐ माः[२] हूँ फटस्वाहा इति व्यापकतया कायवाक्चित्त शोधनम्[३]।

'ॐ नमः पुष्पकेतु राजार्हतेसम्यक् शुद्धाय'। 'ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पभूषिते[४] पुष्पचयावकीर्णे हूँ फट स्वाहे'ति पुष्पादिमन्त्रमयं कृत्वा सुवर्णादिपीठे रक्तचन्दनगोरोचनाकुङ्कुम रक्तपुष्पाद्यनुलिप्ते 'आँ आः सुरेखे वज्ररेखे हूँ फट स्वाहे' ति मन्त्रेण मण्डलं लिखेत्। यथा त्रिकोणान्तर्गतमष्ट दलपद्मं चतुरस्रं चतुर्द्वारात्मकं तस्य त्रिकोण पूर्व्वे द्रीँ याम्ये स्त्रीँ उत्तरे फ पश्चिमे ट त्रिकोणमध्ये हूँ मम द्रुतकवित्व पाण्डित्यं कुरुकुरु इत्यादि साध्यसहितं लिखेत् एतद्यन्त्रं पुरतो रक्तचन्दनगाम्भार्य्यादि पीठे निधाय पीठमर्च्चयेत्। यथामध्ये उपर्य्युपरि 'श्मशानाय नमः, कल्पवृक्षाय नमः'। तन्मूले 'मणिपीठाय नमः, नानामणिभ्यः नानालङ्कारेभ्यःच मुनिभ्यः देवेभ्यः वहुमांसास्थिमोदमान शिवाभ्यः चतुर्दिक्षु शवमुण्डचिताङ्गारास्थिभ्यः'।

ततोऽष्टदलेषुदेव्याः पूर्व्वादिक्रमेणाष्टौ[५] मूर्त्तीः प्रपूजयेत् लक्ष्म्यै सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै शान्त्यै पुष्ट्यै तुष्टयै सर्व्वत्र प्रणवादिनमोऽन्तत्वं बोध्यम्। मध्ये हसौः सदाशिवमहाप्रेतासनाय नमः इत्यभ्यर्च्यतदुपरि मूलमूर्त्तिं प्रकल्प्य

---

१. मणिधरिणि। ख.पु.पा.।
२. आः। ख.पु.पा.।
३. शोधयेत्। ख.पु.पा.।
४. संभवे। ख.पु.पा.।
५. पी. शक्तीरर्चयेत्। ख.पु.पा.।

भूतशुद्धिं कुर्य्यात्, यथा-प्राणायाम क्रमेण द्रींङ्कारं[१] रक्तवर्णं नाभौध्यात्वात-दुद्भूताग्निना स्वं देहं दग्धं विभाव्य त्रीभितिबीजं पीतवर्णं हृदिविचिन्त्य तदुद्भूतेन वायुना भस्मप्रोत् सारयेत्। ततो हूँकारं श्वेतवर्णं शिरसि विचिन्त्यतदुद्भूतेनामृतेन तदस्थि श्मशानरूपं प्लावितं कृत्वा समस्तं शरीररूपं विश्वं प्लावयेत्।[२]

तत आत्मानमपगतव्यथं निर्म्मलं तारिणीमयं ध्यायेत्। यथा तस्मिनश्मशान रूपे विश्वव्यापके अमृतवारिणि आः कारादुक्तपद्मं[३] ध्यात्वा तदुपरि ता उकारात् शुक्लपद्मं विचिन्त्य तदुपरि नीलसन्निभं हूँकारं ध्यात्वा तदुपरि नीलाभां हूँ कारबीज भूषितां कर्तृकां ध्यायेत्।

कर्त्र्युपरिगतं ध्यायेदात्मानं तारिणीमयम्।
प्रत्यालीढपदाघोरां मुण्डमालाविभूषिताम्॥
खर्व्वांलम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ।
नवयौवन सम्पन्नां पञ्चमुद्रा-भूषिताम्॥
चतुर्भुजां ललज्जिह्वा महाभीमां वरप्रदाम्।
खड्गकर्त्री समायुक्तसव्येतरभुजद्वयाम्॥
कपालोत्पल संयुक्तसव्यपाणियुगान्विताम्।
पिङ्गोग्रैकजटां ध्यायेत् मौलावक्षोभ्य[४] शोभिताम्॥

एवं भूतशुद्धिं कृत्वा मातृकान्यासानन्तरं मर्घ्यस्थापनं चरेत्। यथा स्ववामे त्रिकोणवृत्तं चतुरस्त्र मण्डलं कृत्वा तत्र साधारं कपालादि पात्रं निधाय तदुक्तं कापालं स्फुटमन्त्रसिद्धि जनकमित्यादिना शङ्खपात्रमत्र निषिद्ध मिति गुरवः एतदभावेनारिकेलपात्रं कर्त्तव्यं तत्र मूलविद्यया विमलपयसापूर्य्य विल्वपत्र रक्तचन्दनं रक्तपुष्पाणि निक्षिप्यार्घ्यस्याग्नीशासुर वायुषु मध्ये दिक्षु हृदयादि षडङ्गानि विन्यस्य तत्र दशधामूल विद्यांजप्त्वा तेजो मयेन तज्जप्तजलेन सर्व्वं विद्यामयं कृत्वा तज्जलेनात्मानं पूजोपकरणं चाक्षुभ्यइत्यर्घ्यम्। विधाय प्राणायामादिकं कुर्य्यात् वामनासा पुटे मूलविद्याया चतुर्धाजपेन वायुमापूर्य्य

१. ह्रींकारं। ख.पु.पा.।
२. भावयेत्। ख.पु.पा.।
३. पङ्कजं। ख.पु.पा.।
४. मौलावक्ष्योभ्य। भूषिताम्। ख.पु.पा.।

तस्या एव षोडशबार जपेन मध्यनाड्याकुम्भयित्वा तस्याएवाष्टबार जपेन दक्षिणनासापुटेन रेचयेत्। एवं यथाशक्ति प्राणायामं कृत्वा ऋष्यादिकं न्यसेत् यथा शिरसि 'अक्षोभ्य ऋषये नमः'। मुखे 'वृहतीच्छन्दसे नमः'। हृदि 'एकजटादि देवताभ्योनमः'। मूलाधारे 'हूँ बीजायनमः'। हृदये 'फट् श--गे नमः'। शेषाण्यक्षराण्युच्चार्य्य सर्व्वाङ्गे 'कीलकाय नमः'। पुनस्थैव 'ममद्रुत कवित्व पाण्डित्य सिद्धये नमः'।

कराङ्गन्यासौ यथा 'द्राँ एकजटायै अङ्गुष्ठाभ्यां नमः' इत्युङ्गुष्ठयोः'। द्रीँ तारिण्ये तर्जनीभ्यां नमः' इति तर्जन्योः। 'द्रूँ वज्रोदके मध्यमाभ्यां नमः' इति मध्यमयोः। 'द्रैँ उग्रजटे अनामिकाभ्यां नमः' इत्यनामिकयोः। 'द्रौँ महापरिसरे कनिष्ठाभ्यां नमः' इति कनिष्ठयोः। 'द्रः पिङ्गोग्रैकजटेकरतलकरपृष्ठाभ्यां नमः' इति करतलकरपृष्ठयोः। हृदादिन्यसेद्यथा 'द्राँ एकजटायै हृदयायनमः' इति तर्जनीमध्यमानामिकाभिर्हृदये। 'द्रीँ तारिण्ये शिरसे स्वाहा' इति। तर्जनीमध्यमाभ्यां शिरसि। 'द्रूँ वज्रोदके शिखायै वषट्' इत्यधोमुख्यङ्गुष्ठेन शिखायाम्। 'द्रैँ उग्रजटे कवचाय हूँ' इति हस्तद्वयेन शिरआदि पादपर्य्यन्तम्। 'द्रौँ महापरिसरे नेत्रत्रपाय वौषट्' इति तर्जनीमध्यमानामिकाभिर्नेत्र त्रयाय। 'द्रः पिङ्गोग्रैकजटे अस्त्राय फट्' इति तर्जनीमध्यमाभ्याम् उर्द्धोर्द्धं तालत्रयं छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात्।

मातृकान्यासो यथा–

अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं हृदये एं ऐं ओं औं अं अः कं खं गं घं ङं दक्षिणभुजे डं चं छं जं झं ञं तं ठं डं ढं वामभुजे णं तं थं दं धं नं पं फं बं भं दक्षिणजङ्घायां मं यं रं लं वं शं षं सं हं क्षं वामजङ्घायां अत्रैवार्घ्यस्थापनं एवं षडङ्गंविन्यस्य ब्रह्माञ्जुलिं विरचय्यात्माभेदेन लक्षणं ध्यायेत्। यथा–

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासापरा
खड्गेन्दीवरकर्तृखर्परभुजा हूँकारबीजोद्भवा।
खर्वानील विशालपिङ्गलजटाजूटोग्रनागैर्युता।
जाड्यं न्यस्य कपालके त्रिजगतां हन्तूग्रतारास्वयम्॥

करकलित दुर्व्वाक्षतरक्तचन्दनवज्रपुष्पादिमिलित दिनकर किरणारुण कुसुमाञ्जलौ मातृकायन्त्रं ध्यात्वा हृदयान्मूल तेजोमयीं शुद्धज्ञानचैतन्यरूपां षटचक्रभेदक्रमेण शिरः स्थित सहस्रदलकमलकर्णिकान्तगतां परमशम्भुं प्राप्य

क्रियासमभिहारेण तदमृताम्बुधौ विश्राम्य तदमृतन्मेलीभूतामान्दमयीं तारां प्रवहन्नासापुटादानीय कल्पितमूर्त्तौ समावाहयेत्

देवेशि भक्तिसुलभे परिवारसमन्विते।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिराभव।।

एकजटे इहावह इहावह इत्यञ्जलिं स्थापने दर्शयेत् इहतिष्ठ स एवाधोमुखः इहसन्ति धेहि इत्युद्ध्वाङ्गुष्ठमुष्टिभ्यां इहसन्निरुध्यस्व इत्युङ्गुष्ठगर्भमुष्टिभ्यां आलभेद्देव्यङ्गेषड्ङ्गं विन्यस्य आँ द्रीं क्रौं स्वाहेति प्राणप्रतिष्ठां कृत्वा मूलं स्मरन ॐ श्रीमदेकजटे वज्रपुष्पं प्रचीच्छु हूँ फट स्वाहा इत्यनेन पञ्चोपचारैरर्च्चयेत्। ततो योनिमुद्रां प्रदर्श्य आत्मानं प्रार्थ्य परिवामर्चयेत्। यथा केशरेषु अग्नीशासु वरायुषुमध्येदिक्षु च षडङ्गमर्चयेत्। यथा- आग्नेय्यां 'द्राँ एक जटायै नमः'। 'ऐँ द्रीँ तारिण्यै शिरसे स्वाहा' इत्यैशान्याम्। नैर्ऋत्यां 'द्रूँ ब्रजोदके शिखायै वषट्'। वायव्यां 'द्रैँ उग्रजटेकवचाय हूँ'। कर्णियां 'द्रौँ महापरिसरे' नेत्रत्रयायवौषट् चतुर्दिक्षु'द्रः पिङ्गोग्रैकजटे अस्त्राय फट्'।।

अथ देव्यामौलौ 'ॐ अक्षोभ्यवज्रपुष्पं प्रतीच्छ हूँ फट स्वाहे' ति संपूज्य देव्या वायव्यादीशानपर्य्यन्तं गुरुपङक्तिमर्च्चयेत्। यथा ऊद्ध्वे केशानन्दनाथ वज्रपुष्पं प्रतीच्छु हूँ फटस्वाहा ॐ व्योमकेशानन्दनाथ वज्रेति ॐ नीलकण्ठा नन्दनाथ वज्रेति वृषध्वजानन्द नाथ वज्रेति एते दिव्औघाः। ॐ वशिष्ठानन्दनाथ वज्रेति। ॐ कूर्म्मनाथानन्द नाथ वज्रेति। ॐ मीन नाथानन्दनाथ वज्रेति। ॐ परमैश्वरानन्द नाथ वज्रेति। ॐ हरिनाथानन्द नाथं वज्रेति एते सिद्धौघाः। ॐ तारावत्यम्ब वज्रेति। ॐ भानुमत्यम्बवज्रेति। ॐ जयेत्यम्ब वज्रेति। ॐ विद्येत्यम्ब वज्रेति। ॐ महोदर्य्यम्बवज्रेति। ॐ सुखानन्दनाथ वज्रेति। ॐ परानन्दनाथ वज्रेति। ॐ पारिजातानन्दनाथ वज्रेति। ॐ कुलेश्वरानन्द नाथ वज्रेति। ॐ विरुपाक्षानन्दनाथ वज्रेति। ॐ फेरव्यम्ब वज्रेति एते मानवौघाः एतदशक्तौ अक्षोभ्य मात्रं देवी यौनौ पूजयेदिति ततो वामावर्त्तेन पूर्व्वादिदिग्रे ॐ वैरोचन वज्रेति। ॐ शङ्खपाण्डुर वज्रेति। ॐ पद्मनाभवज्रेति। ॐ असिताभ वज्रेति। ततो वामावर्त्तेनाग्न्यादिकोण दले ॐ नूं नाँ नामक वज्रेति। ॐ माँ मामक वज्रेति। ॐ पाण्डुर वज्रेति। ॐ ताँ तारकवज्रेति। ततो वामावर्त्तेन पूर्व्वादिद्वार चतुष्टये ॐ पं पद्मान्तक वज्रेति। ॐ मंयमान्तक वज्रेति। ॐ विं विघ्नान्तक

वज्रेति। ॐ नं नरकान्तक वज्रपुष्पै प्रतीच्छ हूँ फट स्वाहेति संपूज्य पुनर्देवीमभ्यर्च्य स्ववामे त्रिकोणवृत्त चतुरस्त्रमण्डलं कृत्वा पुष्पैस्तमभ्यर्च्य विहितबलिद्रव्य-भरितं पात्रं निधाय तदनामिकाङ्गुष्ठाभ्यां स्पृष्ट्वा ॐ द्रीं एकजटे महायक्षाधिपायै भयोपनीतं बलिं गृह्ण गृह्ण गृह्णापयत मम सर्व्वशान्तिं कुरु कुरु परविद्यामाकृथ त्रटत्रट छिन्धि छिन्धि सर्व्वजगद्वशमानय द्रीं स्वाहेति त्रिः पठित्वाबलिं दत्वारहस्यमालया नियदेनोपाँशुना मानसेनवा सहस्त्रं शतं तद्दिनजं विंशति वा विंशत्यान्यूनं न जपेत्। तत्र जपरहस्यं यथा–

मूलाधारस्वाधिष्ठान मणिपूरके यथा मूलाधार संख्यं बीजत्रय व्याप्तिं तड़ित् कोटिकभावां परस्परानुलोम विलोमेन विभाव्य उच्चार्य सर्व्वतेजो विशुद्धं फटकारं विंश्रान्तरूपं ध्यात्वा जपेत्। जपनियमस्तु न द्रुतं न विलम्बितमेव च एवं यथाशक्ति जपत्वाऽर्घ्योदक कुसुममादाय तेजोरुपं तज्जलं गृह्याति गुह्यगोप्त्रीत्वं गृहाणास्मत् कृतं जपं सिद्धिर्भवतु मे देविंत्वत् प्रसादात् त्वयिस्थिते इति देव्यावामाधो हस्ते समर्प्य तत् स्वीकृतं विभाव्य स्तुत्वाऽष्टाङ्गपातं प्रणमेत् नित्यपूजा प्रमाणे स्तुति रुक्ता सापि पठितव्या ततो मां मदीयं पर देवतायै समर्पयेत्।

ॐ तत्सादित्यात्मसमर्पणं कृत्वायोनिमुद्रां प्रदर्श्य देव्यङ्गे सर्व्वावरण देवता विलाप्य संहारमुद्रया परतेजः स्वहृदि समानीय प्राणायाम षडङ्गंकृत्वा ऐशान्यां निर्माल्यवासिनी समभ्यर्च्य हविः शेषमिष्टेभ्योदत्वा स्वयञ्च किञ्चित् स्वीकृत्य सिद्धसंकल्पो यथा सुखं विहरेदिति नित्यसपर्य्या। पुरश्चर्य्यायामपि एवमभ्यर्च्य लक्षंजप्त्वा तद्दशांसमसितोत्पलेन विल्वपत्रेण वा चतुरस्त्र कुण्डे यथा विधि संस्कृताग्नौहुत्वा कालागुरुद्रवोपेतैर्विमलैर्गन्धवारिभिस्तद्दशांशेन संतर्प्य विमलवारिणा यथोपदेशं स्वमूर्द्धन्यभिषिच्य तद्दशांशेन ब्राह्मणानुत्तमान् स्त्रियं क्षीरखण्डाक्षभ्योक्षैर्यथाविधि तर्पयित्वा गुरवे दक्षिणां दद्यात्।।

।।इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ विद्यानुष्ठान विधिः त्रयोदशः पटलः।।



अथ चतुर्दशपटलः

।।अथ होमविधानं व्याख्यास्यामः।।

तत्र[१] होमस्तु त्रिविधः नित्यनैमित्तिक काम्यभेदात् तत्र[२] होमस्यावश्यकत्वमिति तदुक्तं रुद्रयामले।

नाजप्तः[३] सिद्ध्यते मन्त्रो नाहुतश्च कदाचन।
जपहोमोभयात्मत्वात्[४] पूजायाः पूर्व्वं[५]लक्षणम्।

इति प्रसङ्गात् तत्र नित्यं कुण्डे स्थण्डिलेवा अहिताग्नौ नैमित्तिकन्तु केवलं स्थण्डिले तत्त सहस्रादिहोम शल्यादि शोधिते पुरुषमान खनिते वा गृहे तदुक्तं विष्णुसंहितायाम्।

आदौ भूमिं परीक्षेत वास्तुज्ञान विशेषतः।
शल्यादीन् शोधयेद्यलाभाथवा पुरुषं खनेत्।।

इति पुरुष प्रमाणं खनेत्। स्थण्डिलं यथा हस्तायाम सुविस्तारमङ्गुष्ठोन्नतं चतुरस्रं रचयेत्। गणेश्वर[६]विमर्षिव्याम् –

अथवा स्थण्डिलं कुर्य्याद्विदास्रं मन्त्रिसत्तमः[७]।
स्वाङ्गुष्ठपर्व्वणोत्[८]मेधं हस्तमात्रायतं समम्।
अन्यथा वर्णयन्त्येके स्थण्डिलं हस्तमात्रकम्।
चतुरङ्गुलिमुत्सेधं वालुकाभिः समन्ततः।

पञ्चहस्त सप्तहस्त मण्डले वा कुण्डं कुर्य्यात्एतन्मण्डपकरणन्तुवास्तोः पूर्व्वस्यामुत्तरस्यामैशान्यां वा कुर्य्यात्। तदुक्तं गणेश्वरविमर्षिण्याम् –

---

१. यत्र। ख.पु.पा.।
२. सर्व्वत्र। ख.पु.पा.।
३. नाजन्मः। ख.पु.पा.।
४. भयार्थद्यान्न। ख.पु.पा.।
५. पूर्त्ति। ख.पु.पा.।
६. शनैश्चर। ख.पु.पा.।
७. मुत्तमाः। ख.पु.पा.।
८. पर्व्वणोच्देध। ख.पु.पा.।

वास्तोः संपूज्य[१] पूर्व्वस्यामैशान्यां वित्तपस्य च।
दिशि संकल्पयेन्मन्त्री मण्डपस्तु विभागशः।।
नव हस्तप्रमाणं वा सप्तहस्तमथापिवा।
पञ्चहस्तप्रमाणं वा चतुरस्त्रं समुन्नतम्।।
निश्छिद्रन्तु चतुर्द्वार वेदिक दृष्टि भूषणम्।
गर्भमालापरिवृतं तन्तुनापरिवेष्टतम्।।

एवं[२] कुण्डपक्षेतु पञ्चहस्त गृहमेव शस्तं तदुक्तं होम[३] निरूपणे-

एकदण्डी[४]मतेनान्यन् पञ्चहस्त् गृहंभवेत्।

इति तदेकं चतुरस्त्रं कुण्डं गृहस्योत्तरभागे शस्तं तदुक्तं गणेश्वरविमर्शिन्याम्-

अथोत्तरतः कुण्डमेकं वेदाग्रमाहरेत्[५]।
लक्षहोमेतु तत् कुर्य्यात् गृहमध्येन दूषणम्।।

इति

चतुरस्त्रन्तु सर्व्वेषां केचिदिच्छन्ति तान्त्रिका।

इति शारदा तिलकोक्त्या

चतुरस्त्र महेशानि सर्व्वकर्म्माणि साधयेदिति।।

कुलसारोक्त्या च-

सर्व्वेषामेव वर्णानां सर्व्वकर्म्माणि सर्व्वतः।
चतुरस्त्र प्रकुर्व्वीत अथवा विहितानि च।।

संक्षिप्य चतुरस्त्रमते लिख्यते तत्र गृह कुण्डादिकरणे हस्त नियमो यथा शारदातिलके-

कर्त्तुर्दक्षिणहस्तस्यमध्यमाङ्गुलिपर्व्वणः।
मध्यस्य दीर्घमानेन मानाङ्गुल[६]मुदीरितम्।।

कर्त्तु यर्जमानस्य तदुक्तं विज्ञानललितेश्वरे[७] -

---

१. संगृह्य। ख.पु.पा.।
२. एक। ख.पु.पा.।
३. होमाङ्ग। ख.पु.पा.।
४. कुण्डमिते। ख.पु.पा.।
५. श्रमुद्धरेत्। ख.पु.पा.।
६. माना। ख.पु.पा.।
७. ललितेश्वरी। ख.पु.पा.।

गृहादिकुण्डकरणे हस्तादि नियमे तथा।
यजमानस्य कर्त्तव्यं नान्यस्यैव कदाचन ॥
अथवाष्टभिर्यवैरेकाङ्गुलं भवेदिति।

तदुक्तं ललितेश्वरे-

यस्याकुलो यस्तस्याशोयवोष्टमउदाहृतः।
तिलस्तुतत् पञ्चमांशः षष्टकांशस्तिलस्य च ॥
भावत्रिहायणी बाल[1]स्तस्यषष्ठो नरोपि च।
सर्व्वत्रैवहितदग्राह्यं यदङ्गुलंमध्यमाङ्गुले ॥
मध्यमामध्यपर्व्वसमानं ततः चतुर्विंशतिः करः।
आगमाननुसूत्यैववह्नि संस्कृयते तु वैः ॥
तैस्तदङ्गुलमानेन कुण्डाद्यपिविधीय[2]ताम्।

तत्र चतुरस्र कुण्डोद्धारो यथा-

प्राक् प्रत्यक सूत्र माक्षात्स्य[3] तन्मध्येनाञ्चयेत् सुधीः।
भागद्वयेन तन्मध्ये विधायोत्तरयाम्ययोः ॥
दिशोर्मत्स्य युगं कुर्य्यात्तन्मात्स्यादरयोपुनः।
दक्षिणोत्तरगं सूत्रं यथामानं निपातयेत्[4]॥
तत् सूत्राग्रेषु संस्थाप्य कोणेषु मकरान्यसेत्।
कोणस्थ मकराग्रेषु दिक्षु सूत्राणि यातयेत्॥
एवं कृते चतुष्कोष्ठं चतुरस्रं प्रजायते।
एवमेव भवेत्तत्र चतुरस्रं सुलक्षणम् ॥
कुण्डविस्तारमानन्तु यद्मान दृढं पुनः।
तन्मानमवटं कुर्य्यात्तादृग्रूपाश्चमेखलाः ॥

अत्र तु पञ्चमेखलवादिनां पञ्चामेखलमुक्तम्। केचित्रिमेखलं केचिदेकमेखल-मात्रं सर्व्वसमञ्जसं त्रिमेखलमात्र परिधीयते। तदुक्तं सिद्धान्तशिखरे-

---

१. भवेत् श्री हायणिवालस्तस्यषष्ठोलवोपिच। ख.पु.पा.।
२. विधीयते। ख.पु.पा.।
३. मास्थात्य। ख.पु.पा.।
४. निपातयेत्। ख.पु.पा.।

पञ्चमेखलकं कुर्य्यात्तन्त्रवित् सर्व्वकुण्डके।
मेखलात्रितयं वाथ द्वितीयञ्चैकमेव वा।
वेदाग्निनयनोत्सेध मेखलात्रितयं क्रमात्॥

तदुक्तं क्रियासारे–

प्रधानमेखलोत्सेधमुक्तं यत्र नवाङ्गुलम्।
तद्बाह्यमेखलोत्सेध पञ्चाङ्गुलमिति स्मृतम्॥
तद्बाह्यमेखलोत्सेधमङ्गुलद्वितयं क्रमात्।
चतुस्त्रियङ्गुल व्यापो मेखलात्रितयस्य च॥
इति बाह्ये सर्व्वत्रैवं विधं क्षेत्रं कुण्डानामनुरूपतः।
एकाङ्गुलं तथात्यक्त्वा कुण्डान्तमेखला भवेत्॥
एकहस्ते तु कुण्डेतु अन्यकुण्डे तु बर्द्धये[1]।
अर्द्धाङ्गुलप्रमाणन्तु कण्ठं[2] कुर्य्यात्तुमन्त्रवित्॥

अत्र[3]मेखलव्यास समोच्चान्तर्मेखला प्रथमा मेखलान्तर्नवाङ्गुलो च्चाचतुरङ्गुल विस्तारा वहिश्चतुरङ्गुलोच्चाद्वितीयान्तः पञ्चाङ्गुलोच्चा तृतीयाङ्गुल विस्तारावहि स्त्रयङ्गुलोच्चा द्वितीयोत्तरार्द्धाङ्गुलोच्चाद्वयङ्गुल विस्तारा–

सात्विकी मेखला पूर्व्वा द्वितीया राजसीस्मृता[4]।
तृतीया तामसी प्रोक्ता मेखलानान्तु निर्णयः॥

अथ योनिः–

प्रथमे मेखलोयोनिं कुण्डाष्ठीं होत्तवोग्रहः।
कुर्य्याकुजोष्ट रक्तांतु कुण्डवित् सर्वलक्षणा[5]॥
योनिः षडङ्गुला या या चतुरङ्गुल विस्तृता।
उन्मतिस्त्रयङ्गुलाप्रोक्ता कुण्डे हस्तमिते बुधैः॥
नाभिं कुण्डोदरे कुर्य्यात् सुधीरष्टदलाब्जवत्।

---

१. वर्जयेत्। ख.पु.पा.।
२. कुण्डं। ख.पु.पा.।
३. तत्र। ख.पु.पा.।
४. राजसीस्मृता। ख.पु.पा.।
५. सर्व्वलक्षणा। ख.पु.पा.।

तत्तत् कुण्डानुरूपां वा नाभिं तत्र विचक्षणः ।।
नेत्रवेदाङ्गुलोत्सेध विस्तारानाभिरत्रवै ।
मुष्टिवहिर्हस्तमात्रे योनिस्तद्वदुदीरिता ।।
द्विहस्तादिषु कुण्डेषु योनिं सम्बर्द्धयेत् क्रमात् ।
एकैकाङ्गुलमानेन तथानाभिञ्चवर्द्धयेत् ।।
मेखलानांवहिस्थानं स्थानमित्यभिधीयते ।
चतुरस्रस्थलारब्ध मालां साध्यसरन्ध्रिकाम् ।।
स्थूलमूला च सूक्ष्माग्रा उन्नतस्यान्मनोहरा ।

बाह्यस्थ मेखला बाह्य स्थानमारभ्य कारयेत्। सरन्ध्रकमित्युभयत्र सम्बन्ध्यते। तदुक्तं भास्कराचार्य्येण –'योनौ नाले सरन्ध्रकमि'ति' रुद्रयामले–

योनिमध्ये विलं कुर्य्यात् तदा ह्या ग्राहिसम्मितम्[१] ।।

कुण्डवासना यथा– तदुक्तं गणेश्वरविमर्षिण्याम् –

कुण्डस्य रूपं जानीयात् परमं प्रकृतेर्वपुः ।
उदरं कुण्डमित्युक्तं हस्तावुभयतः स्मृतौ ।।

पादौ योनिस्तुपश्चिम इति। योन्या अपि तदुक्तं तन्त्र राजे–

योनिः कारण भूतस्यतद्वदस्य पदं महत्।
तेन तत्रैव हव्यानां निधानाशुन्मयात्ततः ।।
कलानि पूर्णोन्यचिरादयत्नाद्वितरत्यसौ ।
योनिकुण्डे तथायोनिं पद्मे पद्मं न कारयेत् ।।
शतादिन वसता शतान्तु मुष्टिकुण्डे तुहोमयेत्।
हस्तमात्रं सहस्रेतु द्विहस्तमयुते स्मृतम् ।।
चतुर्हस्ते लक्षमात्रं षटकरे दशलक्षकम्।
दशहस्तन्तु कोट्यावे[२] हस्तसंख्या व्यवस्थिता ।
कोटि होमान्नास्ति होमः सर्व्वत्रवेदहोमयोः ।।

तत्र[३] द्विहस्तादि कुण्डमेखला। तदुक्तं शारदातिलके–

---

१. संगितम् । ख.पु.पा.।
२. कोटयांवै। ख.पु.पा.।
३. अत्र द्विशसादि। ख.पु.पा.।

कुण्डे द्विहस्तताज्ञेया रसवेदो गुणाङ्गुलाः।
चतुर्हस्ते तु कुण्डे तार सुतर्क युगाङ्गुलाः[१] ॥
कुण्डे वसुकरेताःस्युर्दशाष्टार्द्धाङ्गुलान्विताः।
वसुहस्तमिते कुण्डे भानुपङ्क्यष्टकाङ्गुलाः[२]॥
आयामोत्सेधतात्रेया मेखला सर्व्वतोमुखैः[३] ॥ इति॥

अथ द्विहस्तादि कुण्डानां प्रमाणं यथारुद्रयामले–

एक हस्तादि कुण्डानां प्रमाणमभिधीयते।
एक हस्तद्विहस्तादि गदतो मे निशामय॥
त्रयस्त्रिंशाङ्गुलं सूत्रं तिलद्वादशकोनितम्।
द्विहस्तकुण्डे विधिवत् पूर्व्ववत् परिसूत्रयेत्[४]॥
द्विहस्ते द्विचत्वारिंशत्तिलद्वादशकोणितम्।
चतुर्हस्ते तु कुण्डेसति पञ्चाशाङ्गुलोत्तमम्॥
तिलद्वादशकं सूत्रं पञ्चहस्ते निवोध मे।
चतुः षष्ट्यङ्गुलं सूत्रं तिलद्वादश कोणितम्॥
सप्तषष्ट्यङ्गुलं सूत्रं तिलद्वादशकोणितम्।
षडहस्त कुण्डे विधिवत् सप्तहस्ते निवोधयेत्॥
नवसप्तत्यङ्गुलं सूत्रं तिलद्वादशकोणितम्।
अष्टाशीत्यङ्गुलं सूत्रं तिलद्वादशकोणितम्॥
अष्टहस्ते तु कुण्डे वै सूत्रं विद्वान् परिस्तरेत्।
सप्तनवाङ्गुलं सूत्रं तिलद्वादशकोणितम्॥
नव हस्ते तु कुण्डेवै सूत्रं तन्त्र विदां स्मृतम्।
तिलद्वादश संयुक्तं षडुत्तरशताङ्गुलम्।
दशहस्तस्य कुण्डस्य उद्धरेत्तन्त्रविन्मतम्॥

---

१. युगाङ्गुला। ख.पु.पा.।
२. काङ्गुलाः। ख.पु.पा.।
३. बुधैः। ख.पु.पा.।
४. सूचयेत्। ख.पु.पा.।

अत्र विशेषः-यत्र त्रिहस्तादि[१] कुण्डेमेखलायोन्यादौ प्रकृतहस्तचतुर्विंशांशेनाङ्गुलादिवर्द्धनम्। तदप्यापाततो बालप्रबोधमात्रम्। तदुक्तं वृहद्योनी हृदये-

द्विहस्तादिषु कुण्डेषु व्याससूत्रञ्चयद्भवेत्।
तच्चतुर्विंश भागेन मानाङ्गुलपरिग्रहः ।।
तदङ्गुलप्रमाणेन सर्व्वकुण्डेषु सर्व्वतः ।
मेखलायोनि कुण्डानां कल्पनं परिकीर्त्तितम् ।।

एवं सर्व्वत्र परिमाणं कृत्वा कुण्डं कुर्य्यात्। अज्ञाने दोषो यथा। यदाह विश्वकर्मा तदुक्तं विज्ञान ललितेश्वरे-

खातेधिके[२] भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डेषु सन्तापो मरणं छिन्नमेखले।।
मेखला रहिते शोकह्यधिके वित्त संक्षयः।
भार्य्या विनाशनं प्रोक्तं कुण्डयोन्या विनाकृतम्।
अपत्यध्वं सनं प्रोक्तं कुण्डमुत्कण्ठवर्जितम्।।

अन्यत्र श्री भैरव श्रोतसि।

सूत्राधिके सुहृद्भेदो मानहीने दरिद्रता ।
वातुलः कण्ठहीनस्यादसिद्धिर्मूलखातके ।।
अधिके वित्तनाशश्च हीने दुःखं प्रवर्त्तते ।
व्याधयश्च प्रवर्त्तन्ते हीनोष्ठेस्यादपस्मृतिः[३] ।
उच्चाटः स्फुटिते छिद्रे शङ्कुले वा मृतिर्भवेत् ।।

तस्ममाद्गुरोर्ज्ञात्वा कुण्डं चरेदिति। तदुक्तं रुद्रयामले-

इति संक्षेपतोदेवि मानं कुण्डेषु दर्शितम्।
योगिनीहृदये दृष्टं[४] भाषितं शम्भूना स्वयम् ।।
देव्यैलोको[५]पकाराय स्नेहेनापि निवेदितम् ।
प्रणिपत्य गुरोर्ज्ञात्वा कुण्डानां वरणं चर ।।

।। इति कुण्डादिनियमः।।

---

१. द्विहस्तादि। ख.पु.पा.।
२. ख्याते। ख.पु.पा.।
३. हीनोष्टे च दपस्मृतिः। ख.पु.पा.।
४. व्यक्तं। ख.पु.पा.।
५. देवोलोक। ख.पु.पा.।

।।अथाग्निकार्य्यं वक्ष्ये।।

मण्डपस्योत्तरे भागे मन्त्रीनित्यनैमित्तिककाम्येषु कर्म्मसु तत्तत् कर्म्मानुगुणतया तत्तद्धोममानेन तत्तदाकारेषु विरचितेषु चतुरस्रोदिष्वागमनलक्षणाङ्कितेषु कुण्डेषु स्थण्डिले वा होमं कुर्य्यात्। तत्राष्टदश संस्कारैः कुण्डं संस्कुर्य्यात्।

अष्टादशस्युः संस्काराः कुण्डानां मन्त्रचोदिताः।
वीक्षणं मूलमन्त्रेण पारणं[1] प्रोक्षणंमतम्।।
तेनैवताडनं दर्भैवर्म्मणाभ्युक्षणं मतम्।
अस्त्रेण खननोद्धारी मृन्मन्त्रेण[2] प्रपूरणम्।।
समीकरण मन्त्रेण सेचनं वर्म्मणा मतम्।
कुट्टनं हेति मन्त्रेण वर्म्ममन्त्रेण मार्ज्जनम्।।
विलेपनं कदारूप कल्पनं तदनन्तरम्।
त्रिसूत्रीकरणं पश्चात् हृदयेनार्च्चनं मतम्।।
अस्त्रेण वह्नीकरणं[3] हृन्मन्त्रेण[4] कुशैः शुभैः।
चतुष्पथानां तां शुद्धि तनुयादक्षपाटनम्।
यागे कुण्डानि संस्कुर्य्यात् संस्कारैरेभिरीरितै।।

न कुण्डे प्रागग्रा उदग्रा तिस्रोरेखा लिखेत्। रेखानां देवतास्तत्रैवोक्ताः।

प्रागग्राणां स्मृतादेवा रुद्रविष्णु पुरन्दराः।
रेखानामुदग्राणां ब्रह्मवैवस्वतेन्द्रियाः।।

अथवा षटकोणै[5]रावृतं त्रिकोणं चतुरस्त्रं कुण्डाभ्यन्तरे लिखेत्। तन्त्रोक्तं वर्त्मन्ययोगपीठमर्चयेत्।

वामायैनमः ज्येष्ठायै रौद्रये अम्बिकायै।
एताः शक्तयो मेखलो परिपूर्व्वादि पूज्याः।।

---

१. सरेण। ख.पु.पा.।
२. हृन्मंत्रेण। ख.पु.पा.।
३. बह्नीकरणं। ख.पु.पा.।
४. द्रुन्मंत्रेण। ख.पु.पा.।
५. षट् कोणावृतं। ख.पु.पा.।

मूलमन्त्रमुच्चार्य्य 'श्रीतारा कुण्डायनमः' इति संपूज्य तन्मध्ये नीलवर्णां ऋतुस्नातां वागीश्वरीमर्चयेत्। ततः स्वर्णादिपीठमात्रे मणिसम्भवं वाऽरणि सम्भवं वा श्रोत्रिय गृहजं वा वह्निं वमिति बीजेनोद्धृत्यानीय 'हूँ फट क्रव्यादेभ्यः स्वाहा' इति मन्त्रेण क्रव्यादांशं परित्यज्यमग्निमन्त्रेण संशोध्य कवचेनावगुण्ठ्य धेनुमुद्रां प्रदर्श्य वरुणबीजेणामृतीकृत्य कराभ्यां समुद्धृत्य आत्मनोऽभिमुखं त्रिः परिभ्राम्य मेदिनीस्पृष्टजानुः शिवबीजनुद्धया कुण्डमध्यस्थितयोर्वागीश्वरयोः सङ्गमं विचिन्त्यतस्यां योनौ अधोमुखमग्निं निक्षिप्यं द्रीँ वह्निमूर्त्ताय न म इत्यभ्यर्च्य हल्लेखामुच्चरण इडयाकृष्यं कुम्भकयोगेन सुषुम्नावस्थितसहस्रदलकमल वैन्धवाग्नि वाय्यो देववह्निभ्यां संयोज्य योनिमुद्रया दक्षिणनाड्या हल्लेखामुच्चरन वह्निं विभाव्य कूर्च्चबीजमुच्चरन्। बह्नि चैतन्याय नम इति वागीश्वरी गर्भनाड्यां तच्चैतन्यं संयोज्य संस्थाप्य गालिनी[१] मुद्रां दर्शयेत्। ततः समिदिन्धनाभ्यांमाच्छाद्याग्नि चिन्मन्त्रेण प्रज्वाल्य चिन्मन्त्रो यथा-

ॐ चित् पिङ्गल हन हन दह दह पच पच सर्व्वज्ञापय स्वाहा ततोमग्निं विन्यस्य मृत्वाङ्गैर्व्वागन्धादिना समर्च्चयेत्। तद्यथा-

सहस्रार्चिषे हृदयाय नमः। स्वस्ति पूर्णाय शिरसे स्वाहा। उत्तिष्ठ पुरुषाय शिखायै वषट्। धूम्रव्यापिणे कवचाय हूँ। सप्तजिह्वाय नेत्रत्रयाय वौषट्। धनुर्द्धराय अस्त्रायफट् इत्थंङ्गुल्येभ्यर्च्य ॐ वैश्वानर जातवेद इहावह नोताक्ष सर्व्वकर्म्माणि स्वाहाति मूलेनाराध्य तं ध्यायेत्। यथा-

सप्तहस्तं त्रिपादं त्रिशीर्षं चतुर्भिर्विषाणैस्त्रिधावद्धमध्यम्।
पिषङ्गैर्युतं लोचनैस्तर्क संख्यै र्निकाशं वसन्तं चतुः स्रोतयुक्तम्।।
शक्तिं बह्निं स्रकस्रुवान् सव्यहस्तै र्वामहस्तैस्तोमरं तालवृन्तम्।
सर्पिः पूर्णं तप्त सोवर्णपात्रं ध्यायेद् देवं सप्तजिह्वादधानम्।।

अथवा एवं ध्यायेत्-

बन्धूकपुष्पसङ्काशं सुतप्तकनकप्रभम्।
पद्मस्थं जगतीनाथं[२] वदनद्वयशोभितम्।।

---

१. ज्वालीनी। ख.पु.पा.।
२. यजमानार्थं। ख.पु.पा.।

सप्तछन्दोभयकरं रसनात्रयविग्रहम् ।
त्रिधाध्यात्म त्रिपादाब्जं हव्यकव्यद्विनासकम् ।।
ब्रह्माध्वर्य्युज्ञातृहोतृ चतुःशृङ्गी विराजितम् ।
पञ्चरात्रं पाशुपतं लोकायतमहामतम् ।।
बौद्धवैदिकमित्येतत् षटपिङ्गलविलोचनम् ।
वेदार्थश्च चतुःश्रोत्रं श्रोत्रशास्त्रमयं ध्वनिम् ।।
सपाटलजटाविद्ध[1] मणिकोटिकभास्वरम् ।
हेमालङ्कारसंयुक्तं हेमकुण्डलमण्डितम् ।।
रक्ताम्भोरुहमध्यस्थं स्वस्तिकासनसंस्थितम् ।
पृष्ठदेशसमालम्बितार्त्तीय चरणाम्बुजम् ।।
सदाशब्दायमानं भुविराजमानं[2] स्वतेजसा ।
शक्तिंवह्निं स्रुकस्रुवौ च चतुर्भिर्दक्षबाहुभिः ।।
तोमरं तारवृन्तञ्च सौवर्णं घृतपात्रकम् ।
वामैस्त्रिभिर्बाहुभिश्च दधानं रक्तवाससम् ।।
हिरण्याकणकारक्ता कृष्णादक्षाननस्मृता ।
सुप्रभाति[3] चाति रक्ताच वशनाबहुरूपिणी ।।
इया व सज्ञातत्वामवदने सर्व्वमास्थिता ।
एताभिः सर्व्वजित्वाभिरूपेतं पटवाननम् ।
व्यावृतोत्तान वदनं साधकाभीष्टवर्षिणम् ।।

एवं तस्य मुखे हिरण्या कनकारक्ता कृष्णासुप्रभा अतिरक्ताबहुरूपा इति। सप्तजिह्वा स्वनामसदृश वर्णाः। ज्वलज्वालाजटिलवपुषः सुरपितृगन्धर्व्वयक्षनाग पिशाच राक्षसा[4]रव्य देवताधिष्ठिताः।।

।। अथवैवं ध्यायेत् ।।

इष्टं शक्ति स्वस्तिश्चेत्यथोच्चैर्द्रोर्भिर्धरियन्तं जपभम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ।।

इति सञ्चिन्त्य षटकोणेषु मध्येषु पूजयेत्।

---

१. बद्ध। ख.पु.पा.।
२. च राजमार्णं। ख.पु.पा.।
३. स्वभावा। ख.पु.पा.।
४. राक्षसाक्षदेवता। ख.पु.पा.।

मूलमन्त्रमुच्चार्य्य 'श्रीतारा कुण्डायनमः' इति संपूज्य तन्मध्ये नीलवर्णां ऋतुस्नातां वागीश्वरीमर्चयेत्। ततः स्वर्णदिपीठमात्रे मणिसम्भवं वाऽरणि सम्भवं वा श्रोत्रिय गृहजं वा वह्निं वमिति बीजेनोद्धृत्यानीय 'हूँ फट क्रव्यादेभ्यः स्वाहा' इति मन्त्रेण क्रव्यादांशं परित्यज्यमग्निमन्त्रेण संशोध्य कवचेनावगुण्ठ्य धेनुमुद्रां प्रदर्श्य वरुणबीजेणामृतीकृत्य कराभ्यां समुद्धृत्य आत्मनोऽभिमुखं त्रिः परिभ्राम्य मेदिनीस्पृष्टजानुः शिवबीजनुद्धया कुण्डमध्यस्थितयोर्वागीश्वरयोः सङ्गमं विचिन्त्यतस्यां योनौ अधोमुखमग्निं निक्षिप्यं द्रीँ वह्निमूर्त्ताय न म इत्यभ्यर्च्य हृल्लेखामुच्चरण इडयाकृष्यं कुम्भकयोगेन सुषुम्नावस्थितसहस्रदलकमल वैन्धवाग्नि वाय्यो देववह्निभ्यां संयोज्य योनिमुद्रया दक्षिणनाड्या हृल्लेखामुच्चरन वह्निं विभाव्य कूर्च्चबीजमुच्चरन्। बह्नि चैतन्याय नम इति वागीश्वरी गर्भनाड्यां तच्चैतन्यं संयोज्य संस्थाप्य गालिनी[1] मुद्रां दर्शयेत्। ततः समिदिन्धनाभ्यांमाच्छाद्याग्नि चिन्मन्त्रेण प्रज्वाल्य चिन्मन्त्रो यथा-

ॐ चित् पिङ्गल हन हन दह दह पच पच सर्व्वज्ञापय स्वाहा ततोमग्निं विन्यस्य मृत्वाङ्गैर्व्वागन्धादिना समर्च्चयेत्। तद्यथा-

सहस्रार्चिषे हृदयाय नमः। स्वस्ति पूर्णाय शिरसे स्वाहा। उत्तिष्ठ पुरुषाय शिखायै वषट्। धूम्रव्यापिणे कवचाय हूँ। सप्तजिह्वाय नेत्रत्रयाय वौषट्। धनुर्द्धराय अस्त्रायफट् इत्थंङ्गुल्येभ्यर्च्य ॐ वैश्वानर जातवेद इहावह नोताक्ष सर्व्वकर्म्माणि स्वाहाति मूलेनाराध्य तं ध्यायेत्। यथा-

सप्तहस्तं त्रिपादं त्रिशीर्षं चतुर्भिर्विषाणैस्त्रिधावद्धमध्यम्।
पिषङ्गैर्युतं लोचनैस्तर्क संख्यै र्निकाशं वसन्तं चतुः स्त्रोतयुक्तम्।।
शक्तिं बह्निं स्त्रकस्त्रुवान् सव्यहस्तै र्वामहस्तैस्तोमरं तालवृन्तम्।
सर्पिः पूर्णं तप्त सोवर्णपात्रं ध्यायेद् देवं सप्तजिह्वादधानम्।।

अथवा एवं ध्यायेत्-

बन्धूकपुष्पसङ्काशं सुतप्तकनकप्रभम्।
पद्मस्थं जगतीनाथं[2] वदनद्वयशोभितम्।।

---

१. ज्वालीनी। ख.पु.पा.।
२. यजमानार्थं। ख.पु.पा.।

सप्तछन्दोभयकरं रसनात्रयविग्रहम् ।
त्रिधाध्यात्म त्रिपादाब्जं हव्यकव्यद्विनासकम् ।।
ब्रह्माध्वर्य्युज्ञातृहोतृ चतुःशृङ्गी विराजितम् ।
पञ्चरात्रं पाशुपतं लोकायतमहामतम् ।।
बौद्धवैदिकमित्येतत् षटपिङ्गलविलोचनम् ।
वेदार्थश्च चतुःश्रोत्रं श्रोत्रशास्त्रमयं ध्वनिम् ।।
सपाटलजटाविद्ध[१] मणिकोटिकभास्वरम् ।
हेमालङ्कारसंयुक्तं हेमकुण्डलमण्डितम् ।।
रक्ताम्भोरुहमध्यस्थं स्वस्तिकासनसंस्थितम् ।
पृष्ठदेशसमालम्बितार्त्तीय चरणाम्बुजम् ।।
सदाशब्दायमानं भुविराजमानं[२] स्वतेजसा ।
शक्तिंवह्निं स्रुकस्रुवौ च चतुर्भिर्दक्षबाहुभिः ।।
तोमरं तारवृन्तञ्च सौवर्णं घृतपात्रकम् ।
वामैस्त्रिभिर्बाहुभिश्च दधानं रक्तवाससम् ।।
हिरण्याकणकारक्ता कृष्णादक्षाननस्मृता ।
सुप्रभाति[३] चाति रक्ताच वशनाबहुरूपिणी ।।
इया व सज्ञातत्वामवदने सर्व्वमास्थिता ।
एताभिः सर्व्वजित्वाभिरूपेतं पटवाननम् ।
व्यावृतोत्तान वदनं साधकाभीष्टवर्षिणम् ।।

एवं तस्य मुखे हिरण्या कनकारक्ता कृष्णासुप्रभा अतिरक्ताबहुरूपा इति। सप्तजिह्वा स्वनामसदृश वर्णाः। ज्वलज्वालाजटिलवपुषः सुरपितृगन्धर्व्वयक्षनाग पिशाच राक्षसा[४]रव्य देवताधिष्ठिताः।।

।। अथवैवं ध्यायेत् ।।

इष्टं शक्ति स्वस्तिश्चेत्यथोच्चैर्द्रोर्भिर्धरियन्तं जपभम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ।।

इति सञ्चिन्त्य षटकोणेषु मध्येषु पूजयेत्।

---

१. बद्ध। ख.पु.पा.।
२. च राजमार्णं। ख.पु.पा.।
३. स्वभावा। ख.पु.पा.।
४. राक्षसाक्षदेवता। ख.पु.पा.।

गणेश्वरविमर्षिव्यात्तु–

हिरण्यावैदूर्य्यवर्णाकनका प्राचीदिशिसमास्थिता[१]।
कृष्णानीलाब्जसंकाशा नैर्ऋत्यांदिशि संस्थिता।।
सुप्रभापद्मरागाभावारुण्या[२]दिशिसंस्थिता।
अतिरक्ताजवाभासा वायव्यां दिशिसंस्थिता।
बहुरूपा यथार्थाख्या दक्षिणोत्तरतः स्थिता।।

षटकोण रहितेतु

सुप्रभापूर्व्वदिक् संस्थाकृष्णायाम्येदिशिस्थिता।
हिरण्यारुणे प्रोक्ता शृङ्गरेवहुरूपिका।।
सौम्ये रक्ता तथाग्नेय्यामतिरक्ता च संस्थिता।
कनकारसनाया च कुण्डमध्ये समास्थिता।।
वह्निवाय्वीश संयुक्ताः सादियान्ताः सविन्दवः।
वह्नेर्मन्त्राः समुद्दिष्टा जिह्वनां सप्तदेशिकेः।।

द्रीं[३] स्त्रयँ हिरण्यायैनमः। द्रीं ष्टयँ गगणायै नमः। द्रीं शूँ रक्तायै नमः द्रीं य्यूँ दृष्टायैनमः। द्रीं त्र्यूँ सुप्रभायैनमः द्रीं प्यूँ रक्तायै नमः द्रीं यूँ बहुरूपायै नमः।

इति सप्तजिह्वाः संपूज्य मेखलोपरिपूर्व्वादितो ब्राह्माद्याः[५] पूजयेत्। यथा ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा महालक्ष्मी तद्बहिः ॐ लक्ष्म्यै नमः ॐ सरस्वत्यै ॐ रत्यै ॐ प्रीत्यै ॐ कीर्त्यै ॐ नगन्त्यै ॐ तुष्टयै। ॐ पुष्टये एतद्बहिर्लोक पालान यजेत्। वज्रशक्तिदण्डखड्ग पाशाङ्कुशादाशूल चक्र पद्मान्येतानि लोकपालायुधानि आद्याक्षर बीज युक्तैर्नमोन्तै वाराध्यपरिधीन–परिस्तरणान् प्राचीवर्जं दिक्षुचार्चयेत्। यथा– कुण्डमध्ये मेखलायां मेखला समदीर्घयज्ञकाष्ठ त्रितयं प्राचीवर्णं पूर्व्वाग्रत्व[६]मुत्तराग्रत्वमेके एवं कुशासनप्यग्रेण मूलमाच्छादयन् पूर्व्वाग्रमेकपङ्क्तिमास्तरेत्। आब्रह्मणे नमः इति दक्षिणे ब्रह्माणं पूजयेत्।।

---

१. समाश्रिता। ख.पु.पा.।
२. सुप्रभाश्वेतवर्णाय कुण्डमध्येव्यवास्थिता
३. द्रीं स्थले ह्रीं अस्मिन् स्थले पाठान्तरं इव पुस्तके वर्तते। ख.पु.पा.।
४. कृष्णोये। ख.पु.पा.।
५. ब्रह्मादयः शक्त येः पुण्या। ख.पुस्तके।
६. पूर्व्वाग्रह। ख.पु.पा.।

मेखलासु च सर्व्वासुवेष्टयेद्दीपमालिकाम् ॥
त्रिपङ्क्त्यावेष्टितं कुण्डं ततो व्याहृतिभिर्हुनेत् ॥

ततः स्रुकस्रुवौत्रिः[२] प्रताप्यतो वामहस्ते कृत्वा दक्षिणहस्तेन प्रोक्षयेत्। पुनः प्रताप्य आत्मनो दक्षिणभागे स्थापयेत्। आज्य स्थालीयानीयास्त्रमन्त्रेण संप्रोक्ष्य तस्यामाय्यं निक्षिप्यतां कुण्डादुद्धृत्याग्नौ निवेशयेत्। इत्यभिद्योतनं दर्भयुगलं प्रक्षाल्याय्ये[३] क्षिप्त्वाऽनलेक्षिपेत्। दीप्तेनदर्भयुगलेनाय्यं नीराय्याग्नौ निक्षिपेत् प्रज्वलितान दर्भा न् घृते प्रदर्श्याग्नी जुहुयात्। विसर्जायतान्ग्रेरु दृत्याग्नौ निधापयेत् जलं स्पृशेत् अङ्गुष्ठोपरि कनिष्ठाभ्यां प्रादेश सम्मितौ उद्धृत्यतत् प्रणीयते पुनस्तो आत्मसंमुखो घृतेन प्लावनं कुर्य्यादिति संस्कृतेन घृतेन जुहुयात्। एतदशक्तौ मूलविद्याष्ट वारेण संस्कुर्य्यात्।[४]

तथा च श्रुतिः–

मूल शुद्धेनाय्ये[५] जुहुयादिति। अथ स्रुवेन स्थाली दक्षिण भागाद्वामावर्त्तेन मन्त्रेण दक्षिणेलोचने अग्नये स्वाहा वामभागादाय्यमादाय सोमाय स्वाहा इति वामलोचने मध्यात अग्नीषोमाभ्यां स्वाहा इति भाललोचने दक्षिणात् अग्नये स्विष्टिकृते स्वाहेति नेत्रवक्त्रोद्घाटनं कुर्य्यात् ततः सतारव्यस्त समस्त महाव्याहृतिभिर्जुहुयात्। घृताङ्गारं अग्नौनिक्षिप्य अग्निमन्त्रः।

ॐ वैश्वानरेत्यादिना वारत्रयं हुत्वा ततोगर्भाधानादीनां संस्काराणां प्रणवाद्येन हृल्लेखाद्येन वा नमोन्तेन सप्त सप्ताहुतीर्जुहुयात्।

एकजटा पक्षे मायाबीजं यथा द्रीँ जनिष्यमाणाग्ने गर्भाधानं कल्पयामि नम इति गर्भाधानं द्रीँ जनिष्यामाग्नेः पुंसवनं कल्पयामिनम इति पुंसवनं। द्रीँ ॐ वैश्वनार अग्नेः सीमन्तोन्नयनं कल्पयामिनम इति सीमन्तोन्नयनं। द्रीँ अग्नेर्ज्जात कर्म्मकरिष्यामि नम इतिजातकर्म्म। द्रीँ ताराग्नेर्नामकरणं कल्पयामि नम अग्नेत्वं तारानामासि इति नामकरणं। द्रीँ अग्नेर्निष्क्रामणं कल्पयामि नम इति निष्क्रमणं।

---

२. स्रुच। ख.पुस्तके
३. प्रज्ज्वाल्य।
४. वार जपेन घृतं संस्कृतं कुर्य्यात्। ख.पुस्तके
५. नाज्येन। ख.पु.पा.।

द्रीँ ताराग्रेरन्नप्राशनं कल्पयामि नम इत्यन्नप्राशनं। द्रीँ ताराग्रेश्चूडाकरणं कल्पयामि नम इति चूड़ाकरणं। द्रीँ अग्रेरुपनयनं कल्पयामि नम इत्युपनयनम्। द्रीँ ताराग्रे र्वेदाध्ययनं कल्पयामि नम इति वेदाध्ययनं। द्रीँ ताराग्रेः समावर्त्तनं कल्पयामि नम इति समावर्त्तनम्। ॐ द्रीँ ताराग्रे गोंदानं कल्पयामि नम इति गोदानं। द्रीँ ताराग्रेर्विवाहं कल्पयामि नम इति विवाहः।

अशुभ कर्म्मणि मरणान्ताः संस्काराः ततस्तत्राग्नौ देवीं विधिवध्यात्वा ऐक्यं विभाव्यमूलेन षोडशाहुतीर्जुहुयात् पुनर्मूलेन षोडशाहुतीर्जुहुयात्। एतद्वयं वज्रैकरणं नाडीसन्धान तत्तत् कल्पोक्तैर्द्रव्यैर्वा ततस्तिलैस्त्रिमधुशक्तैरक्त करवीरपुष्पैर्दुग्धान्नेन वा अष्टोत्तरशतं नित्यहोमे तदर्द्धं वा यथाशक्ति मूलेन हुत्वा तु पङ्क्ताद्यावरण-देवतानां पृथक् पृथगेकैकाहुतिं जुहुयात्।

विद्याकामस्तुत्रिस्वाद्वक्तैस्तिलैः नृपवश्यायसर्पिर्लवणाभ्यां पृथिवीसाम्य कर्म्मणि वकुलपुष्पैः सौभाग्यायमम्बिकाजातिपुन्नागकदम्बैः पुष्पैराज वृक्षकुसुमैः सम्पदेदुर्व्वात्रयाज्यै आयुधेक्षीराक्ततगरैः कवित्वाय चन्दना गुरु कुङ्कुमकर्पूरैः सर्व्वाभीष्टयेधृताक्त मालतीपुष्पैः द्रुत कवित्वाय पुरश्चरण विधौतु नीलोत्पलेनाखण्ड बिल्वपत्रेण वा दशांश जुहुयात्। तत् प्रकारः।

मूलमन्त्रमुच्चार्य्य ततः स्वाहा इदं देव्यै सम्पातेतु होमे सम्पादयेदग्ने स्वाहेति क्रमात् ततः पुनर्महाव्याहृति[१]होमो यथा।

ॐ भूरग्नये देव्यै पृथिव्यैव महते च स्वाहा। ॐ भुवो वायवे चान्तरीक्षायदिवे च महते च स्वाहा। ॐ स्वारादित्याय च चन्द्रमसे च नक्षत्रेभ्य स्वाहा। ॐ भूर्भुवः स्वरग्नये आदित्याय चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भयश्च महते च स्वाहेति हुत्वा। आज्यपूर्णेन स्रुवेण स्रुचमापूर्य्य तत्र सफलाक्षतकुसुमानि निक्षिप्य तदुपरि अधोमुखं स्रुवं दत्वा उद्धर्वमुखं मूलमन्त्रं नमोन्तमुच्चार्य्य वामपादपुरः सरं अनवछिन्न[२]धारया वौषडन्तेन पूर्णाहुतिं दत्वा[३] उपविश्य देवीं गन्धादिभिर्वाराध्य तदङ्गदेवतागणं तदङ्गे विलीनं विभाव्य पूर्व्ववदग्निं नमस्कृत्य विसर्जयेत्।

।।शक्तश्चेत् संरक्षेत्।।

---

१. ततः पूर्णाहुतिर्यथा।
२. अनवच्छिन्न। ख.पु.पा.।
३. हुत्वा। ख.पु.पा.।

।।अथ हविर्दान निर्णयः।।

मन्त्रान्ते स्वाहाकारमुच्चार्य्य हनिर्निक्षेपान्ते इदममुकायेति सम्बन्धः। हविर्दानन्तुन्युब्जपाणिना कर्त्तव्यं तदुक्तं त्रिपुरारत्न[1]सारे।

चित्तहस्ते हविर्दानं हूयते च हुताशने।
दातुः पुण्यफलं नास्ति होता च नरकं व्रजेत्।

भैरव तन्त्रेपि[2]–

हविरुत्तानहस्तेन वैश्वानरमुखे हुतम्।
होतुश्चक्षुर्विनाशाय यजमानो विनश्यति।
आस्यान्तर्जुहुयाद्वह्नेर्विपश्चित् सर्व्वकर्म्मसु।।
श्रोत्रहोमाञ्च वधिरो नेत्रेऽन्धत्वमवाप्नुयात्।
नासिकायां मनस्तापो रोगीस्याच्छिरसोहुतात्।
यतः काष्ठं ततः श्रोत्रं यतो धूमोऽत्रनासिका।
यतोऽल्पज्वलनं नेत्रं यतोभस्मततः शिरः।
यतः प्रज्वलितोबह्निस्तन्मुखं जातवेदसः।

।। इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ होमनिर्णयश्चतुर्दशः पटलः।।



१. त्रिपुरारत्नाकारे। ख.पु.पा.।
२. भैरव स्रोतसी। ख.पु.पा.।

अथ पञ्चदशपटलः

वासनानिर्णयः

अथेदानीं मंत्रवासनामाह

तदुक्तं नीलतन्त्रे–

एवं निगदिता विद्या तारिणी सर्व्वसिद्धिदा।
इदानीं शृणु वक्ष्यामिवासनां सात्मजामभीश ।।१।।
व्योम्ना प्रकाशमानत्वं ग्रसमानं च अग्निना।
तयोर्द्विमर्ष ई कारो विंदुना त्रितयात्मता ।।२।।
तकारः सर्व्वपापघ्नो रेफस्तत्वप्रकाशकः।
विंदुमाली केवलस्तु सर्वबोध प्रकाशिका ।।३।।
शब्दबीजं वेदमयं ततो वेदमया शिवा।
चैतन्यरूपं संसारभीषणं शक्तिदायकम् ।।४।।
फट्कारं सर्वजाड्यानां नाशनं तत्प्रकाशनम्।
एवं समष्टिरूपेण केवलं चित्कला परा[1] ।।५।।
सर्व्वदेवमयी[1] साक्षात् शब्दब्रह्मस्वरूपिणी।
आनन्दरूपिणी नीला स्वात्मानंदप्रदायिणी ।।६।।
प्रणव[2]ब्रह्मरूपा सा सोहं तत्व[3] स्वरूपिणी।
इति ते कथिता विद्या वासनाभुक्तिमुक्तये[4] ।।७।।
एवं यो वेत्ति शुद्धात्मा साधको गुरुशिक्षया।
स योगी सत्यविज्ञानी जीवन्मुक्तः शिवः स्वयम् ।।८।।

---

१. वेद। खमात्रिकायां पाठं भेदः
२. प्रणवब्रह्म।
३. ब्रह्म।
४. सिद्धये।

अथांतर्यजनम्[1]

तदुक्तं रुद्रयामले–

अथांतर्यजनं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
योगिनां यं[2] न जायंते अधिपा मानवाः स्वयम् ।।
गुरोध्यानं प्रकुर्वीत यथा पूर्वं विशालधीः ।
स्नानं बुधस्ततः कुर्य्यात्संविदानंदसिद्धिदम् ।।

तद्यथा–

शृंगार निलयां कुंडलिनीसमुत्थाप्य कुल[3]पंकेजरुह गतं परविंदुं नीत्वा सृत[4]–धारमूलश्रृंगारगतं पात नूं[5] निमग्नस्तिष्ठेत्। इतिस्ता तदुक्तं रुद्रयामले–

स्नायाच्च विमले तीर्थे पुष्करे हृदियान्विते[6]।
विदुंतीर्थेथवास्नायात्पुनर्जन्म[7] न विद्यते ।।

तथैवोक्तम् –

इडा सुषुम्णे शिवतीर्थकोस्मिन्ज्ञानानुपूर्णेवहतः शरीरे।
ब्रह्मांवुभिःस्नातितयोः सदायः किंतस्य गांगैरपि पुस्करैर्वा।।

अथ संध्या

मूलविद्यास्वरूपिणीं तड़ित्कोटि प्रभां मृडालतंतुनिभांकुलकुंडलिनीं परविंदुं[8] प्रापयेत् कुलाकुल समरसी भावेन संध्यां कुर्य्यात्।

तदुक्तं रुद्रयामले–

मेलनं शिवशक्त्योस्तु यस्मिन्काले प्रजायते।
सा संध्याकुलनिष्ठानां नत्वन्यालौकिकामना[9] ।।

अथ तर्पणम्

मूलाधारात्सोमसूर्य्याग्नि स्वरूपिणी[10] कुंडलिनी[11] समुत्थाप्य परविंदुं[12] प्रापये–दुद्भुतातमृतेन देह देवतां तर्पयेत्।

---

१. अथान्तर्याय। ख.पु.पा.
२. तत्र। ख.पु.पा.
३. सहस्रदल पद्मगतम्। इत्यधिकंपाठम्। खपुस्तके
४. विभिद्य पराभृतधारया। ख.पु.पा.
५. तत्र विलग्नस्तिष्ठेत्। ख.पु.पा.
६. श्रिते। ख.पु.वा.
७. पुनर्जन्मन। ख.पु.पा.
ग. मयी। ख.पु.पा.
८. ख. पुस्तके पाठो नास्ति। ख.पु.पा.
९. कौलिनीमता। ख.पु.वा.१
१०. स्व अधिक पाठः। ख. पुस्तके नास्ति
११. कुण्डलिनीं। ख. पुस्तके वास्ति। ख.पु.पा.
१२. निर्भिद्य तद्ध।

तथायामले[१]-

चंद्रार्कानल संघहाङ्गलितं यत्परामृतम।
तेनामृतेन दिव्येन तर्पयेत्परदेवताम्।।

अथार्घ्यविधिः

विंदु स्थानमाधारं नादस्थानं कलारूपं रात्रं नादांतं चंद्रमंडलामृतादाज्ञा चक्रशुद्धा[२] शक्ति तेजसा संपूज्यां[३] संपूज्यं देवतां तर्प्पयेत्।

तथा विज्ञानचन्द्रिकायाम्[४]-

नासादिद्वारसंप्राप्यैर्गंधाद्यैरात्मदेवताम् ।
स्वभावेनसमाराध्य ज्ञातुः सोयं महामखः ।।

तदुक्तं स्वच्छन्द भैरवे-

ब्रह्मद्वारादधोभागे यच्चांद्रंपात्रमुत्तमम् ।
कलासारेण संप्पूर्य तर्प्पयेत्तेन खेचरीमिति ।।इति।।

न्यासोयथा

षड्ग्रन्थिस्थितांतश्च[५] क्रांतर्मातृकावलोकनंन्यासः।

तदुक्तं रुद्रयामले-

आधारो लिंगनाभौ हृदयसरसिजेतालमूले ललाटे ।
द्वे पत्रे षोडशारे द्विदशदले द्वादशार्धे चतुष्के।
वासांते वाल मध्ये ड फ क ठ सहिते कंठकूपे[६] स्वरांश्च।
दृक्षौ कोदंड मध्ये सकल[७] दलगतं योगमार्यं नमामि।

।।इत्यादिन्यासः।।

---

१. तदुक्तं रूद्रयामले। ख.पु.पा.
२. शुद्ध स्व। ख.पु.पा.
३. सम्पूर्ण देह। ख.पु.पा.
४. ख मातृकायां एतत् पाठो नास्ति।
५. षटचक्रवास्थितान्ता। ख.पु.पा.
६. देशे। ख.पु.पा.
७. सतुविमलधीर्न्यास सम्पत्ति सिद्धौ। ख.पु.पा.

अथ षडंगवासना

गौतमीये –

ईड्प मानो हृदात्मानं हृद्ध्येस्याच्चिदात्मकः।
क्रियतेतत्परं त्वेन हृन्मंत्रेण ततः परम्॥
सर्व्वज्ञादि गुणोत्तुंगे संविद्रूपे परात्मनि।
क्रियते निषपाहार शिरोमंत्रेण देशिकः॥
हृद्दिरो रूपचिद्धाम मयताभावना दृढ़ा।
क्रियते निजदेवस्य शिखामंत्रेण देशिकः॥
मंत्रात्मकस्यदेहस्य[१] मंत्रवाच्येन तेजसा।
सर्व्वतोवर्म्ममंत्रेण क्रियते हन्यसंवृत्ति॥
यद्ददाति परं ज्ञानं संविद्रूपे परात्मनि।
हृदयादिमंयते तस्यादेतन्नेत्र संज्ञकम्॥
अध्यात्मकादिरूपं यत्साधकस्य विनाशयेत्।
अविद्या जातमस्त्रांपराधाय समीरितम्॥

अथ ध्यानम्

तदुक्तमुदयाकरपद्धत्याम् –

शक्तिद्वयपुरातस्थ कमलद्वयसंस्थितम्।
ज्योतिस्तत्वमयं ध्यायेत्कुलाकुल नियोजनात्॥
शृंगाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतम्।
सदासमरसंधोयं ध्यानमेतद्धि योगिनाम्॥

पुनराप्युक्तम्

किरणस्थंतदग्निस्थं चंद्रभास्करमध्यगम्।
महाशून्ये लयं कृत्वा पूर्णस्तिष्ठतियोगियद्।
निरालंबपदेशून्ये यत्तेजमुपजायते।
तद्गर्भमभ्यसेन्नित्यं ध्यानमेतद्वियोगिताम्॥

---

१. देवस्य। ख.पा.
ग. द्विदशदशदले। ख.पु.पा.
घ. धाम। ख.पु.पा.
ग. योगिराद्। ग.पु.पा.।
ग. योगिनाम। ग.पु.पा.।
ग. श्रुचा। ग.पु.पा.।
ग. मढनौ। ग.पु.पा.।

अथपूजा

यथा

अंतर्मुखे न सा विषयादिकं सर्व्वं परतेजसि समर्पणमितिपूजनम्।

तदुक्तं भैरवतन्त्रे।

अर्चयन्त विषयैः पुष्पैस्तत्क्षणात्तन्मयौ भवेत्।

इति अन्यत्रापि–

न्यासस्तन्मयताबुद्धिः सोहं भावेन पूजयेदिति।।

अथजपो

यथा

सुषुम्णां तानि विच्छुक्ति रूप ग्रन्थि सूत्रग्रन्थितताम् हंस मेरु समन्वितां अनुलोम विलोमेन कुंडलिनीमुत्थाप्य जपेत्।

तदुक्तं मातृकार्णवे–

मालापञ्चाशिका प्रोक्ता सूत्रं शक्तिं शिवात्मकम्।
ग्रथितं कुंडली शक्तिं कलांते मेरुसंस्थिति।।

अथ होमः

नाभिकुंडे कुंडलिनी चिदाग्नौ वासनें धनदीप्तया परामृतहविषा सुषुम्णा श्रुचाद् अक्षवृत्ति वेज्ञमान मंत्रेर्जुहुयाव।

मंत्रोयथा

मूलमुच्चार्य्य–

नाभिचैतन्य रूपाग्नौ हविषा मनसाश्रुचा।
ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहम्।।स्वाहा।।

इत्येकाहुतीं दत्वा मूलमुच्चार्य्यधर्म्मा धर्म्महविर्दीप्तरूपाग्नौ मनसा श्रुवा। सुषुम्ना वर्त्मना नित्य मक्षवृत्तिर्जुहोम्यहम् स्वाहा द्वितीयाहुतिः।

मूलमुच्चार्य्य–

प्रकाशाकाशहस्ताभ्यामवलंव्यायुताश्रुवा
धर्म्माधर्म्मकलास्नेहपूर्ण प्रगौजुहोम्यहम्। स्वाहा।

अंतर्निरर्निरध्यनमेधमार्नें मायांधकार परिपंथिनिसंविदाग्नौ।
कस्मिंश्चिद्भुत मरीचिविकाश भूमौ विश्वञ्जु होमि वसुधादे शिवावसानम्।।

---

१. विन्दु इति ख मात्रिकायाम्
ग. अंतर्निरन्तरे मेधमानोमायान्धकार। ग.पु.पा.
ग. संकाशं। ग.पु.पा.

अथयोगः

कथितं परमं ब्रह्म योगं शृणु वरानने ।
आधारे च गुदस्थाने पंकजं चतुर्दलम् ।।
कर्णिकायां स्थितं योनि कामाक्षा परमेश्वरि ।
अपानाख्यं हि कदर्य्यं आधारे तत्त्रिकोणके ।।
स्वयंभू लिंगतन्मध्ये पश्चिमाभि मुखंप्रिये ।
तस्मात्तु द्वयंगुलात्तूर्द्ध अधोमेढ्रम्तु द्वयंगुलम् ।।
एकाङ्गुलं तु तन्मध्ये चतुस्त्रं त्रिकोणकम् ।
तन्मध्ये तु शिखिस्थानं तप्तहाटकसुप्रभम् ।।
वंधूकपुष्पे संकाशं तडिल्लेखेवविस्फुरत् ।
सक्त विरेश्मिभिर्मुक्तं बालाग्नि रूपगर्भकम् ।।
यादिक्षपारपर्य्यंतं कलादश समन्वितम् ।
अयमग्निः समुदिष्टः सर्प्यं च कथयामिते ।।
वह्नि देशे महाभागो मध्यमामूलमास्थिते ।
सिंदूरं संनिभं बीजवादाद्विशोभितम् ।।
रवितत्र विज्ञानीया कलाद्वादशसंयुतम् ।
कंठाभ्यां द्वादशबीजयुग्मं सुरेश्वरि ।।
तन्मध्ये स परार्द्धं च उद्यदादित्य सन्निभम् ।
रजः शक्तिर्महाभागे रविर्वायुस्थितं जगत् ।।
शिवोविष्णु[१]रिति ख्यातो मनश्चंद्रः प्रकीर्त्तितः ।
आदीबीजं उन्मनी च गणगश्च चतुर्विधः ।।
आदि चंद्रं महाकाशं निजचंद्रं मनोभवेत् ।
उन्मनी प्राण चंद्रश्च निद्रा चंद्रानि[१] नाशिनी ।।
सर्वचंद्रमयोगी[२] ज्ञानं चंद्रं समभ्यसेत् ।
ॐकारस्थां शिखां सूक्ष्मां अंबिकां विद्रूपां[३]कलाम् ।।
चिंतयंती परावस्थां जिह्वोष्ठदशनं दृढम् ।
सूक्ष्मया सहवात्मानमेकीभूतं तु चिन्तयेत् ।।

---

१. चन्द्र विनाशिनी। ख.पु.वा.
२. चन्द्रमयोयोगी।
३. चित्परां कलाम्

हरवक्रस्य संयोगात्सा शिखाकर्मना[१] प्रिये ।
ब्रह्मग्रंथि ततो भीत्वा कुंडली छिन्नमस्तया ।।
ब्रह्मरंध्रे सुषुम्नायां वायुर्विशति मध्यमाम् ।
स्वाधिष्ठानं ततो भीत्वा मणिपुरं विशत्यसौ ।।
मणिप्रभां नाभिदेशे ब्रह्मणः सदनंप्रिये ।
दीप्तिज्योतिमयं शुद्धं ततो भीत्वा सदागतिः ।।
तदूर्ध्वं वैष्णवं स्थानं नीलोत्पलदलप्रभम् ।
महेश्वरस्य स्थानं नीलोत्पल दलप्रभम् ।।
विष्णुग्रंथिं ततो भीत्वा कंठोर्द्धत्रिगुणात्मकम् ।
अंबिकां तु ततो भीत्वा तालुमूलेसुधाकरम् ।।
रुद्रालयं ततो भीत्वा ललाटं तु महेश्वरि ।
महे वहते महेश्वरकलां भैरौ भिन्वानिरोधकारणम्[२] ।।
शंखिनीनाल[३] संप्राप्यवास्तिशून्यं[४] पूर्वोक्तम्[५] ।
तन्मयोत्र नियद्विसर्गं[६] तु परमानंदलक्षणम् ।।
सहस्त्रारं महापद्मं रक्तकिंजल्कशोभितम् ।
प्राप्तरक्तामृतं जातं[७] धारापाणप्रवर्षणम् ।।
सहस्त्रपद्ममध्यस्थं नीरक्षीरमयं[८] प्रिये ।
उर्द्धोद्धव शून्यं पूर्वोक्तं[९] तन्मयोत्र[१०] निरंजनम् ।।
नित्यानंदमयी देवी ध्यायेत्तत्र सदा शिवम् ।
सहस्त्रदलपद्मांतऽश्चापीयूष[११] श्रावयेत्प्रिये ।।
पीत्वा पीत्वा पुनः पीत्वा मूलाधारे प्रवेशयेत् ।
पुनः कुलामृतं[१२] पीत्वा पुनरेव[१३] विशेत्कुलम् ।।

---

१. वर्त्तमाना
२. निर्बोधकारणम
३. निलयं
४. सं अधिकपाठ
५. विभर्ति सा
६. अमृतं वद् विसर्गस्थं द्रुतलाक्षारसोपमम्
७. द्रुतरक्ताम्बुजं जातं धारापात प्रवर्षिणम्
८. क्षीर
९. अव्यक्तम
१०. तन्मयात्र
११. पियूषं प्राशयेत्प्रिये
१२. कालामृतम्
१३. पुनरेव विश्वेत्कुलम्
ग. सूर्य्य चकथयामितो। ग.पु.पा.
ग. विद्या। ग.पु.पा.
ग. विद्या। ग.पु.पा.

रुद्रयामलेपि–

पीत्वा पीत्वा पुनः पीत्वा पीत्वा पततिं भूतले।
उत्थाय च पुनः पीत्वा पुनर्जन्मनविद्यते ।।
देवीस्थानं सहस्त्रारं प्रविशेद कुलंप्रिये ।
द्वादशांतं ततोभूत्वा योनिमुद्रानिवन्धनात् ।।
पीत्वा पुनर्मूलाधारे[१] पिंगलायां गुणत्रयी ।
ध्यायायाद्याक्षरं[२] तत्र पवनस्यप्त्[३] समाहितः ।।
रेचको यस्तु पापघ्नः पुनः सूर्य्येन षोडशः।
उकार मूर्त्तिमध्यस्थां सरस्वतीं[४] शुक्लविग्रहम् ।।
गरुडवाहिनीं देवीं मकारंचोर्द्ध्वमात्रकम् ।
पूर्व्ववत्कुंभकं कृत्वा इडायारेचयेत्सुधीः[५] ।।
चन्द्रेण प्रणवेवं तै वह्निनाड्यांच्चकुंभकम् ।
रेचये पिंगलयापश्चात्महापातकरोगहा ।।
वस्तिनाभिकयोर्मध्ये उड्डानञ्च[६] सुरेश्वरि ।
जालंधरं तथा वक्त्रे गुदेच्चकामरूपकम् ।।
हृदि मध्ये पूर्णागिरिं श्रीहूहं तालुकोपरि।
गिरौ पूर्णगिरीं पीठे कल्पोद्यानं गिरिस्तटे।।
प्रजेत्कल्पतरुस्त[७]स्मिन्साधकाभीष्टसिद्धिदम् ।
ध्यायेत्कल्पतरोमूले देवीं तन्मयपंकजे ।।
वंदति सुधियो[८] ब्रह्मं नित्य वर्णमयं प्रिये।
सविन्महा[९] विंदुमूलं विंदुनादमहाशिफम् ।।
पृथिव्यक्षरसाखाभिसर्व्याशाषुविजंभितम् ।
अपामक्षर पात्रैश्चरसं[१०] संस्थौस्थादित्यजगत्रयम्।।
वह्निवर्णांकुरै दीप्तं रत्नैरिवसुरद्रुमम् ।

---

१. पुनर्मूलकन्दे
२. ध्यायेन्नाड्याक्षरम्।
३.प्रणवस्य समाहितः।
४. वाग्देवीम्
५. इडया । ख.पु.पा.
६. उड्डियानम् । ख.पु.पा.
७. यच्छेत् । ख.पु.पा.
८. मनुयो। ख.पु.पा.
९. सास्मिन् महामृतयम।
१०. संस्थापित जनात्रयम्।

मरूर्द्धण लसंपुष्पैर्द्यौतद्योतयंतं वपुश्रियम् ।।
आकाशार्णफलैर्नम्रं सर्व्वभूताश्रयं परम् ।
परामृताक्ष[१]मधुभिः षिंचंतं परमेश्वरीम्[२] ।
वेदागमादिभिः क्लप्त समुन्नाति मनोहरम् ।।
शिवशक्तिमयं साक्षात्छायश्रितजगत्रयम् ।
तन्मध्ये[३] भावयेन्मंत्री पारिंजातं मनोहरम् ।।
तन्म्लेस्तभूमिं च सा वालु न कांचनप्रभाम् ।
उदयादित्य संकाशं व्याप्तं ब्रह्मांड मंडलम् ।।
शतयोजनविस्तीर्णं ज्योर्तिमंदिरमुत्तमम् ।
चतुर्द्वारसमायुक्तं रत्नप्राकारसन्निभम् ।।
रत्नो प्रकृल्लू संशोभिः कपाटाष्टकसंयुतम् ।
नवरत्नसमायुक्त तुंगगोपुरतोरणम् ।।
हेमदंडशिवालं विध्वजावलिपरिस्कृतम् ।
मध्यकोणेस्थितं स्वं भं नानारत्नभूषितम् ।।
महामाणिक्यवैदुर्य्य रत्नचामरभूषितम् ।
मुक्तामणिवितानाढ्यं वज्रसोपानमंडितम् ।।
मंद वायु समाक्रांत गंध धूपैरलंकृतम् ।
बहुचामरघंटाभिर्निगडै रुपशोभितम् ।।
कल्पवृक्षशिरोगर्भे वसंतं मंडपोपरि ।
सुवर्णसूत्ररचितं तन्मध्ये रत्नमंडलम् ।।
नंदनोद्यान मध्यस्थं वेदिकातदनंतरम् ।
तन्मध्योचिंतयेद्रक्तां चतुरस्त्रोपशोभिताम् ।।
तन्मध्ये स्पूरितं ध्यायेत्रिसंगं ज्योतिरूपिणम् ।
तस्य मध्ये महापद्मं पीयूषपूरपूरितम् ।।
सर्व्वोपरिततो ध्यायेत्पश्चिमामुखलिंगकम् ।
श्रवंतममृतं दिव्यां दिव्यांत कमलांतरे ।।

---

१. परामृताभ्य। ख.पु.
२. परमेश्वरीम् । ख.पा.
३. तन्मूले। भावयेद्देवीं सर्व्वदेव शरीरिणीम।

योगिनीं तां समाराध्य योगिनीगणवेष्टिताम् ।
द्वारपालस्ततोध्यायेच्चतुर्द्वारि स शक्तिकान् ।।
मानसैरुपचारैश्च दीयते द्रव्यमुत्तमम् ।
पाद्यं चरणयोर्दद्यात्मूर्द्धिचार्ध्यं प्रकल्पयेत् ।।
सहस्रदल शृंगारेत्रंविका ललिताच्युतम् ।
परामृतं च पार्णायं भावपुष्पसुवासितम् ।।
स्वर्णपात्रे जलं कृत्वा दद्याच मुखे ।
उदहृत्यगंध तत्वेन गंधं दद्याद्विचक्षणः ।।
स्वयंभुकुसुमैर्युक्तैर्भावपुष्पैः पुनः पुनः ।
मधुपर्कं ततो दद्यात्सुरांबुधिं ततोवदेत् ।।
नीसिकं पर्वतं दद्यात्स्वयंभू कुसुमं ददेत् ।
तन्मूले भावयेद्देवीं सर्व्वदेव शरीरिणीम् ।।
एव चिंतनमात्रेण कि त्रासिध्यति भूतले ।

तंत्रराजेपि समान्य सारस्वतयोग प्रकरणम्-

सूर्य्येन्दुविम्ब मध्यस्थां सुधावर्णविधायिनीम् ।।
विभावयन्निज[1]मनु जपेदेकाग्रमानस ।।
मंडलात्कवितासिद्धिः सर्व्वभाषामयी भवेत् ।
बादा[2]दिषु च सर्व्वत्र देवतात्माजयी भवेत् ।।
सकलं जननीस्तोत्रे[3] मनुभावेयथाभवेत् ।
आनन्दलक्षणमनाहतनाम्निदेशे नादात्मना परिण-
तत्वरूपमीशे अंतर्मुखेन मनसा परिचीयमानम् ।।
सं संति नेत्र सलिलैः पुलकैर्घन्याः ।

इति तथामृत सिद्धौ-

विदुषां परमं ध्यानमनसोवृत्तिशून्यता ।
मौनं सत्वयः[4] साक्षान्निस्क्रियाशत् क्रियायते ।।

महीम्नस्तुतौ-

मनः प्रत्यक्ङ्किते सविधमवधायात्तमरुतप्रहर्ष्यये ।

---

१. न्विति। ख. पु.पाठ
२. वेदादिषु
३. सकल जननी नाथ स्तोत्रे मनु भवो यथा
४. सत्वज। ख.पु.पा.

द्रोमाणः प्रमद शलिलोत्संगितदृशः ।।
पदालोक्याह्लादं हृदइव निमज्जामृतमेय ।
दधात्य[1] तस्तत्वं किमपि यमिनस्तंकिल भवान् ।।
आविश्वासो न कर्त्तव्यो यथा शास्त्रं शमीरितम् ।
विधेयमस्य मतेज्ञेयं[2]रावद्धोयमंजलिः ।।
अकू शंकूचयोः कृशं विलग्ने विपुलं वक्षसि विस्तृतं नितंबे।
अरुणाधरमाविरस्थाचित्ते करुणाशालिकपालि भागधेयम्।।[3]
लम्बोदरस् पौत्रेन कमलाकर सुनूना ।
अकारिशंकरेणैषा वासना तत्त्ववोधिनी ।।

।।इति श्रीशङ्कराचार्यविरचितायां तारारहस्यवृत्तौ वासनानिर्णयः पञ्चदशः पटलः।।

इति गौड़भूमि निवासि महामहोपाध्याय श्रीशंकराचार्य विरचिता तारारहस्य वृत्तिका समाप्त।।

।।शुभमस्तु ।।[4]

।।समाप्तश्चायं संग्रहः।।

।। नमः श्री परदेवतायैः।।



१. दधत्यन्त
२. मर्मज्ञै धीरा
३. ख. पुस्तके पाठोवास्ति।
४. दुर्गासत्यम् । ख.पु.पा.



डॉ. परमात्मा दुबे

जन्म	:	१७ जुलाई १९५६
पिता	:	स्व. झारखण्डे दुबे
माता	:	स्व. गंगोत्रा देवी
स्थायी संकेत	:	ग्राम पोस्ट भीषमपुर, सेवापुरी, वाराणसी.
स्थानीय संकेत	:	S 19/134-AC-2-P , जरीद बाजार, नदेसर, वाराणसी २२१००२
सेवा	:	१९ मार्च १९८२ से सांख्ययोग तन्त्रागम विभाग, स.सं.वि.वि., वाराणसी में अध्यापन. सम्प्रति- सांख्ययोग तन्त्रागम विभागाध्यक्ष, स.सं.वि.वि., वाराणसी.
विशेषज्ञता	:	वेदान्त, सांख्ययोग, आगम, योगतन्त्र.
प्रशासकीय दायित्व	:	• संकाय बोर्ड के सदस्य. • राष्ट्रीय सेवा योजना के कार्यक्रम समन्वयक . • विनयाधिकारी . • पर्यावरण संरक्षण संवर्धन के क्षेत्र में सतत प्रयत्नशील . • एतदरिक्त समय-समय पर विश्वविद्यालय में अनेक प्रशासकीय पदों का दायित्व वहन . • विविध राष्ट्रिय अन्ताराष्ट्रिय कार्यक्रमों में सहभागिता .
सम्पर्क	:	९४१५९८१५०६

ISBN : 978-93-81999-27-1 सन् - 2013 मूल्य: 500/-



शारदा संस्कृत संस्थान
जगतगंज, वाराणसी-221 002
फोन : (0542) 2204168 (संस्थान) 2452037 (आवास)
e-mail: sharadabhawan@yahoo.co.in
website: www.sharadasansthan.in